धनञ्जयविरचितं

दशरूपकम्

श्रीबहुरूपमिश्रकृतदशरूपकदीपिकाख्य-

व्याख्यया समलङ्कृतम्

अमरनाथपाण्डेयः

THE DAŚARŪPAKA

OF

DHANAÑJAYA

WITH THE COMMENTARY DAŚARŪPAKADĪPIKĀ

by

BAHURŪPAMIŚRA

EDITED WITH INTRODUCTION AND NOTES

By

A. N. PANDEY
Head of the Sanskrit Department
Kashi Vidyapith, Varanasi

BHARATIYA VIDYA PRAKASHAN

VARANASI (India) **DELHI**

Publisher :—
Bharatiya Vidya Prakashan
(1) Post Box 108, Kachauri Gali, Varanasi -221001
(2) 1, U. B. Jawahar Nagar, Bungalow Road, Delhi-110007

First Edition, March 1979

Price : Rs. 30/-

Printes : —
Divine Printers,
and
The Krishna Press and Publication, Varanasi

श्रीधनञ्जयविरचितं

दशरूपकम्

श्रीबहुरूपमिश्रविरचितदशरूपकदीपिकाख्य-
व्याख्यया समलङ्कृतम्

सम्पादकः
डॉ० अमरनाथपाण्डेयः
संस्कृतविभागाध्यक्षः
काशीविद्यापीठम्, वाराणसी

भारतीय विद्या प्रकाशन

वाराणसी (भारत) दिल्ली

प्रकाशक :—

भारतीय विद्या प्रकाशन

(१) पो० बा० १०८, कचौड़ी गली, वाराणसी-१

(२) १, यू० बी० जवाहर नगर, बंगलो रोड, दिल्ली-७

प्रथम संस्करण, मार्च १९७९

मूल्य : ३०.००

मुद्रक :—

डिवाइन प्रिंटर्स,

एवं

दी कृष्णा प्रेस एण्ड पब्लिकेशन, वाराणसी

यो मूलं जगतः परा गतिरथ स्वामी शरण्यः शिवो
यो ज्ञानस्य निधिर्विकल्परहिते स्वान्ते स्थितो योगिनः ।
चक्रे नाट्यमशेषमङ्गलविधौ कारुण्यपूरश्च यो
वर्धन्तां नतयः कवित्वकलितास्तस्मै मदीयाः सदा ॥

—सम्पादकः

PREFACE

The Daśarūpaka of Dhanañjaya with the commentary of Dhanika, is a widely read and appreciated text on dramaturgy. There were some points, which were not clear to the scholars, because of the problems posed by the corrupt text and some difficult lines of the Avaloka. This engaged my attention, so an enquiry into the observations of Dhanañjaya began.

The sub-commentary Laghuṭīkā by Bhaṭṭanṛsiṁha, on the Avaloka, appeared in 1969 in the Adyar Library Series as Vol. No. 97. Professor T. Venkatacharya of Toronto has edited the Daśarūpaka with the commentary Avaloka and the sub-commentary Laghuṭīkā. The Laghuṭīkā explains many knotty points of the text.

I came to know from the Catalogue of MSS., preserved in the Library of the Oriental Institute, Baroda about a MS. of the Daśarūpaka, with a sub-commentary by Dhārika[1] on the Avaloka. I wrote to the Director of the Oriental Institute regarding the details of the MS. The reply came and the information was confirmed. In October, 1973, I went to Baroda to consult the MS. I found to my great astonishment that that was a MS. of the Daśarūpaka with the commentary Avaloka and that there was no sub-commentary on the Avaloka. The name Dhārika must have crept in due to negligence. Though I was disappointed, as my purpose was not fulfilled, yet I stayed there for six days and consulted the whole MS.

From an article of Professor V. Raghavan, I knew about the Daśarūpakadīpikā of Bahurūpamiśra. I obtained transctripts of the Dīpikā from the Government Oriental MSS. Library, Madras and from the Oriental Research Institute and MSS. Library, University of Kerala, Trivandrum. As the Laghuṭīkā had already appeared, I

1. This should be noted that no other catologue or source records the name Dhārika as a commentator on the Daśarūpaka.

planned to edit the Daśarūpaka with the Daśarūpakadīpikā of Bahurūpamiśra. The Daśarūpakadīpikā is now presented for the first time to the world of scholars.

I received a grant of Rupees three thousand and five hundred for this project from the U.G.C. Research Unit of the Kashi Vidyapith, Varanasi. I am grateful to the authorities of the University for their kindly assistance. The authorities of the Government Oriental MSS. Library, Madras and of the Oriental Research Institute, University of Kerala, supplied me with the transcripts of the Daśarūpakadīpikā. For this, I am thankful to them. My sincere thanks are due to the Director and other members of the staff of the Oriental Research Institute, Baroda for extending all kinds of help to me during my visit to the Institute.

I express my deep debt of gratitude to my Guru Professor A. P. Mishra, Pro-Vice-Chancellor, University of Allahabad, for his inspiration and blessings.

I am extremely grateful to Professor Ramji Nagar, Head of the English Dept. and Dean, Faculty of Arts, Kashi Vidyapith, Varanasi, for his encouragement and valuable suggestions.

My sincere thanks are due to Shri K. C. Jain of the Bharatiya Vidya Prakashan for his promptness in the publication of the book.

March, 1979 **A. N. Pandey**

General Contents

तृतीयः प्रकाशः

Abbreviations

A.L E.	Adyar Library Ed. of the Daśarūpaka with the commentary Avaloka and the sub-commentary Laghuṭīkā
A.T.A.	Adyar Telugu MS. of the Daśarūpaka with the Avaloka
B.M.	Bahurūpamiśra
B.Ms.	Oriental Institute Baroda MS. of the Daśarūpaka with the Avaloka
B.P.	Bhāvaprakāśana
D.R.	Daśarūpaka
Haas	George C. O. Haas Ed. of the Daśarūpa
J.E.	Jīvānanda Ed. of the Daśarūpaka
K M.	Kāvyamīmāṁsā
M	Madras Government Oriental Manuscripts Library Transcript of Bahurūpamiśra's Daśarūpakadīpikā
N.L.R.K.	Nāṭyalakṣaṇaratnakoṣa
N.Ś.	Nāṭyaśāstra
N.S.P.	Nirṇaya Sāgara Press Ed. of the Daśarūpaka with the Avaloka
R.S.	Rasārṇavasudhākara
S.D.	Sāhityadarpaṇa
S.E.	Sudarśanāchārya Ed. of the Daśarūpaka with the Avaloka
Ś.P.	Śṛṅgāraprakāśa
T	Trivandrum Oriental Research Institute and Mss. Library Transcript of Bahurūpamiśra's Daśarūpakadīpikā

Introduction

The Daśarūpaka of Dhanañjaya is a treatise on dramaturgy, which is based on the Nāṭyaśāstra of Bharata. As the Nāṭyaśāstra is diffuse, it poses problems for those, who are slow-witted. This inspires Dhanañjaya to take up the task of presenting the Nāṭyaśāstra in a succinct form, so as to meet the requirements of the common readers.[1] Dhanañjaya emerges as a successful author, who is appreciated and quoted by a long galaxy of scholars, authors and commentators. The charm of the Daśarūpaka is enhanced by the learned commentary Avaloka of Dhanika. The commentary Avaloka combines in itself the learning of an author and the commentator's faculty of entering into the layers of a difficult text. So the Avaloka has become an essential part of the Daśarūpaka with the status of an important work. The Avaloka is abstruse, so it needed a commentary to fathom its depth and unravel the implications couched in it. Fortunately there appeared a sub-commentary named Laghuṭīkā by Bhaṭṭanṛsiṁha, which succeeds in explaining many difficult lines of the Avaloka, that have been puzzling the scholars engaged in the field. The Sāhasāṅkīya Ṭīkā and the Ṭīkā of Devapāṇi have not yet come to light, so nothing can be said about them.

The Daśarūpakadīpikā of Bahurūpamiśra, which is presented for the first time in the following pages, is a commentary on the Daśarūpaka of Dhanañjaya. The Daśarūpakadīpikā interprets the text in a clear language. In many places it comes out with brilliant comments and explains some difficult points.

Dhanañjaya and Dhanika

The Daśarūpaka was composed by Dhanañjaya in Mālavā in the tenth century A. D. Dhanañjaya belonged to the court of Muñja

१. व्याकार्थे मन्दबुद्धीनां जायते मतिविभ्रमः।
तस्यार्थस्तत्पदैस्तेन सङ्क्षिप्य क्रियतेऽञ्जसा ॥ Daśarūpaka, 1.5.

(Vākpatirāja II), who is mentioned in the last stanza of the Daśarūpaka.[1] Muñja ascended the throne in 974 A.D. and was executed by the Chālukya King Tailapa II in 995 A.D. Padmagupta, the author of the Navasāhasāṅkacharita, Dhanika and Dhanapāla enjoyed the patronage of Muñja. Dhanika has quoted his stanza in his commentary.[2] Muñja was a liberal King. A number of his stanzas are found, which speak of his liberality.[3]

That Muñja was a poet, is attested by the fact that he is depicted by Merutuṅga as versifying his plaints.[4] The Paramāra King Arjunavarmā has quoted a stanza of Muñja with the statement that it was composed by 'our ancestor Muñja, whose other name was Vākpatirāja'.[5]

Dhanañjaya was the son of Viṣṇu. In the colophon of the Avaloka Dhanika is mentioned as the son of Viṣṇu. On this ground it is said that Dhanika, the commentator on the Daśarūpaka, was probably the brother of Dhanañjaya. One of the MSS. of the Avaloka describes Dhanika as an officer of Utpalarāja—'Mahārāja-Śrīmadutpalarāja-mahāsādhyapāla.'[6] Utapalarāja was an epithet of Muñja. To Vasanta Āchārya, son of Dhanika Paṇḍita, a grant of land was

---

1. विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः ।
   आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत् ॥

   Daśarūpaka, 4.85.

2. प्रणयकुपितां दृष्ट्वा देवीं ससम्भ्रमविस्मित-
   स्त्रिभुवनगुरुर्भीत्या सद्यः प्रणामपरोऽभवत् ।
   नमितशिरसो गङ्गालोके तया चरणाहता-
   ववतु भवतस्त्र्यक्षस्यैतद् विलक्षमवस्थितम् ॥

   Avaloka on 4.58 and 4.60.

3. Haas, Introduction to the Daśarūpa, p. XXII.

4. ibid., p. XXIII.

5. यथास्मत्पूर्वजस्य वाक्पतिराजापरनाम्नो मुञ्जदेवस्य-
   'दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये ।
   उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर्यत् खिद्यते तव पदं ननु सा व्यथा मे ॥'
   Rasikasañjīvinī on the verse एकस्मिञ्शयने etc. (No. 22) of the Amaruśataka.

6. Hall, Preface to the Daśarūpaka, p. 3, notes.

decreed in 974 A.D.[1] It is possible that this Dhanika Paṇḍita is the commentator Dhanika.

Dhanika was a poet also. He has quoted in his commentary his Sanskrit and Prakrit verses.[2]

Dhanika was author of a work entitled काव्यनिर्णय. He has quoted from it.[3] The work is not available today. There is no reference to other work of Dhanika in the commentary Avaloka.

It has been said that Dhanañjaya and Dhanika were one and the same person. But some indications found in the commentary of Dhanika invalidate their identity. In his commentary on 2.22, Dhanika gives two interpretations of the term सुखार्थ,[4] without pointing out a correct one. The line of the text of Dhanañjaya, i. e., 'त्याज्यमावश्यकं न च'[5] (3.36) is very simple and clear, but Dhanika

---

1. Hall, Preface to the Daśarūpaka, p. 3, Notes.
2. See the Avaloka on 2.7, 2.11, 2.14, 2.16, 2.18, 2.33, 2.34, 2.36, 2.37, 2.39, 2.40, 2.41, 2.50, 4.3, 4.27, 4.60, 4.64, 4.69, 4.72.
3. यथावोचाम काव्यनिर्णये—

'तात्पर्यान्तरिते वाक्ये व्यञ्जकत्वं न च ध्वनिः ।
किमुक्तं स्यादश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि ॥
विषं भक्षय पूर्वोऽयं समौ तत्परतादिषु ।
प्रसज्यते प्रधानत्वाद् ध्वनित्वं केन वार्यते ॥
ध्वनिश्चेत् स्वार्थविश्रान्तं वाक्यमर्थान्तराश्रयम् ।
तत्परत्वं त्वविश्रान्तौ तत्र विश्रान्त्यसम्भवात् ॥
एतावतैव विश्रान्तिस्तात्पर्यस्येति किं कृतम् ।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ॥
भ्रम धार्मिक विश्रब्धमिति भ्रमिकृतास्पदम् ।
निर्व्यावृति कथं वाक्यं निषेधमुपसर्पति ॥
प्रतिपाद्यस्य विश्रान्तिरपेक्षा पूरणाद् यदि ।
वक्तुर्विवक्षिताप्राप्तेरविश्रान्तिर्न वा कथम् ॥
पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रता ।
वक्त्रभिप्रेततात्पर्यमतः काव्यस्य युज्यते ॥'

Avaloka on the Daśarūpaka (Adyar Library Ed,), 4.37

4. सुखार्थः अप्रयासावाप्तधनः सुखप्रयोजनो वा ।
5. आवश्यकं तु देवपितृकार्याद्यवश्यमेव क्वचित् कुर्यात् ।

draws technical meaning from it. Bahurūpamiśra has commented on the Daśarūpaka, the text and not on the commentary Avaloka. He assigns the text to Dhanañjaya : 'अथ प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्त्यादिसिद्धये विघ्नाधिराजं नमस्करोति निखिलबुधकुलमौलिमालामणिर्मुञ्जराजाधिराजवन्दितचरणयुगलो ग्रन्थकृद् धनञ्जयः।'—p. 1 of the text. This also shows that Dhanika is different from Dhanañjaya.

The Date of Bahurūpamiśra

Bahurūpamiśra quotes a number of authors and works in his commentary, prominent among them being Rāmāyaṇa (pp. 43,44 etc.), Bharata (pp. 1,3,64 etc.), Bṛhatkathā (pp. 43,44), Kālidāsa (pp. 67-68), Abhijñānaśākuntala (pp. 8, 12, 15, etc.), Vikramorvaśīya (pp. 8, 16, etc.), Mālavikāgnimitra (pp. 9, 23 etc.), Ratnāvalī (pp. 7, 12, etc.), Nāgānanda (pp. 18, 19, etc.), Priyadarśikā (pp. 73, 96, etc.), Māgha (p. 110), uttararāmacharita (pp. 8, 29), Mālatīmādhava (pp. 5, 8, etc.) Vīracharita (pp. 8, 9, etc.), Murāri (p. 70), Vāmana (p. 65), Rudraṭa (pp. 53, 54, 55, etc.) Bhaṭṭanāyaka (p. 70), Karpūramañjarī (p. 96), Bhoja (pp. 3, 6, 9, 10, 17, etc.), etc. He quotes extensively from the Śṛṅgāraprakāśa and the Bhāvaprakāśana. The date of Bhoja may be fixed in the eleventh century and that of Śāradātanaya in 1200-1300 A.D. Therefore Bahurūpamiśra may be placed after the 13th century A.D.

Bahurūpamiśra's interpretation of नानार्थरससम्भव (1.24) differs from Dhanika's. Bahurūpa interprets it by 'नानाभूतानामर्थानां रसानाञ्च हेतुर्बीजानामुत्पत्तिर्मुखसन्धिरिति'; and Dhanika by 'बीजानां समुत्पत्तिरनेकप्रयोजनस्य रसस्य हेतुर्मुखसन्धिरिति व्याख्येयम्'. In his commentary on the Pratāparudrayaśobhūṣaṇa, Kumārasvāmī seems to refer to Bahurūpamiśra in 'तत्र नानाभूतानामर्थानां प्रयोजनानां रसानाञ्च हेतुर्बीजसमुत्पत्तिर्मुखसन्धिरिति कश्चिद् व्याचष्टे' and to Dhanika in 'नानार्थशब्दस्य रसविशेषणत्वमङ्गीकृत्यानेकप्रकारप्रयोजनरसहेतुरित्यन्यः'.[1] If this reference of Kumārasvāmī is to Bahurūpamiśra, the commentator, then it may be said that Bahurūpamiśra belonged to some period between 1300-1500 A.D., because Kumārasvāmī flourished in the fifteenth century. Bahurūpamiśra is probably a

1. T. Venkatacharya, Introduction to the Daśarūpaka, p, 69.

commentator of the fourteenth century, because he shows no familiarity with the Sāhityadarpaṇa of Viśvanātha.

Bahurūpamiśra and the Śṛṅgāraprakāśa

Bahurūpamiśra reproduces discussions, ideas and illustrative verses found in the Śṛṅgāraprakāśa. He says that Bhoja included the Nātikā in the Prakaraṇa and the Nāṭaka—'भोजराजेन नाटिकायाः प्रकरणनाटकयोरन्तर्भावः सट्टकस्य च नाटिकान्तर्भाव उक्तः'—Daśarūpaka, p. 3. Professor V. Raghavan observes that Bahurūpamiśra makes a slight mistake in this case, because Bhoja says that the Nātikā is derived from the Prakaraṇa and the Nāṭaka.[1] It may be argued here that the statement of Bahurūpamiśra is meant to show that the Nātikā has no separate entity from the ten Rūpakas. Bahurūpa's statement is based on the observation of Bhoja.[2] The statement of Bhoja shows that the Nātikā is a variety of the Prakaraṇa and the Nāṭaka, because of the fact that it contains the elements of both.[3] So it may be said that the Nātikā is included in the Prakaraṇa and the Nāṭaka. Bahurūpa, therefore, does not make a mistake, so for as the issue is concerned.

While explaining the term Arthaprakṛti, Bahurūpamiśra quotes the Śṛṅgāraprakāśa. Here Bahurūpa is indebted to Bhoja for a correct interpretation of the term. (See Notes to the Daśarūpaka, p. 147).

---

1. V. Raghavan, Journal of the Oriental Research, Madras, Vol. VIII, Part IV (1934).
2. 'प्रकरणनाटकभेदो रूपकमिह नाटिका भवति ।'

   —Quoted in the Daśarūpakadīpikā, p. 3.
3. 'यानि तु नाटिकायां वक्ष्यमाणानि स्त्रीप्रायचतुरङ्कत्वादीनि लक्षणानि तै रूपकभेदं प्रत्यप्रयोजकैर्नाटिकाया नाटकप्रकरणाभ्यां भेदेऽभिधीयमाने एकद्वित्र्यादिपात्रभेदेन रूपकाणामानन्त्यप्रसङ्ग इति श्लोकार्थः । वस्तुनेतृरसादीनामेव रूपकशरीरतया प्रविष्टानां तद्भेदं प्रति प्रयोजकत्वं न पुनर्बहिष्ठानामङ्कपात्रादिसङ्ख्यानां प्रयोजकत्वम् । वस्तुनेतृरसात्मकं त्रितयं नाटिकायां प्रकरणनाटकाभ्यां समानमित्यभिप्रायः । तत्र प्रख्यातनृपनायकत्वेनोत्पाद्येतिवृत्तत्वेन श्रृङ्गाररसत्वेन च नाटकप्रकरणतुल्यत्वमुक्तं पूर्वस्मिन् ग्रन्थे ।'

   —Daśarūpakadīpikā, p, 95,

Bahurūpamiśra follows Bhoja in his treatment of the application of the subdivisions of the Sandhis.[1] He states in clear terms the principle regarding the order of the subdivisions and also their numbers, whereas Dhanika's statement[2] regarding the order of the subdivisions is confusing.[3]

Bahurūpamiśra refers to the opinion of Bhoja on Śṛṅgāra—'यथा वा केचित्—अभिमानाहङ्कारपर्यायो वासनासहायश्चित्तवृत्तिविशेषः शृङ्गारः' (Daśarūpakadīpikā. p. 135). V. Raghavan reads 'अभिमानाहङ्काराद्रिपर्यायोपासनासहायश्चित्तवृत्तिविशेषः शृङ्गारः',[4] which is not a correct reading. He writes, 'Bahurūpamiśra says that Bhoja synthesised, so to say, all the other seven Rasas in the first, viz., Śṛṅgāra, which is like water. Of it vīra and others are manifestations, even as bubble, wave, foam, etc., are several forms of the same water. This is not a correct statement of Bhoja's new Rasa theory. Many writers, ancient and modern, know that Bhoja glorified Śṛṅgāra and at once they jump to the conclusion that he was one who sought to merge all Rasas in love, the Śṛṅgāra developing from the Ratisthāyībhāva. The fact is that

---

1. 'न चैषां क्रमे विवक्षा सर्वचरमस्य करणस्य भेदात् प्रागेव लक्षणाभिधानेन स्वयमनादृतत्वाल् लक्ष्येषु च व्युत्क्रमत्वदर्शनाद् वस्तुस्वरूपपर्यालोचनेन क्रमविवक्षायां हेत्वन्तरादर्शनाच्च ।'

Daśarūpakadīpikā, p. 18.

'एवं त्रिचतुराङ्गलोपेऽपि न दोषः, प्रयोजनाधीनत्वादङ्गानाम् । प्रयोजनस्य त्रिचतुराभावेऽपि सिद्धत्वात् । तथा शृङ्गारप्रकाशे—'यावन्त्यङ्गानि पठितानि तावतामेव निबन्धः कार्य इत्येष प्रचुरप्रयागः । संविधानकवशान् न्यूनाधिकभावेनापि प्रयोग इति ।' तथा चाभियुक्ततमकालिदासादिप्रबन्धेषु त्रिचतुराद्यङ्गविलोपेऽपि शोभाप्रकर्षो दृश्यत एव । अतोऽयं लक्ष्यलक्षणानुसारी निर्णयः । यदि समस्तान्यङ्गानि निबध्येरन्, तदा भवत्येव गुणः । यद्यपि त्रिचतुराण्यपि हीयेरन्, तदापि न दोष इति ।

'···अतो वस्तुनेतृरसानुगुण्येन यानि यावन्ति यत्प्रधानानि यत्क्रमकाणि यादृशानि चाङ्गानि प्रयोजनं साधयन्ति तानि तावन्ति तत्क्रमकाणि तादृशान्यवश्यं निबन्धनीयानीति निर्णय इति ।'

—ibid., p. 38.

2. 'सर्वत्र चेहोद्देशप्रतिनिर्देशवैषम्यं क्रिमाक्रमस्याविवक्षितत्वादिति ।'

—Daśarūpaka (Adyar Lib. Ed.), p. 27.

3. T. Venkatacharya, Daśarūpaka, Journal of the University of Gauhati, 1960.
4. V, Raghavan, Journal of the Oriental Research, Madras, Vol. VIII, Part IV (1934).

Bhoja's Śṛṅgāra is different. It is the basic psychological Ego called by the three names Ahaṅkāra, Abhimāna and Śṛṅgāra and it is of this that other Rasas are held as several manifestations. The primary significance of the word Rasa itself pertains only to this prakṛti of Ahaṅkāra—Abhimāna—Śṛṅgāra and the developed (prakṛṣṭa or puṣṭa) states of Rati, etc. are only its Vikṛtis and are called Rasas only secondarily.'[1]

Here Professor V. Raghavan seems to twist the statement of Bahurūpamiśra. Bahurūpamiśra clearly states that Śṛṅgāra is an Ego (चित्तवृत्तिविशेष:), which is called by the names Abhimāna and Ahaṅkāra and that Vīra, Adbhuta, etc. are its manifestations. He does not say that Vīra, Adbhuta, etc., are manifestations of Śṛṅgāra Rasa. I think that Bahurūpamiśra is quite clear in his mind, while he quotes Bhoja.

Bahurūpamiśra follows Bhoja closely, while explaining the concepts of Sāhitya, Guṇa, Alaṅkāra and Rasa.[2] He says that the words and their meanings have twelve connecting links, that are divided into three groups, each consisting of four. They are: (1) Vṛtti, Vivakṣā, tātparya and pravibhāga, (2) vyapekṣā, sāmarthya, anvaya and ekārthībhāva, and (3) doṣahāna, guṇādāna, alaṅkārayoga and rasāviyoga.[3] Bhoja has extensively dealt with this concept of Sāhitya in the Śṛṅgāraprakāśa. Śāradātanaya has summarised his discussions in the Bhāvaprakāśana (pp. 145-152).

Bahurūpamiśra follows Bhoja[4] in the treatment of Guṇas and considers them as Alaṅkāras—तत्र युवतीरूपलावण्ययौवनादिंवदलङ्कार्यंशरीरनिविष्टा ये

1. V. Raghavan, Journal of the Oriental Research, Madras, Vol. VIII, Part IV (1934).

2. Daśarūpakadīpikā, pp. 120-125.

3. 'किं साहित्यम् ? य: शब्दार्थयो: सम्बन्ध:। स च द्वादशधा-अभिधा, विवक्षा तात्पर्यम्, प्रविभाग:, व्यपेक्षा, सामर्थ्यम्, अन्वय:, एकार्थीभाव:, दोषहानम्, गुणोपादानम्, अलङ्कार-योग:, रसावियोग: इति ।' —Śṛṅgāraprakāsa, Part, p. 3.

4. 'निर्दोषस्य च काव्यस्य शरीरवस्तुन: कामनीयकोपपत्तावयमुपाय:, यद्गुणोपादानमलङ्कार-योगश्च ।···तत्र च गुणोपादानालङ्कारयोगयोर्गुणोपादानं गरीय: ।······अयमेव च गुणा-लङ्कारयोर्विशेषो यद्गुणोपादाने नियमोऽलङ्कारयोगे तु कामचार इति गुणाश्च युवत्या: शरीरेषु त्रिविधास्तदर्थिनामादरातिशयहेतवो भवन्ति बाह्या आन्तरा वैशेषिकाश्च ।' —Ś. P., IX, p. 340.

शरीरशोभायै भवन्ति, ते गुणा: (p. 142). Following Bhoja, he gives three types of Guṇas. Bahurūpa reproduces twenty-four Guṇas of Bhoja and illustrates some of them (p. 143). The classification of Alaṅkāras by Bahurūpamiśra (p 143) is also based on that by Bhoja. According to Bhoja, everything that contributes to beauty, is Alaṅkāra. In this way, Guṇas, Alankāras and Rasas—all are Alaṅkāras.

Bhoja's concept of the Saṁsṛṣṭi is emphasised by Bahurūpamiśra : 'अयं च रसो गुणालङ्कारसंसृष्टिवशादेव कविना पोषणीय:' (p. 142). Professor V. Raghavan reads 'अयं च रसो गुणालङ्कारवशात् संसृष्टिवशादेव कविना पोषणीय:[1]' which is not a correct reading. Bhoja maintains that the Sentiment achieves a supreme position, when the Saṁsṛṣṭi of Guṇas and Alaṅkāras enriches it. Even the Sentiment cannot contribute so eminently to the beauty of a verse, as the Saṁsṛṣṭi does. Thus in Bhoja,[2] the Saṁsṛṣṭi becomes the only means to achieve रसावियोग—the non-divorce of the Sentiment from a verse.

Bahurūpamiśra follows Bhoja's classification of Alaṅkāras into three groups—vakrokti, svabhāvokti and rasokti (p. 144). Bhoja says—तत्रोपमाद्यलङ्कारप्राधान्ये वक्रोक्ति: श्लेषादिगुणप्राधान्ये स्वभावोक्ति:, विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तौ रसोक्तिरिति ।[3]

The Daśarūpakadīpikā

In the Daśarūpakadīpikā, we find some comments, which speak of the contribution of Bahurūpamiśra. Here some of them are highlighted.

---

1. V. Raghavn, journal of the Oriental Research, Madras, Vol. VIII, Part IV (1934).

2. यद्यपि प्रसङ्गतस्तत्र युक्त्या तत्र तत्रोपवर्णितस्तथापि गुणालङ्कारसन्निवेशविशेषजन्यत्वात् नानालङ्कारसंसृष्टावेव प्रकृष्टत्वं लभते । नानालङ्कारसंसृष्टिरेव प्रकृष्टं भूषणमवधार्यते । ततश्च भोजन इव मधुराम्ललवणषाडवानां वेष इव वस्त्रानुलेपनमाल्यविभूषणानां धूप इव चन्दनागरुकर्पूरसिध्रकाणां, सङ्गीत इव नृत्तवाद्यपाठ्यानां, प्रेमणीव कोपानुनयप्रसादसङ्गमसुखादीनां, गार्हस्थ्य इव धर्मार्थकाममोक्षसाधनानुष्ठानानां काव्यशरीरेऽपि रूपकादीनां संसृष्टिरेव विशेषत: स्वदमाना रसावियोगहेतुर्भवति ।'
—Ś. P., p. 431.

3. Ś. P., 438.

1. While explaining the Ārambha Avasthā (Beginning), Bahurūpamiśra says that the use of मात्र in औत्सुक्यमात्र is significant. Ārambha is a mere eagerness for obtaining the result. In प्रयत्न, etc. the existence of eagerness cannot be denied, because in the absence of eagerness, there will be extinction of ardour in the hero, causing a breakdown of his activities.[1]

2. The Development (Garbhasandhi)

In the Development, the employment of the Episode (Patākā) is optional—पताका स्यान्न वा—1.36. Bahurūpamiśra's remarks regarding the employment of the Episode is illuminating. He says that if there is no Episode, the Prospect of Success may be connected with the Germ (Bīja) or the Expansion (Bindu).[2] Śāradātanaya observes that if there is no Episode, the Germ or the Expansion should be connected with the Prospect of success or with the Development.[3] Śiṅgabhūpāla maintaining a slightly different view, advised to employ the Expansion in such a situation.[4] Dhanika has said nothing regarding this particular point.

3. Misstatement and outwitting (Abhūtāharaṇa and Adhibala)

Bahurūpamiśra points out the difference between the two—'अभूताहरणं छद्मेत्यत्रातत्त्ववचनमुक्तम्। अत्र चेष्टया वञ्चनमतिसन्धानमिति अभूताहरणाधि-

---

1. 'मात्रशब्देन चोपरितनं प्रयत्नादिकं व्यवच्छिनत्ति। प्रयत्नाद्यवस्थास्वत्यौत्सुक्यस्यानुवर्तमानत्वात्। इतरथा नायकोत्साहोत्सादप्रसङ्गात्। अतित्वरान्वित इति च प्रयत्नावस्थायामप्यौत्सुक्यमस्तीति दर्शयति।'
Daśarūpakadīpikā, p. 12

2. 'असत्यामपि पताकायां प्राप्त्याशागर्भसन्ध्योः पूर्वोक्तार्थप्रकृत्योर्यथासम्भवं निवेशः। यस्यामर्थप्रकृतौ प्राप्त्याशाभिनिविशते तया सह तस्याः समन्वयमङ्गानि द्योतयन्तीति निर्णयः।'
—ibid., p. 23.

3. 'प्राप्त्याशायामवस्थायां गर्भसन्धाविहाथवा।
अपताके निवेशः स्याद् बिन्दोर्बीजस्य वा क्वचित्॥'
—Bhāvaprakāśana, p. 210.

4. 'पताकायास्त्ववस्थानं क्वचिदस्ति न वा क्वचित्।
पताकया विहीने तु बिन्दुं वा विनिवेशयेत्॥'
—Rasārṇavasudhākara, 3.27.

बलयोर्भेदः' (p. 26). This shows that in the Abhūtāharaṇa, the deceptive factor is misstatement, whereas in the Adhibala, it is the mode of action. The fact that in the Adhibala, a particular action causes deception, is corroborated by the illustrations given by the commentators and by the remarks of the authors.[1]

4. Bahurūpamiśra's remarks on the characteristics of the hero, are striking. He says that sometimes poets project the heroes as having some qualities, which are in an exalted position. For example, Jīmūtavāhana has been described as endowed with such liberality and Rāma with such universal love.[2]

5. The Udghātya

There are two kinds of the udghātya—गूढार्थपदपर्यायमाला and प्रश्नोत्तरमाला. Bahurūpamiśra quotes 'भो वअस्स' from the Vikramorvaśiya as an example of गूढार्थपदपर्यायमाला. This example is found in the Avaloka also and there too with the mere indication 'भो वयस्य'. In such a situatiok it is not possible for us to say any thing positively as to the exact quotation of the Vikramorvaśīya. Unfortunately, the Laghuṭika aiso does not throw any light on the nature of the quotation. It is certain that the quotation belongs to the Vikramorvaśīya, because both the commentators, Dhanika and Bahurūpa, quote it so.

Dhanika and Bahurūpamiśra—both quote 'का भूषा etc.' from the Pāṇḍavānanda to illustrate प्रश्नोत्तरमाला[3] Dhanika quotes from the Mālatikāvīthī to illustrate गूढार्थपदपर्यायमाला. Bahurūpamiśra also quotes from the Mālatikāvithī, but he reads 'मालतिका–को विसमो संसारे को वा दुक्खेण तीरए तरिउं । कुसुमशरस्तरलाक्षी वियोगदुःखाम्बुधिश्चैव ॥" before 'विदूषकः—को एसो कामो,

---

1. '......इत्यन्तेन मायामयशूर्पणखाभ्यां कपटवेषधारणेन रामवामदेववञ्चनादति-बलम् ।'—Rasārṇavasudhākara, p. 137
'चेष्टयातिसन्धानं वदन्त्यधिबलं बुधाः ।'—Bhāvaprakāśana, p. 211.

2. 'एतेषां च मध्ये क्वचित् केचिद् उद्भूततया कविभिर्वर्ण्यन्ते । यथा जीमूतवाहनादौ त्यागादयः, रामादौ लोकानुरागादयः ।'—Daśarūpakadīpikā, p. 46.

3. Daśarūpaka (Adyar Librany Ed.), p. 141.
Daśarūpakadīpikā, p. 85

etc.'[1]. Bahurūpamiśra does not say what kind of उद्घात्य is illustrated.

A perusal of the quotation reveals that Bahurūpamiśra gives the quotation with a view to explaining both kinds of उद्घात्य. 'को विसमो, etc.' is an illustration of प्रश्नोत्तरमाला and the remaining portion is that of गूढार्थपदपर्यायमाला.

6. The Nṛtyachāraka

Bahurūpamiśra quotes the play Nṛtyachāraka as an example of the समग्र type. This is also found in the Bhāvaprakāśana—'नाटकं नृत्तचाराख्यं तत्समग्रमितीरितम्'—p. 241. The Baroda edition of t e Bhāvaprakāśana gives the reading नृत्तवार in the footnote. M. Ramakrishnakavi gives the reading नृत्तपार and says that Śāradātanaya and Bahurūpamiśra both mention the play as नृत्तपार[2]. But none of them quotes it as नृत्तपार. Abhinavagupta cites the वासवदत्ता नाट्यधारा and explains it as a long succession or a series of play within play. On this ground, Professor V. Raghavan suggests that the correct reading must be नृत्यधारा[3]. The वासवदत्ता नाट्यधारा is cited as an example of नाट्यायित. The नाट्यधारा quoted by Abhinavagupta is different from the नृत्यचारक, which is a play of the समग्र type. Therefore the conjecture of Professor Raghavan has no substantial ground to stand on. The mention of the नृत्यचारक or the नृत्तचार by Bahurūpamiśra or Śāradātanaya clearly explains the position that this is the title of the play and not a type of the play.

Bahurūpamiśra quotes Subandhu, who also observes that the Nāṭaka has five kinds—पूर्ण, प्रशान्त, भास्वर, ललित and समग्र[4], Bahurūpamiśra quotes Veṇīsaṁhāra and the Kṛtyārāvaṇa as examples of the पूर्ण

1. Daśarupakadipika, p. 85

2. V. Raghavan, Jourual of the Oriental Research, Madras, Vol. VIII, Part IV (1934).

3. Ibid.

4. पूर्णश्चैव प्रशान्तश्च भास्वरं ललितं तथा ।
समग्रमिति विज्ञेया नाटके पञ्चजातयः ॥
—Daśarupakadīpikā, p. 93.

type, Svapnavāsavadatta as an example of the प्रशान्त type, Anargharāghava, Bālarāmāyaṇa, etc. as examples of the भास्वर type, Mālavikāgnimitra, Vikramorvaśīya, etc. as examples of the ललित type and Nṛtyachāraka as an example of the समग्र type.

7. The commentary of Baburūpamiśra is enriched with illustrations. He carefully interprets almost all the points stated in the Kārikās. Here are some excerpts from the commentary :—

(a) 'शुद्धं केवलमेकमेवेत्यर्थः । एकानेकानुबन्धीति । एकेन धर्मार्थकामानामनेकेनानेकाभ्यां तेषामेवान्यतमाभ्यामनुबन्धो यस्य तदेकानेकानुबन्धीति । एतदुक्तं भवति । क्वचिद् धर्म एव फलम्, क्वचिदर्थानुबन्धी, क्वचित् कामानुबन्धी, क्वचिदर्थकामानुबन्धी । क्वचिदर्थ एव फलम्, क्वचित्कामानुबन्धी, क्वचित् धर्मानुबन्धी, क्वचिद् धर्मकामानुबन्धी । क्वचित् काम एव फलम्, क्वचित् धर्मानुबन्धी, क्वचिदर्थानुबन्धो, क्वचिद् धर्मार्थानुबन्धी । तदेवं द्वादश फलभेदा इति ।—p. 8.

(b) 'एषु विशेषलक्षणेषु ये सामान्यगुणाः पुनरुपात्तास्ते तत्तन्नायकभेदेष्ववश्यम्भाविन इत्यनुसन्धेयम् । ये च सामान्यगुणविरोधेन विशेषलक्षणेषु मायाच्छद्मादय उक्तास्तद्बलेन तत्तद्विशेषेषु विरोधिभिः सामान्यगुणा बाधितव्या इति ।—p. 46.

(c) 'प्रधानरसगोचरोऽयं प्रतिषेधः । अतो नाटकेऽप्यस्या अप्रधानतया निबन्धे न दोषः । यथा मालविकाग्निमित्रेऽग्निमित्रस्येरावतीति । केचित् प्राहुः—न क्वापि प्रहसनादिव्यतिरिक्ते शृङ्गाररसनिष्यन्दिनि प्रकरणादौ गणिकाया निबन्धः कार्यः, गुणवत्यपि नायके तस्या अनुरागाभावात् ।'—p. 54.

(d) 'प्रकृत्यवस्थासन्ध्यर्थोपक्षेपकपञ्चकवृत्तिप्रवृत्तिपताकास्थानकचतुष्कसन्ध्यङ्गचतुःषष्टिषट्त्रिंशल्लक्षणाङ्गगद्यपद्यमिश्रसर्वभाषाभ्युपेतो देवक्षत्रियान्यतरधीरोदात्तनायको वीरशृङ्गारान्यतराङ्गिरस उपमारूपककाव्यार्थलङ्कारशोभित इतिहासादिप्रसिद्धाधिकारिकोऽनधिकान्यूनदशपञ्चाङ्को रूपकविशेषो नाटकमिति । तत्र पञ्चाङ्कं यथा विक्रमोर्वशीयादि । षडङ्कं यथा रामाभ्युदयादि, सप्ताङ्कमभिज्ञानशाकुन्तलादि, अष्टाङ्कं नलविजयादि, नवाङ्कं देवीपरिणयादि, दशाङ्कं बालरामायणादि । रूपकाणां च सर्वेषां नाटकं प्रधानम् ।'—pp. 92-93.

(e) 'तत्र सात्त्विकव्यभिचारिवर्गयोः परस्परं विभावानुभावत्वे द्रष्टव्ये । यद्यप्यन्ये चित्तवृत्तिविशेषा बहवः सन्ति भावास्तेषां रसपोषौपयिकानां व्यभिचारिष्वेव यथाकथञ्चिदन्तर्भावो द्रष्टव्यः । येऽपि चैषु भावेषु परस्परप्रत्यासन्नरूपास्ते विभाव-

तोऽनुभावतश्च स्फुटभेदा इत्यवगन्तव्यम् । स्थायिष्वपीयमेव प्रक्रिया द्रष्टव्या । किञ्च विभावानुभावसात्त्विकादीनां तत्तत्स्थायिभावप्रतिनियतानामेव निबन्धनात् तत्तद्भावविशेषः प्रत्याययितव्यः । इतरथा सामान्यमात्रनिबन्धने संशयात् । एवं स्थिते विभावादिवैधुर्येण निबन्धे दोषः स्यात् । —p. 118.

The missing Kārikā

The following Kārikā is missing in all the previous editions except in that published by the Adyar Library—

स्वाधीनपतिकोत्कण्ठावाससज्जाभिसारणैः ।
रम्यं सानुभवेत्तत्र हृष्टावस्थाचतुष्टयम् ॥'

—Prakāśa IV, Kārikā 71.

The Adyar Library edition of the Daśarūpaka reads the Kārikā as follows :—

'स्वाधीनपतिकोत्कात्ववाससज्जाभिसारणैः ।
रम्यं सानुभवेत्तत्र हृष्टावस्थाचतुष्टयम् ॥'

The Adyar Library edition reads this Kārikā after the Kārikā 'मृते त्वन्यत्र, etc.' (Kārikā 67), whereas Bahurūpamiśra reads it after the Kārikā 'चेष्टास्तत्र प्रवर्तन्ते, etc.' (Kārikā 70). T. Venkatacharya says that the Kārikās 'चेष्टास्तत्र प्रवर्तन्ते etc.' and 'रमयेत्, etc.' are definitely in the context of the सम्भोगश्रृंगार, and therefore the reference by Bahurūpamiśra of the four Avasthās does not seem to be applicable here. T. Venkatacharya says that the four Avasthās-हृष्टावस्थाचतुष्टयम्-have reference to those of स्वाधीनपतिका, विरहोत्कण्ठा, वासकसज्जा and अभिसारिका, that the Kārikā must be placed before प्रणयायोगयोरुत्का, etc. and that it must be connected with the विप्रलम्भश्रृङ्गार and not with the सम्भोगश्रृंगार. Bahurūpamiśra, on the other hand, connects this Kārikā with the सम्भोगश्रृंगार and places it after the Kārikā चेष्टास्तत्र प्रवर्तन्ते, etc. He explains it in the following manner—

'दशानामभिलाषाद्यवस्थानां मध्ये यदाद्यं हृष्टावस्थाचतुष्टयं (तत्) दर्शनदशाभावितसम्भोगश्रृङ्गारे नायिकाया भवतीति ।'—p. 135.

From his comment, it is clear that Bahurūpamiśra connects the first four of the ten Avasthās, viz. abhilāṣa, chintā smṛti and

guṇakathana, with the सम्भोगश्रृंगार. Bahurūpamiśra leaves no room for misunderstanding in this context.

Present Edition of the Daśarūpaka

For this edition of the Daśarūpaka with the Daśarūpakadīpikā of Bahurūpamiśra, I have made use of the following MSS.—

1, Transcripts obtained from the Government Oriental MSS. Library Madras : (a) A Transcript of the Daśarūpaka with the Daśarūpakadīpikā—R. 3670, Paper 74 Pages, 1100 Granthas; (b) A Transcript of the Daśarūpaka with the Daśarūpakadīpikā—R. 4188, Paper, 108 Pages, 1400 Granthas. The MSS. R. 3670 breaks off in the middle of the Second Prakāśa—

'अथ लाटी—मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा। उचितविशेषणपूरितन्यासा भवेल्लाटी॥ भोजराजेन त्वनति ....' p. 67 of the text; and the MS. R. 4188 begins with 'अथ लाटी—मृदुपदसमाससुभगा, ete.' and runs up to the end.

2 Tarnscript obtained from the Oriental Research Institute and MSS. Library, University of Kerala, Trivandrum : No. 1658, Granthas 3200.

Both the MSS. are corrupt. In many places, I have tried my best to construct the text, deriving help from the sources dealing with the same topics.

श्रीः

श्रीधनञ्जयविरचितं

दशरूपकम्

बहुरूपमिश्रकृता दशरूपकव्याख्या

—: ** :—

प्रथमः प्रकाशः

अथ प्रारिप्सितस्य[1] प्रकरणस्याविघ्नपरिसमाप्त्यादिसिद्धये विघ्नाधिराजं नमस्करोति निखिलबुधकुलमौलिमालामणिर्मुञ्जराजाधिराजवन्दितचरणयुगलो ग्रन्थकृद् धनञ्जयः —

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ॥ १ ॥

यथा घनस्य मेघस्य ध्वानो नीलकण्ठस्य मयूरस्य ताण्डवे पुष्करायते तथा नीलकण्ठस्य परमेश्वरस्य ताण्डवे उद्धतनृत्ते मदाभोगेन मदपरिपूर्णतया मदध्वानो निबिडध्वनिर्यत्कण्ठः पुष्करायते मृदङ्गवदाचरति तस्मै नम इति । अत्र खण्डश्लेषाक्षिप्यमाणोपमाच्छायालङ्कारः ।

अथ रूपकाणां प्रतिपाद्यतां [2]सूचयन्नाट्यवेदप्रयोक्तारं भरतमभिमतदैवतं च विष्णुं नमस्करोति—

दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमः सर्वविदे तस्मै विष्णवे भरताय च ॥ २ ॥

एकत्र मत्स्यादीनां दशानां रूपाणामनुकारेण प्रतिमारूपेण अन्यत्र नाटकादीनां दशरूपाणां रसान्तरात्मना भावका ध्यातारो रसिकाश्चेति ।

श्रोतृजनप्रोत्साहनाय प्रकरणविशेषस्य सरस्वतीप्रसादलब्धत्वं महाफलत्वं चाह—

कस्यचिदेव कदाचिद् दयया विषयं सरस्वती विदुषः ।
घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम् ॥ ३ ॥

कस्यचिदेव विदुषः सरस्वती तं कमपि विषयं घटयति[3] येनान्यो जनो वैदग्धीं व्रजतीत्यन्वयः । दशरूपकाणि प्रकरणविषय इति सूचितम् । किं तत्र क्रियत इत्यपेक्षायां

---

1. अथारिप्सितस्य—T. 2. सूचयन्नाह—T.
3. घटयतीत्यन्वयः । येनान्यो जनो वैदग्धीं (वैदग्ध्यं—T) व्रजति ।—M, T.

विस्तरेण लक्षण[1]करणस्याशक्यत्वाम्नाट्यानां लक्षणसङ्क्षेपः क्रियत इत्याह—

उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिञ्चि—
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किन्तु किञ्चित् प्रगुणरचनया लक्षणं सङ्क्षिपामि ॥४॥

प्रयोगोऽभिनयादिप्रकारः, ताण्डवमारभटीनृत्तम्, लास्यं कौशिकानृत्तम्। अस्य नाट्यवेदस्य प्रतिपदं प्रतिविषयं लक्षणं कर्तुमशक्यम्। अतो नाट्यानां लक्षणं सङ्क्षिपामि। अनेन[2] स्वस्याभिधेयत्ववचनं[3] सूचितमिति।

ननु[4] सङ्क्षेपस्य विस्तरे विद्यमानत्वान्न प्रयोजनवान् लक्षणसङ्क्षेप इत्याशङ्क्याह—

व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः।
[5]तस्यार्थस्तत्पदैस्तेन सङ्क्षिप्य क्रियतेऽञ्जसा ॥ ५ ॥

व्याकीर्णे[6] विस्तीर्णे मन्दबुद्धीनां मतिविभ्रमो[7] बुद्धिव्यामोहो भवति, स मा भूदिति प्रयोजनवान् लक्षणसङ्क्षेप इति। तदर्थश्च[8] तत्पदैस्तत्रत्यैरेव पदैः सङ्क्षिप्याञ्जसा क्रियते। ततः समस्यमाने लक्षणे न बुद्धिव्यामोहो भवति। न च सङ्क्षेपात्मकत्वाद् ग्रन्थस्यासमग्रत्वमिति तदिदमुक्तं तस्यार्थस्तत्पदैरञ्जसेति[9]। सूचितं चैतदाञ्जस्यं प्रगुणरचनयेति।

ननु दशरूपकेऽप्यपीतिहासादिवत्साधारणं[10] व्युत्पत्तिमात्रमेव फलं स्यात्। तच्चा-पुरुषार्थात्मकत्वान्मन्दं फलम्। सुलभं चैतदितिहासादिषु। यच्च वैदग्ध्यं फलमित्युक्तं तदपि मन्दमेव साक्षादफलत्वाच्च वैदग्ध्यस्य। अतो निष्प्रयोजनमेव रूपकाणां लक्षणकरणमिति पुनरपि तदवस्थमेवानारम्भणीयत्वम्। तत्राह—

आनन्दनिष्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः
योऽपीतिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय ॥ ६ ॥

सत्यमिदं न तु[11] व्युत्पत्तिमात्रमेव फलं साक्षात्पुरुषार्थरूपस्य सकलरसिकस्यानुभव-सिद्धस्य निरतिशयानन्दसन्दोहात्मनस्तुरीयावस्थासुखस्पर्धिन [12]इदमित्यनिर्वचनीयस्य फलस्य विद्यमानत्वात्। तस्मै नम इतिच्छेकवचनेनोपालभते[13]। एवं समाप्तारम्भं प्रकरणमारभते। प्रकरणमिति शास्त्रैकदेशानुस्यूतम्। यथाहुः —

1. लक्षणविषय० —T. 2. अतः—T. 3. स्वस्याविधेयवचनत्वं—M, स्वस्या-विधेयत्ववचनं—T. 4 T omits ननु. 5. यस्या०—T. 6. आकीर्णे—M. 7. मतिभ्रमो—T. 8. तदर्थं च—M. 9.…ञ्जसेति सूचितम्—T. 10.……वदसाधारणं—M. 11. M omits तु. 12. इदमित्यमि० —M. 13. वचनोपा०—M.

'शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥' इति ।

शास्त्रं च नाट्यवेदः[1] । सोऽपि रसभावाभिनय[2]स्वरगानवाद्यनाट्यसिद्धिप्रभृतिभिरुपेतः[3] । तत्र नाट्यलक्षणस्य क्रियमाणत्वादिदं प्रकरणमित्युच्यते । उक्तञ्च पूर्वं[4] नाट्यानां किन्त्वित्यादि । एवंभूतस्यास्य प्रकरणस्यारम्भः क्रियते ।

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपाद् दशधैव रसाश्रयम् ॥ ७ ॥

नाट्यानां लक्षणमिदं सामान्यम् । विशेषतस्तु वक्ष्यति । रामादिनायकानामवस्था धीरोदात्तत्वादयो दक्षिणादयश्च । तासां नटेन यदनुकरणं नटस्य प्रेक्षकबुद्ध्या रामादितादात्म्यापत्तिः तन्नाट्यमिति । रूपं रूपकमिति च नाट्यं व्यपदिश्यते । 'दशरूपानुकारेणे'ति, 'आनन्दनिष्यन्दिषु रूपकेष्वि'ति च । तत्र किमालम्बनमित्यपेक्षायां तत्प्रवृत्तिनिमित्तं[5] व्युत्पादयति 'रूपं दृश्यतयोच्यत[6]' इत्यादिना । दृश्यानि हि[7] नीलपीतादीनि रूपशब्दवाच्यतया प्रसिद्धानि । एवं नाट्यान्यपि प्रेक्षकादिभिर्दृश्यत्वाद् रूपपदाभिधानीयत्वं लभन्त इति । नटे रामाद्यवस्थासमारोपाद्रूपकमिति[8] चोच्यते । यथा मुखकमलमित्यत्र मुखे कमल[9]त्वारोपाद्रूपकमिति प्रसिद्धिः । रूपकाणां न्यूनाधिकसङ्ख्याव्यवच्छेदाय तानि स्वनामभिरुद्दिशन् सङ्ख्यामवतारयति दशधैव रसाश्रयम्—

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥ ८ ॥

रस आश्रयो यस्य तद्रसाश्रयम् । वाक्यार्थाभिनयोऽयं प्रकीर्तितो नाटकादिभेदेन द्वादशविधः [द्वादशविधः[10]] स इत्युक्तत्वात् । तोटकादेरपि लक्षणान्तरकारैर्लक्षणान्तरेषु रसाश्रयत्वेनोपदिष्टत्वाच्चेति[11] कथं दशधैवेत्युच्यते[12] । सत्यमेवम् । तथापि नाटिकायाः प्रकरणनाटकयोरन्तर्भावात् सट्टकस्य च नाटिकान्तर्भावात् तोटकस्यापि विक्रमोर्वशीयादेर्नाटिकान्तर्भावात् दशधैवेत्यवधारणं कृतमिति । तथा[13] च नाटिकायाः प्रकरणनाटकयोरन्तर्भावं स्वयमेव तृतीये प्रकाशे वक्ष्यति । भोजराजेन नाटिकायाः प्रकरणनाटकयोरन्तर्भावः सट्टकस्य च नाटिकान्तर्भाव उक्तः । यथा प्रबन्धस्थितियाथार्थ्यनिर्णये—

'इति दशरूपकमेतद् भरतादिमतानुसारतो गदितम् ।
प्रकरणनाटकभेदो दशरूपकमिति ह नाटिका भवति ॥' इति ।

---

1. भेदः—M. 2. 'भिनयस्वर' is missing in M. 3. प्रसिद्धि०—M. 4. M omits पूर्वं नाट्यानां. 5. प्रसङ्गात्प्रवृत्ति०—M. 6. रूपं दृश्यतयेत्यादिना—M. 7. M omits हि. 8. रामाद्यवस्थायाः समारोपो रूपकमिति—T. 9. कमलत्वारोपो रूपकमिति—T. 10. Not in M, T. 11. ...त्वात्—M. 12. दशधैवोच्यते —M. 13. तथैव —M.

'स सट्टको नाटिकाप्रतिम' इति चेति ।

तथा तोटकस्यापि नखकुट्टादिभिर्नाटिकान्तर्भावेनैव लक्षणमुक्तम्—

'दिव्यमानुषसंयोग[1]स्तोटकं नाटकानुगमि'ति नखकुट्टः ।

'नवाष्टसप्तपञ्चाङ्कं दिव्यमानुषसङ्गमम् ।
तोटकं नाम तत्प्राहुर्भेदं नाटकसम्भवम् ॥' इत्याचार्याः ।

न च डोम्बी[2]श्रीगदितादीनामपि रसाश्रयत्वेनोपदिष्टत्वाद् दशधैवेत्यवधारणानुपपत्तिरिति वाच्यम् । तेषां भावाश्रयत्वेनान्यत्वादित्याह—

अन्यद् भावाश्रयं नृत्यं

रसाश्रयान्नाट्याद् भावाश्रयत्वेन नृत्यमन्यदेवेति । नृत्यभेदाश्च डोम्बीश्रीगदितादयो न नाट्यभेदा इति । एतदुक्तं भवति—यद्रसाश्रयं तन्नाटकादिषु दशरूपेष्वन्तर्भवति । यच्च नान्तर्भवति डोम्बीश्रीगदितादि तत्सर्वं भावाश्रयमिति दशधैवेत्यवधारणोपपत्तिरिति । प्रसङ्गान्नृत्तं व्युत्पादयति—

नृत्तं तालयाश्रयम् ।

तालश्चञ्चत्पुटादिः, लयो द्रुतादिः । तन्मात्रापेक्षोऽङ्गविक्षेपो नृतमिति । नृत्यनृत्तयोः संज्ञान्तरमाह—

आद्यं पदार्थाभिनयो मार्गो देशी तथा परम् ॥ ९ ॥

पदार्थभूतभावाश्रयत्वात् पदार्थाभिनयात्मकं यन्नृत्यं स्यादादावुक्तं तन्मार्ग इत्युच्यते । अपरमपि नृत्तं देशीति[3] । द्वयोरपि द्वैविध्यमाह—

मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः ।
लास्यताण्डवरूपेण

तद्द्वयमित्यनन्तरोक्तं नृत्यनृत्तात्मकं द्वयमित्यर्थः । सुकुमारं[4] द्वयमपि लास्यमुद्धतं द्वयमपि[5] ताण्डवमिति प्रसङ्गोक्तस्य द्वयस्य प्रकृतनाटकाद्युपयोगं[6] दर्शयति—

नाटकाद्युपकारकम् ॥ १० ॥

पूर्वरङ्गाद्यनुप्रवेशेन नाटकादावुपयोगो द्रष्टव्य इति ।

एवं तावत्सामान्यतो लक्षितं नाट्यम् । प्रसङ्गोक्तयोश्च नृत्यनृत्तयोर्नाटकादावुपयोगः ।

इदानीं स्वनामभिरुद्दिष्टानां दशानां रूपकाणामसाधारणं लक्षणं विवक्षन्[7] तेषां भेदं तावदाह—

वस्तु नेता रसस्तेषां भेदकः

---

1. संयोगस्—missing in M. 2. M omits डोम्बी. 3. देशिकी—T.
4. सुकुमारद्वयमपि—T. 5. उद्धतद्वयमपि—T. 6. ···द्युपकारं—T. 7. ववतुं—T.

वस्त्वितिवृत्तं कथाशरीरमित्यर्थः । तथा च[1] काव्यानुशासने वामनाचार्येण संस्कारपरिच्छेद उक्तम्--

'अनुक्रमेण कथिता वस्तु वाक्यार्थमालिका' इति ।

एतदेवात्र वस्तुनः सामान्यलक्षणं मतानुमतमिति । नेता नायकः, रसः शृङ्गारादिः । तेषां[2] भेदाद्रूपकाणां परस्परभेद[3] इति ।

तत्र नेतारं वक्ष्यति द्वितीये प्रकाशे । रसः शृङ्गारादिः तुरीये । तृतीये चामीषां भेदकत्वम् । अस्मिन् प्रकाशे वस्तुविचारं करिष्यन् वस्तुनो द्वैविध्यं तावदाह--

वस्तु च द्विधा ।

कथमित्याह—

तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः ॥ ११ ॥

आधिकारिकं प्रासङ्गिकं चेति द्विधा भिद्यते । आधिकारिकं च मुख्यं भवति । प्रासङ्गिकं चाङ्गं भवतीत्यर्थः । तत्राधिकारिकं तावल्लक्षयति—

अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः ।
तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥ १२ ॥

रामादीनां नायकानां यो वृत्तान्तः सोऽत्राधिकारिकमित्यर्थः ।

प्रासङ्गिकं लक्षयति--

प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः ।

यस्योपनायकादिभूतसुग्रीवादिवृत्तान्तस्य नायकप्रयोजनोद्देशप्रवृत्तस्य तत्प्रयोजननान्तरीयकतया सुग्रीवादेरपि प्रयोजनसिद्धिस्तत्प्रासङ्गिकमित्यर्थः । एतदुक्तं[4] भवति—प्रबन्धव्यापी त्रिवर्गफलान्तो नायकनायिकयोर्वृत्तान्त आधिकारिकः । तदर्थ आनुषङ्गिक स्वप्रयोजनश्च सुग्रीवादिवृत्तान्तः[5]प्रासङ्गिक इति । आधिकारिकस्य प्रबन्धव्यापित्वमुक्तम् । प्रासङ्गिकस्यापि व्यापिता चेति द्वे विधे स्त इत्याह—

सानुबन्धं पताकाख्यं प्रकरीति प्रदेशभाक् ॥ १३ ॥

सानुबन्धस्य पताकेति नाम । प्रदेशभाजः प्रकरीति नाम । फलोद्देशप्रवृत्तस्य नायकव्यापारस्य उपनायकवृत्तान्तः साधकतमत्वेन सहायीभवन् स्वस्यापि फलं साधयति[6] । यथा मालतीमाधवे मकरन्दवृत्तान्तः, अनर्घराघवे सुग्रीवादिवृत्तान्तश्च । निरनुबन्धकं तदनुग्राहकमात्रं यदितिवृत्तं सा प्रकरीति । यथा तत्रैव जटायुगुहादिवृत्तान्तः । प्रकर्याश्च स्वार्थसिद्धिर्न नियमेन भवति । श्रमणाजटायुवृत्तान्तादेः स्वप्रयोजनाभावात् । तेन स्वार्थो

1. T omits च. 2. एतेषां--T. 3. भेदक—M. 4. तदुक्तं—M.
5. ...वृत्तान्त इति—T. 6. M reads सा पताकेति after साधयति.

यस्य प्रसङ्गत इति प्रकर्याश्च स्वप्रयोजनसिद्धिरनियमाभिप्रायेणेति व्याख्येयम् । तथा नाटकप्रकाशे भोजदेवेन सहायविशेषे[1] साधकतमत्वेन करणभूते वर्तमान आरम्भः पताकेत्युच्यते ।

'यस्या[2] वृत्तं परार्थं स्यात् प्रधानस्योपकारकम् ।
तत्सम्बन्धाच्च फलवत्सा पताकेति कीर्तिता ॥'

सहायविशेषे असाधकतमत्वात् करणाभासभूते[3] वर्तमान आरम्भः प्रकरीत्युच्यते । पताकेव ह्यफलवती अनुबन्धविहीना प्रकरी चेति । उक्तं च—

'फलं प्रकल्प्यते यस्याः परार्थायैव केवलम् ।
अनुबन्धविहीनां तां प्रकरीति विनिर्दिशेत् ॥' इति ।

यथा रथस्था पताका रथिनो रथस्य च शोभां जनयति, एवमियमपीति पताकेत्युच्यते । यथा पुष्पादीनां लघुः प्रकरः प्रकरी सा गृहवेदिकादेः शोभां जनयति करोति, एवमियमपीति प्रकरीत्युच्यते । यथा च नाटकप्रकाशे—'यथा हि[4] पताका कस्यचिच्चिह्नरूपेण शोभायै भवति[5], स्वस्यापि प्रकर्षशोभायै भवति, एवमितिवृत्तेषु यदुपनायकचरितं प्रधानस्यात्मनश्च शोभाप्रकर्षाय जायते तदितिवृत्तं पताकेत्युच्यते, इति । लघुः[6] प्रकरः प्रकरीत्युच्यते । स तु पुष्पादीनामेव स्यात् । यथा हि पुष्पप्रकरः परार्थ एवापवरकादेः[7] शयनस्थानस्यान्यस्य वा शोभायै भवति एवमियं महाप्रबन्धस्य य[8] ऋतुवर्णनादिरन्यो वा कोऽपि तद्विधो व्यापारः सा प्रकरीत्युच्यत इति । एवं तावत्पताका प्रकरी च व्युत्पादिता । अथ पताकाप्रकर्यादिवस्तुनः सूचकोपायत्वात् पताकास्थानं व्युत्पादयति—

प्रस्तुतागन्तुभावस्य वस्तुनो व्यक्तिसूचकम् ।
पताकास्थानकं तुल्यसंविधानविशेषणम् ॥ १४ ॥

प्रस्तुतागन्तुभावस्येति । तत्कालविशेषणं यदा सूच्यते तदा प्रस्तुतागन्तुभावस्येति । एतदुक्तं भवति । एष्यदवस्थस्य वस्तुनो यदा[9]गन्तुकेन भावेनाभिव्यक्तिकारकं तत्[10] पताकास्थानकमिति । तथोक्तं भोजेन—

'यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानकं तु तत् ॥' इति ।

तद् द्विविधं तुल्यसंविधानं तुल्यविशेषणं चेति । तुल्य[11]संविधानमन्योक्तिरूपं तुल्यविशेषणं समासोक्तिरूपम् । यदत्र कैश्चिच्चातुर्विध्यमुक्तम्—

---

1. सहायविशेषसाधकतमत्वेन—T. 2. तस्या—M. 3. करणाभावभूते—M. 4. M omits हि. 5. भवन्ती—T. 6. लघुरपि—T. 7. प्रावारकादेः—T. 8. T omits य. 9. T omits यद. 10. T omits तत्. 11. T reads यदा before तुल्य॰.

'सहसैवार्थसम्पत्तिर्गुणवत्युपकारकम् ।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥
वचः सातिशयं श्लिष्टं काव्यबन्धसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्तितम् ॥
अर्थोपक्षेपकं यत्र लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते[1] ॥
द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
उपन्याससुयुक्तश्च[2] तच्चतुर्थमुदाहृतम् ॥' इति ।

तत्र[3] द्व्यर्थवचनविन्यासरूपं चतुर्थं तुल्यविशेषणशब्देनोक्तम्[4] । अन्येषां त्रयाणां तु तुल्यसंविधानशब्देन सङ्ग्रह इति । अत एष्यदवस्थस्य वस्तुनो यदन्यार्थाभिधानद्वारेणास्य तस्य चाभिधानद्वारेण सूचनं[5] तत् पताकास्थानकमित्युक्तम् ।

तुल्यविशेषणं यथा रत्नावल्यां द्वितीयेऽङ्के—

'उद्दामोत्कलिकां विपाण्डुरमुखीं प्रारभ्य जृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युतिमुखं देव्याः करिष्याम्यहम् ॥'

इति रत्नावलीलतयोः समासोक्तिद्वारेण एष्यदवस्थस्य सागरिकादर्शनादेर्वत्सराजेन[6] सूचनात् तुल्यविशेषणं पताकास्थानकमिति ।

तुल्यसंविधानं यथा मुद्राराक्षसे शाङ्र्गरवं सिद्धार्थकं च सन्दिश्यानन्तरं "चाणक्यः—(चिन्तां नाटयन् आत्मगतम्) अपि नाम दुरात्मा राक्षसो गृह्येत ? सिद्धार्थकः—अअं गहिदो [अयं गृहीतः] । चाणक्यः—(सहर्षम्) आ हन्त स दुरात्मा राक्षसो गृहीतः । (प्रकाशम्) कोऽयं गृहीतः ? सिद्धार्थकः—णं सन्देसो ता सुहं गमिस्सं कज्जसिद्धिए । [ननु सन्देशः । तत्सुखं गमिष्यामि कार्यसिद्धये ।]' इति ।

गृहीतः सन्देश इत्यन्यार्थाभिधानेन राक्षसग्रहणसूचनात् तुल्यसंविधानं[7] पताकास्थानकमिति ।

पूर्वं तावदाधिकारिकं पताका प्रकरी चेति वस्तुत्रैविध्यमुपपादितम् । इदानीं त्रिप्रकारस्यापि वस्तुनस्त्रैविध्यमाह—

प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधाऽपि तत् त्रिधा ।

---

1. मिष्यते—M. 2. उपन्याससुयुक्तं (यत्)—M. 3. T omits तत्र.
4. तुल्यविशेषणं येनोक्तम्—M, T. 5. T reads वा before सूचनं.
6. सागरिकादर्शनानुरागात्—M. 7. तुल्यसंविधानकपताकास्थानकमिति—M.

प्रख्यातादिकं यथाक्रमं व्युत्पादयति—

प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम् ॥१५॥
मिश्रं च सङ्करात्

एवमाधिकारिकप्रकरीपताकानां प्रत्येकं प्रख्यातोत्पाद्यमिश्रत्वेन त्रैविध्यात् वस्तुनो नवविधत्व[1]मुक्तमिति। तत्र प्रख्यातं यथा वीरचरितादिः। उत्पाद्यं यथा मालतीमाधवादिः। मिश्रत्वं यथा उत्तररामचरितादिः। ननु दिव्येतिवृत्तं मर्त्येतिवृत्तमुभयेतिवृत्तमित्यपि वस्तुभेदो दृश्यते। तत्र दिव्येतिवृत्तं यथा नागानन्दे विद्याधरचक्रवर्तिनो जीमूतवाहनस्य। मर्त्येतिवृत्तं यथानर्घराघवादिषु रामादेः। उभयेतिवृत्तं यथा विक्रमोर्वशीयादिषु नायिकाया देवयुवतित्वात्। तत्किं तेऽपि भेदा न व्युत्पाद्यन्ते अत आह—

नान्तो दिव्यमर्त्यादिभेदतः।

दिव्यमर्त्यादिभेदत इतिवृत्तस्य नान्तः पर्यवसानं नास्तीत्यर्थः। एतदुक्तं भवति—अनन्तास्तादृशा भेदा अतो न व्युत्पाद्यन्ते। लक्ष्येषु स्वयमेव ऊहनीया इति। अनन्तं हीतिवृत्तं मर्त्येष्वपि दृश्यते। यथा मालतीमाधवे द्विजेतिवृत्तान्तत्वम्। यथा शाकुन्तले[2] क्षत्रियेतिवृत्तान्तत्वम्। एवमन्येऽपि दिव्येतिवृत्तान्ता[3] अवान्तरभेदाश्च दर्शयितव्याः। एतेष्वपि पुनस्तादृशा[4] धीरोदात्तत्वादीतिवृत्तभेदा भवन्ति। तादृशाश्च भेदा आदिशब्देनोक्ताः।

अधिकारः फलस्वाम्यमित्यत्राधिकारिकेतिवृत्तस्य फलपर्यन्तत्वमुक्तम्। तत्र किं तत्फलं येनाधिकारिकप्रासङ्गिकेतिवृत्तयोः फलवत्ता तदाह—

कार्यं त्रिवर्गस्

कार्यं फलमित्यर्थः। त्रिवर्गो धर्मार्थकामाः। फलभेदं व्युत्पादयति—

तच्छुद्धमेकानेकानुबन्धि च ॥ १६ ॥

शुद्धं केवलमेकमेवेत्यर्थः। एकानेकानुबन्धीति। एकेन धर्मार्थकामानामनेकेनानेकाभ्या तेषामेवान्यतमाभ्यामनुबन्धो यस्य तदेकानेकानुबन्धीति। एतदुक्तं भवति। क्वचिद् धर्म एव फलम्, क्वचिदर्थानुबन्धी, क्वचित् कामानुबन्धी, क्वचिदर्थकामानुबन्धी[5]। क्वचिदर्थ[6] एव फलम्, क्वचित् कामानुबन्धी, क्वचिद् धर्मानुबन्धी, क्वचिद् धर्मकामानुबन्धी[7]। क्वचित् काम एव फलम्, क्वचिद् धर्मानुबन्धी, क्वचिदर्थानुबन्धी[8], क्वचिद् धर्मार्थानुबन्धी। तदेवं द्वादशफलभेदा इति।

---

1. विविधत्व०—M. 2. शाकुन्तलादिषु—T. 3. दिव्येतिवृत्तान्तरभेदा—M.
4. M omits पुनस्तादृशाः. 5. T omits 'अर्थ ···बन्धी'
6. T omits अर्थं एव फलं. 7. M reads अर्थकामानुबन्धी.
8. M, T omit धर्मानुबन्धी.

तत्रार्थकामानुबन्धी धर्मो यथानर्घराघवादिषु । केवलः कामो यथा मालतीमाधवादिषु । धर्मयुक्तः कामो यथा मालविकाग्निमित्रादिषु । एवमन्यदपि द्रष्टव्यम् ।

अस्य त्रिवर्गस्य य इतिवृत्तांशेऽङ्कुरस्येव बीजं प्रधाननिबन्धनं तद् व्युत्पादयति—

स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा ।

पर[1]स्तादनेकधा विस्तारी उपक्षेपावस्थायां स्वल्पोपक्षिप्तस्त्रिवर्गस्य यो हेतुस्तद् बीजमिति । यथा बीजमुसमङ्कुरमूलपत्रस्कन्धशाखाप्ररोहपल्लवपुष्पादिना बहुधा विसर्पते, फलाय कल्पते तथायमपि नायकोपनायकप्रतिनायकसहायसुहृदमात्यादिभेदाद् बहुधा विसर्पन्नन्ते फलाय कल्पते ततो[2] बीजमित्युच्यते । तच्च क्वचित् स्वायत्तसिद्धेर्नायकस्य रामादेः सोत्साहात्मकं क्वचिदमात्यायत्तसिद्धेर्वत्सराजस्य तदुत्साहात्मकम् । [3]एवमुभयायत्तसिद्धेरुभयोत्साहात्मकमिति द्रष्टव्यम् ।

अस्य च बीजस्यावान्तरार्थैरवान्तरप्रयोजनैः प्रत्येकं[4] निबद्धैः परमप्रयोजनविच्छेदे सति यत्पुनरविच्छेदकारणं तद् व्युत्पादयति—

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥ १७ ॥

यथा पयोबिन्दुश्च्यो[5]तन्नभिष्यन्दलक्षणायाः क्रियाया अविच्छेदहेतुरेवमयमपीति बिन्दुरित्युच्यत इति । एवं पञ्चधा व्युत्पादितान् वस्तुभेदानुपसंहरति—

बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः ।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः ॥ १८ ॥

अर्थप्रकृतयः कथाशरीरस्य हेतवः अवयवा इत्यर्थः । तथा नाटकप्रकाशे भोजदेवेनोक्तम्—

'बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतयः पञ्च कथादेहस्य हेतवः ॥' इति।

'कथाशरीरोपादानकारणभूताः पञ्चार्थ[6]प्रकृतय' इति च ।

अत्र प्रथमं बीजमुपक्षिपेत् साधनत्वात्, सर्वान्ते च कार्यं प्रयोजयेत् साध्यत्वात् । मध्ये च तयोरविच्छेदाय बिन्दुमारचयेदित्याधिकारिकार्थः । पताकाप्रकर्योस्तु बीजकार्ययोर्मध्ये यथासम्भवं निवेश इति ।

तत्र बीजं यथा वीरचरिते[7] प्रथमेऽङ्के प्रस्तावनायाम्—

'सूत्रधारः—

प्राचेतसो मुनिवृषा प्रथमः कवीनां
यत्पावनं रघुपतेः प्रणिनाय वृत्तम् ।

---

1. T omits 'पर······विस्तारी'. 2. अतो—M. 3. M omits एवं.
4. प्रत्येकनिबन्धैः—M. 5. ···श्च्योतः—T. 6. पञ्चधा अर्थप्रकृतय—T.
7. प्रथमेऽङ्के वीरचरिते—T.

भक्तस्य तत्र समरंस्त ममापि वाच[1]-
स्तासु प्रसन्नमनसः कृतिनो भजन्ताम् ॥
विजयि सहजमस्त्रैर्वीर्यमुच्छ्राययिष्यन्
जगदुपकृतिबीजं मैथिलीं प्रापयिष्यन् ।
दशमुखकुलघातश्लाघ्यकल्याणपात्रं
मुनिरनुजसहायं रामदेवं निनाय ॥'

इति विश्वामित्रोत्साहोपचितरामोत्साहो बीजं निबद्ध इति ।

बिन्दुर्यथानर्घराघवे कौमारविक्रमे—

'विश्वामित्रः—

निर्वृत्तो बहु तावदध्वरभुजामातर्पणोऽयं विधि-
र्दायादेन समं सुकेतुदुहिता चाद्यैव घानिष्यते ।
पाणौ कृत्य पुनर्वृषध्वजधनुर्ध्वंसैकशुल्कां वधू-
मैक्ष्वाके सुरकार्यदिक्षु चरति स्वास्थ्यं विधातास्महे ॥'

इति द्वितीयतृतीयाङ्का[2]विच्छेदकारणाद् बिन्दुरिति । यथा वीरचरिते चतुर्थेऽङ्के विष्कम्भे—

'माल्यवान्—

हा वत्साः खरदूषणत्रिशिरसो वध्यास्थ पापस्य मे
हा हा वत्स बिभीषण त्वमपि मे कार्येण हेयस्थितिः ।
हा मद्वत्सल वत्स रावण महत् पश्यामि ते सङ्कटं
वत्से केकसि हा हतासि न चिरात् त्रीन् पुत्रकान् द्रक्ष्यसि ॥'

इति बिभीषणनिष्कासादीनामभिधानेन रामोत्साहाविच्छेदो बिन्दुर्निबद्ध इति ।

पताका यथा—

'मूर्ध्ना जाम्बवतोऽभिवन्द्यचरणावापृच्छ्य सेनापती-
नाश्वास्याश्रुमुखान् महाप्रियसखान् प्रेष्यान् समादिश्य च ।
आरम्भं जगृहे महेन्द्रशिखरादम्भोनिधेर्लङ्घने
रंहस्वी रघुनाथपादरजसामुच्चैः स्मरन् मारुतिः ॥'

इति हनुमतो वृत्तान्तः पताकेति भोजराजेनोदाहृतः । अत्र सत्यपि सानुबन्धत्वे स्वासाधारणप्रयोजनाभावाद् हनुमतो वृत्तान्तस्य न पताकात्वमित्येके मन्यन्ते । तेषां कृतेऽनर्घराघवे दशग्रीवनिग्रहे—

---

1. बालः—M. 2. ......ङ्कपरिच्छेद०—M, ...ङ्कावच्छेद—T.

'हेमाङ्गदः—

दशमुखशरपीडनापयानोद्यमपरिपुच्छ्यमानवानराणि ।
सरभसमभिसान्त्वयन् बलानि द्विषमभियोधयति प्लवङ्गराजः ॥

रत्नशिखण्डः—

अस्त्राणि प्लवगाधिपेन विहिताः पौलस्त्यवक्षस्तटी-
सङ्घट्टानलदत्तदावविपदः सीदन्ति भूमीरुहाः ।
उत्पाट्य प्रहितश्च शैलशिखरो लङ्केन्द्रहस्तावली-
लिप्तो[1]ऽयं निजकुञ्जनिर्झरजलैर्जम्बालपिण्डायते ॥
विशिखौघविशीर्णशस्त्रशैले तरुसञ्चूर्णितशक्तितोमरे च ।
कपिराक्षसयोरजस्रमाजौ तुमुले[2] भाति तलातलिप्रपञ्चः ॥

सुग्रीवः—

विंशत्या युगपत्स्वमैरपि करैराकर्षणच्छेदयो-
रच्छिन्नं दशमं शिरः कथयति च्छिन्नानि यानि क्रमात् ।
तान्याराद्धमहेश्वराणि भवतः शीर्षाणि तुल्यं दश
च्छिन्दानो दशभिर्नखैर्यदि पुनः शाखामृगेन्द्रः सुखी ॥

रे रे राक्षस,

दशमुखवधनाट्यसूत्रधारो रघुपतिरस्य च पारिपार्श्विकोऽहम् ।
प्रकरणफलबीजभावकानाममृतभुजां समुपास्महे समाजम् ॥

इति सुग्रीववृत्तान्तः पताकेति ।

प्रकरी यथा—

'मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं
शक्तिस्तस्य कुतः स वज्रपतनाद् भीतो महेन्द्रादपि ।
तार्क्ष्यः सोऽपि समं निजेन गुरुणा जानाति मां रावण-
मज्ञातः स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति ॥'

इति सीतामपहरतो रावणस्य मार्गनिरोधादिरूपो जटायुवृत्तान्तः प्रकरीति ।

सुग्रीवाभिषेके विष्कम्भे जटायुः सीतामपहरन्तं रावणं प्रति—

'भुजविपिनमदेन व्यर्थमन्धंभविष्णु-
र्धिगपसरसि चोरङ्कारमाक्रुश्यमानः ।
त्वदुरसि विदधातु स्वामवस्कारकेलिं
कुटिलकरजकोटिक्रूरकर्मा जटायुः ॥'

---

1. विष्टो—M. 2. तुमुलो—T

इति जटायुवृत्तान्तः प्रकरी ।

कार्यं यथा तत्र नायकानन्दे--

'ताताज्ञामधिमौलिमौक्तिकमणिं कृत्वा महापोत्रिणो
दंष्ट्रा विन्ध्यविलासपत्रशबरी दृष्टा भृशं मेदिनी ।
सेतुर्दक्षिणपश्चिमौ जलनिधी सीमन्तयन्निर्मितः
कल्पान्तं च कृतं समस्तमदशग्रीवोपसर्गं जगत् ॥'

इति जगद्रक्षणेन ताताज्ञाकरणेन च धर्मनिष्पत्तिः फलं निबद्धेति ।

यथा रत्नावल्यां चतुर्थेऽङ्के—

'नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
साकं सागरिका ससागरमहीप्राप्त्यैकहेतुः प्रिया ।
प्रत्यावृत्तिमुपागता च भगिनी लाभेन देवी पुनः
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मिन् करोमि स्पृहाम् ॥'

इत्यर्थकामयोर्निष्पत्तिः फलं निबद्धेति । एवं तावदर्थप्रकृतयो व्याख्याताः ।

इदानीं कार्यस्य नायकव्यापारापेक्षया पञ्चावस्था भवन्तीत्याह—

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥ १९ ॥

फलार्थिभिः प्रारब्धस्येत्यनेन नायकापेक्षया दर्शितमिति । अवस्थास्वरूपसामर्थ्यप्राप्तश्च पाठक्रम एवादरणीय इति ।

अवस्थापञ्चकं यथाक्रमं लक्षयति--

औत्सुक्यमात्रमारम्भः फललाभाय भूयसे ।
प्रयत्नस्तु तदप्राप्तौ व्यापारो ऽतित्वरान्वितः ॥ २० ॥
उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ।
अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता ॥ २१ ॥
समग्रफलसम्पत्तिः फलयोगो यथोचिता ।

औत्सुक्यमभिलाषप्रकर्षः[1] 'कालाक्षमत्वमौत्सुक्यमि'ति हि चतुर्थे वक्ष्यति । 'भूयसे फललाभाये' त्यनेन त्रिवर्गान्यतमौत्सुक्यमारम्भ इति दर्शयति । मात्रशब्देन चोपरितनं प्रयत्नादिकं व्यवच्छिनत्ति । प्रयत्नाद्यवस्थास्वप्यौत्सुक्यस्यानुवर्तमानत्वात् । इतरथा नायकोत्साहोत्सा[2]दप्रसङ्गात् । अतित्वरान्वित इति च प्रयत्नावस्थायामप्यौत्सुक्यमस्तीति दर्शयति । स्पष्टमन्यत् ।

आरम्भो यथाभिज्ञानशाकुन्तले--

---

1. औत्सुक्यमात्रमारः--M. 2. M omits उत्साद.

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'

प्रयत्नो यथा मालतीमाधवे—

'मासावपत्नेऽप्यपि नाम तद् भूत्
पापं यदस्यां त्वयि वा विशङ्क्यम् ।
तत् सर्वथा सङ्गमनाय यत्नः
प्राणव्ययेनापि मया विधेयः ॥'

इति मालतीसङ्गमनाय कामन्दकीयव्यापारस्तदायत्तसिद्धेर्माधवस्योत्साहस्थानीयो निबद्धः ।

प्राप्त्याशा यथानर्घराघवे माल्यवान्—

'प्रीते विधातरि पुरा परिभूय मर्त्यान्
वव्रेऽन्यतो यदभयं स भवानहंयुः ।
तन्मर्मणि स्पृशति मामतिमात्रमद्य
हा वत्स शान्तमथवा दशकन्धरोऽसि ॥'

इति रावणदुर्नयेन तद्भुजबलेन च रामस्य सन्दिग्धा फलप्राप्तिर्निबद्धेति ।

नियताप्तिर्यथा तत्रैव दशग्रीवनिग्रहे—

'अहो मनुष्यमात्रेण लङ्घितो यदि सागरः ।
प्रतापो दशकण्ठस्य भुवनैरपि लङ्घितः ॥'

इति रामस्य नियता विजयप्राप्तिर्निबद्धेति ।

फलागमो यथा—'नीतो विक्रमबाहुरि'त्यादि 'ताताज्ञामधिगम्ये'त्यादि च प्रागेवोदाहृतमिति ।

एवमुपपादिमवस्थापञ्चकमर्थप्रकृतिपञ्चकेनान्वितं निबन्धनीयम् । तदन्वयवशाच्चैकैकस्या अर्थप्रकृतेरेकैकः सन्धिर्जायत इत्याह—

अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ॥ २२॥
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्चसन्धयः ।

अर्थप्रकृतीनामुपसंहारोक्तक्रमेणावस्थापञ्चकस्योद्देशोक्तक्रमेण सन्धयो विधातव्या इति । सामान्यतः प्राप्तिरित्यपवादं वक्ष्यति—'पताका स्यान्नवे'त्यादौ ।

तत्र सन्धेः सम्मान्यलक्षणमाह—

अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ॥ २३ ॥

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिरिति ।

एवं सामान्यतो लक्षितं सन्धिपञ्चकम् । विशेषतो लक्षणाय स्वनामभिरुद्दिशति—

मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिः ।

विवक्षितश्चायमुद्देशक्रम अवस्थाक्रमवत् सामर्थ्यसिद्धत्वात् ।

अथ मुखसन्धिं लक्षयति—

मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा ॥ २४ ॥

नानाभूतानामर्थानां रसानाञ्च हेतुर्बीजानामुत्पत्तिर्मुखसन्धिरिति । अनेन[1] त्रिवर्गफल-प्रहसनादौ रसोत्पत्तिहेतोरेव बीजत्वं सूचितमिति । बीजारम्भोदाहरणमेव मुखसन्ध्युदा-हरणमनुसन्धातव्यमिति ।

अस्य मुखसन्धेर्बीजारम्भसमन्वयसामर्थ्याद् द्वादशाङ्गानि भवन्तीत्याह—

अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ।

वक्ष्यत्येषां प्रयोजनं 'षोढा चैषां प्रयोजनमि'त्यत्र । कानि पुनस्तानीत्याह—

उपक्षेपः परिकरः परिन्यासो विलोभनम् ॥ २५ ॥

युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।

उद्भेदभेदकरणान्य्

एतानि निरुक्त्या लक्षयति—

अन्वर्थान्य्

सुखग्रहणार्थं पुनरपि लक्षणं क्रियत इत्याह[2]—

अथ लक्षणम् ॥ २६ ॥

उपक्षेपं लक्षयति—

बीजन्यास उपक्षेपस्

बीजस्यार्थप्रकृतेर्न्यासः प्रस्ताव उपक्षेप इति ।

यथा रत्नावल्यां नेपथ्ये—

'द्वीपादन्यस्मादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥'

इत्यादिना यौगन्धरायणो वत्सराजस्य रत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीज-त्वेनोपक्षिप्तवानिति ।

परिक्रियं लक्षयति—

तद्बाहुल्यं परिक्रिया ।

तस्य बीजस्य बाहुल्यं बहुलीकरणं परितः क्रिया परिक्रियेति । यथा तत्रैव—'अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः अन्तःसमुद्रे प्रवहणभङ्गनिमग्नोत्थितायाः फल-कासादनमि'त्यादिना 'सर्वथा स्पृशन्ति स्वामिनमभ्युदयाः' इत्यन्तेन बीजस्य बहुलीकरणं परिकर इति ।

---

1. M reads अनेन त्रिवर्गफलप्रहसनादौ रसोत्पत्तिर्मुखसन्धिरिति before अनेन०. 2. इत्यत्राह—T.

परिन्यासं लक्षयति—

तन्निष्पत्तिः परिन्यासो

बीजनिष्पत्तिः पच्यमानत्वं फलसम्बन्ध इति यावत्। फलपरिसरवर्तितया बीजस्य न्यासः परिन्यास इत्यर्थः।

यथा तत्रैव—

'प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाकारी भीत एवास्मि भर्तुः॥'

इत्यनेन यौगन्धरायणः स्वव्यापारदैवयो[1] र्निष्पत्तिमुक्तवानिति। विलोभनं लक्षयति—

गुणाख्यानाद् विलोभनम्॥ २७॥

नायकनायिकागुणाख्यानाद् बीजस्य विलोभनं बृंहणमिति यावत्। यथाभिज्ञानशाकुन्तले—'सुणादु अय्यो। अत्थि कोसिओत्ति गोत्तणामहेओ महाप्पहावो राएसी। [शृणोत्वार्यः। अस्ति कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः।]' इत्याद्यनसूयावचनेन राजर्षिप्रभावत्वादिगुणाख्याने कृते, 'राजा—उपपद्यते—

'मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥'

इति शकुन्तलागुणाख्यानाद् दुष्यन्तानुरागोपबृंहणमिति।

युक्तिं लक्षयति—

सम्प्रधारणमर्थानां युक्तिः

यथा रत्नावल्याम्—

'राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक् पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥'

इति निर्णयः सम्प्रधारणमिति।

प्राप्तिं लक्षयति—

प्राप्तिः सुखागमः।

अत्रापि[2] स्पष्टैव[3] निरुक्तिः।

यथा मालतीमाधवे कलहंसहस्ते चित्रफलक[4]दर्शनानन्तरं 'मकरन्दः—वयस्य माधव, समाश्वसिहि—

या कौमुदी नयनयोर्भवतः सुजन्मा
तस्या भवानपि मनोरथलब्धबन्धुः।

---

1. दैवतयो०—T. 2. अत्रेव—T. 3. स्पष्टैवं—T. 4. T omits फलक.

तत्सङ्गमं प्रति सखे नहि संशयोऽस्ति
यस्मिन् विधिश्च मदनश्च कृताभियोगः ॥'

इति मकरन्देन मालत्यनुरागनिवेदनं माधवस्य सुखप्राप्तिरिति ।

समाधानं लक्षयति—

बीजागमः समाधानं

बीजस्य आगम आवृत्या उपादानं समाधानं प्रतिसन्धानमित्यर्थः ।

यथा वेणीसंहारे—'भवति पाञ्चालराजतनये, श्रूयतामचिरेणैव कालेन—

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावबद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः ॥'

इत्यनेन युधिष्ठिरक्रोधोपचायकस्य भीमक्रोधबीजस्य समाधानमिति ।

विधानं लक्षयति—

विधानं सुखदुःखकृत् ॥ २८ ॥

स्पष्टमेतत् ।

यथा वेणीसंहारे—'पुणोवि तुए अहं आअच्छिअ समासासइदव्वा । [पुनरपि त्वयाहमागत्य समाश्वासयितव्या ।] भीमः—अयि पाञ्चालराजतनये, किमद्याप्यलीकाश्वासनशङ्कया—

भूयः परिभवक्लान्तिलज्जाविधुरिताननम् ।
अनिश्शेषितकौरव्यं न पश्यसि वृकोदरम् ॥'

इत्यनेन सङ्ग्रामस्य सुखदुःखहेतुत्वाद् विधानमिति ।

परिभावनां लक्षयति—

परिभावोऽद्भुतावेधः

परिभावः परिभावना । अद्भुतावेध अद्भुतरसेन वेधो वासनं परिभावनमिति ।

यथा विक्रमोर्वशीये प्रथमेऽङ्के 'राजा—(प्रकृतिस्थामुर्वशीं विलोक्य) (आत्मगतम्) स्थाने खलु नारायणमृषिमित्युपक्रम्य अथवा नेयं तपस्विनः सृष्टिर्भवितुमर्हति—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु[1] विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥

इति लोकोत्तररूपदर्शनान्नायकबुद्धेरद्भुतरसावेधात् परिभावनमिति ।

1. स—T.

उद्भेदं लक्षयति—

उद्भेदो गूढभेदनम् ।[1]

यथा वेणीसंहारे—'भीमः—किमिदानीमध्यवस्यति गुरुरि'त्युपक्रमेणैव—

'यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता ।
तद्द्यूतारणिसम्भृतं[2] नृपवधूकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते ॥

भीमः—(सहर्षम्) जृम्भतां जृम्भतां सम्प्रत्यप्रतिहतप्रसरणमार्यस्य क्रोधज्योतिः ।' इति द्रौपदीकेशसंयमनहेतोर्युधिष्ठिरस्य क्रोधस्योद्भेदनमिति ।

करणं लक्षयति—

करणं प्रकृतारम्भो

स्पष्टमेतत् । यथा वेणीसंहारे—'भीमः—तद् गच्छामो वयमिदानीं कुरुकुलस्य क्षयाये'त्यादिनानन्तराङ्कप्रस्तूयमानसङ्ग्रामारम्भः[3] करणमिति ।

भेदं लक्षयति—

भेदः प्रोत्साहना भवेत् ॥ २९ ॥

प्रोत्साहना उत्तेजनं पूर्वावस्थातो भेदनमित्यर्थः । यथा वेणीसंहारे—'द्रौपदी—णाह मा हु जण्णसेणी परिभवुद्दीविअकोवाणला अणवेक्खिदसरीरा परिक्कमिस्सथ । जदो अप्पमत्तसञ्चरणीआइं अरिबलाइं सुणीअंति । [द्रौपदी—नाथ, मा खलु याज्ञसेनी-परिभवोद्दीपितकोपानला अनवेक्षितशरीराः परिक्रमिष्यथ । यतोऽप्रमत्तसञ्चरणीयान्यरिबलानि श्रूयन्ते ।]

भीमः—अयि सुक्षत्रिये,

अन्योऽन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के
मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ ।
स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
सङ्ग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताः पाण्डुपुत्राः ॥'

इति भीमेनोत्तेजनाद् भेद इति भोजराजेनोदाहृतमिति । 'सङ्घात[4]रूपभेदो यः स भेद इति कीर्त्तितम्' इति कैश्चिद् भेदलक्षणमुक्तम् ।

एवमुक्तानि द्वादशसन्ध्यङ्गानि ।

---

1. M, T read 'नात्र किञ्चित् तिरोहितम् इतीव (तव—M)' after गूढभेदनम्.
2. सम्भवं—M. 3. सङ्ग्रामारम्भणमिति—T. 4. सङ्घातरूपोद्भेदो—M.

न चैषां क्रमे विवक्षा सर्वचरमस्य करणस्य भेदात् प्रागेव लक्षणाभिधानेन स्वयम[1]-नादृतत्वाल् लक्ष्येषु च व्युत्क्रमत्व[2]दर्शनाद् वस्तुस्वरूपपर्यालोचनेन क्रमविवक्षायां हेत्वन्तरा-दर्शनाच्च । एतेषां च मध्ये उपक्षेपपरिकरपरिन्यासादीनां वस्तुनेतृरसानुगुण्येन यथासम्भवं तत्र तत्र प्राधान्यं लक्ष्येष्वनु[3]सन्धातव्यम् ।

अथ प्रतिमुखसन्धिं लक्षयति—

लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत् ।

तस्य बीजस्य दृश्यादृश्यतया उद्भेदः प्रकाशनं प्रतिमुखसन्धिरिति । दृश्यत्वं च[4] कार्यानुकूलानां प्रत्यङ्गनिबद्धानां कतिपयेषां वृत्तादिकारणबीजाद्यवस्थानीयानां प्रयोजनानां निष्पत्तेरदृश्यत्वं च तादृशानां[5] बहूनामनिष्पत्तेः ।

यथा वेणीसंहारे भानुमत्यङ्के भीष्मादिवधेन किञ्चिल्लक्ष्यस्य कर्णाद्यवधाच्चालक्ष्यस्य पाण्डवक्रोधबीजस्य—

'सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम् ॥'

इत्यादिना च

'दुःशासनस्य हृदयक्षतजाम्बुपाने
दुर्योधनस्य च तथा गदयोरुभङ्गे ।
तेजस्विनां समरमूर्धनि पाण्डवानां
ज्ञेया जयद्रथवधेऽपि[6] तथा प्रतिज्ञा ॥'

इति च उद्भेदः प्रतिमुखसन्धिरिति । अस्य च प्रतिमुखसन्धेर्बिन्दोरर्थप्रकृतेः प्रयत्नस्य चावस्थाया अनुगमात् त्रयोदशाङ्गानि भवन्तीत्याह—

बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ॥ ३० ॥
विलासः परिसर्पश्च विधूतं शमनर्मणी ।
नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम् ॥ ३१ ॥
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि ।

तत्र विलासं लक्षयति—

रत्यर्थेहा विलासः स्यात्

ईहा चेष्टा । यथा नागानन्दे द्वितीयेऽङ्के—'नायकः - तामेवास्यां शिलायामालिख्य तया चित्रगतमात्मानं विनोदयामी'त्यादिना स्वप्नानुभूतमलयवतीसमागमे चन्दनलतागृहे मलयवतीमपश्यतो जीमूतवाहनस्य चित्रस्थमलयवतीसमागमार्था चेष्टा विलास इति ।

---

1. स्वयमनामकत्वात्—T. 2. व्युत्क्रमत्वात् M. 3. लक्ष्ये सन्धातव्यम्—T.
4. T omits च. 5. तादृशां—M. 6. जयद्रथवधेऽवितथा—M.

परिसर्पं लक्षयति—

दृष्टनष्टानुसर्पणम् ॥ ३२ ॥

परिसर्पो

पूर्वं दृष्टस्य पुनरङ्गविच्छेदादिना नष्टस्य नायके नायिकाद्यनुरागबीजस्यानुसर्पणमनुगमनं परिसर्प इति । यथा वेणीसंहारे द्वितीयेऽङ्के—

'आशस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने—
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः ।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात् ॥'

इत्यनेन पूर्वाङ्के दृष्टस्य पुनस्तत्समाप्त्याद्दृष्टस्य पाण्डवक्रोधबीजस्यानुसर्पणमिति ।

अथ विधूतं लक्षयति—

विधूतं स्यादरतिस्

अभिमतसमागमाप्राप्त्या[1] नायिकानायकयोर[2]रतिर्विधूतमिति । यथा रत्नावल्यां द्वितीयेऽङ्के सागरिका सन्तापशान्तये सुसङ्गतयोपनीतानि[3] नलिनीदलानि मृणालिकाश्च[4] क्षिपन्ती 'णं भणामि—

दुल्लहजणाणुराओ लज्जा गरुई परव्वसो अप्पा ।
पिअसहि विसमं पेम्मं मरणं सरणं णवर एक्कं ॥

[ननु भणामि—

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं केवलमेकम् ॥]'

इत्यनेन वत्सराजसमागमाप्राप्त्या अरतिरिति । 'कृतस्यानुनयस्यादौ विधूतं ह्यपरिग्रहः' इति विधूतलक्षणं कैश्चिदुक्तम् ।

शमं लक्षयति—

तच्छमः शमः ।

यथा नागानन्दे मलयवतीं[5] चन्द्रमणिशिलायामालिख्य सरोमाञ्चं 'नायकः — सखे, पश्य—

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य सुखयति रेखापि प्रथमदृष्टेयम् ॥'

---

1. अभिमतसमागमाद्याप्त्या—M, अभिमतसमागमप्राप्त्या—T. 2. नायकनायिकादे०—M. 3. सुसङ्गतोपनीतानि—M. 4. T omits 'मृणालिकश्च ....भणामि'. 5. T omits मलयवतीं.

इति मलयवतीमलभमानस्य जीमूतवाहनस्यारतेरुपशम इति ।

नर्म लक्षयति—

परिहासवचो नर्म

यथा रत्नावल्याम्—'सुसङ्गता—सहि, जस्स किदे तुमं आअदा (सो) अअं पुरदो चिट्ठइ । [सखि, यस्य कृते त्वमागता (सो) ऽयं पुरतस्तिष्ठति ।] सागरिका—(सासूयम्) सुसङ्गदे, कस्स किदे अहं आअदा । [सुसङ्गते, कस्य कृतेऽहमागता ।] सुसङ्गता (विहस्य)—अलं सङ्किदेण णं फलअं । सङ्गेण्ह एदं चित्तफलअं । [अलं शङ्कितेन । ननु फलकम् । सङ्गृहाणैतत् चित्रफलकम् ।]' इत्यनेन सागरिकासुसङ्गतयोः परिहासवचनं नर्म ।

नर्मद्युतिं लक्षयति—

धृतिस्तज्जा द्युतिर्मता ॥ ३३ ॥

द्युतिरिति नर्मजन्यां धृतिं लक्षयति । यथा रत्नावल्याम्—'सुसङ्गता—अदक्खिणासि दाणिं तुमं जा भट्टिणा सयं हत्थावलम्बिआ कोवं ण मुञ्चसि । [अदक्षिणासीदानीं त्वं या भर्त्रा स्वयं हस्तावलम्बिता कोपं न मुञ्चसि ।] सागरिका—(सभ्रूभङ्गमीषद् विहस्य) सुसङ्गदे दाणिं वि ण विरमसि । [सुसङ्गते, इदानीमपि न विरमसि ।]' इत्यनेनानुरागबीजोद्घाटनेन धृतिर्नर्मजेति । 'दोषप्रच्छादनार्थं तु हास्यं नर्मद्युतिर्मता' इति कैश्चिल्लक्षणमुक्तमिति ।

प्रगमनं लक्षयति—

यथोत्तरा वाक् प्रगमो

युक्तोत्तरवचनमित्यर्थः । यथा नागानन्दे चन्दनलतागृहे चन्द्रमणिशिलायां मलयवतीमभिलिखति जीमूतवाहने 'विदूषकः—(सकौतुकम् निर्वर्ण्य) भो वअस्स अप्पच्चक्खं वि दाव एव्वं लिहीअदि । अच्चरिअं । [भो वयस्य, अप्रत्यक्षमपि तावदेवं लिख्यते । आश्चर्यम् ।]

नायकः—

प्रिया सन्निहितैवेयं सङ्कल्पैः स्थापिता पुरः ।
दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत्कोऽत्र विस्मयः ॥

नायिका—(निःश्वस्य सास्रम्) चउरिए, जाणिदं खु कहावसाणं [चतुरिके, ज्ञातं खलु कथावसानम् ।]' इत्यादिना नायकमलयवतीचतुरिकाणां वचनं यथोत्तरमिति ।

निरोधं लक्षयति—

हितरोधो निरोधनम् ।

यथा[1] रत्नावल्यां वासवदत्ताप्रवेशसूचकविदूषकवचनानन्तरं 'राजा—धिङ् मूर्ख,

1. M reads निरोधः before यथा.

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा ।
रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता ॥'

इत्यनेन वत्सराजस्य सागरिकासमागमरूपस्य हितस्य विदूषकवचननिरुद्ध[1]स्याभिधानान्निरोधनमिति ।

पर्युपासनं लक्षयति—

पर्युपास्तिरनुनयः

पर्युपास्तिः पर्युपासनमित्यर्थः । यथा विक्रमोर्वशीये द्वितीयेऽङ्के उर्वशीहस्तलिखितभूर्जपत्रदर्शनेन कृतकोपा देवी कोपं नाटयित्वा प्रस्थिता । 'राजा—(अनुसृत्य)

अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात् ।
सेव्यो जनश्च कुपितः कथं च दासो निरपराधः ॥

(इति पादयोः पतति)' इत्यनेन[2] नायकस्य नायिकायामनुरागदर्शनात् कुपितां काशिराजतनयां प्रति पर्युपासनमिति ।

पुष्पं लक्षयति—

पुष्पं वाक्यं विशेषवत् ॥ ३४ ॥

सातिशयं वचनमित्यर्थः । यथा नागानन्दे—'नायकः—

व्यावृत्त्यैव सितासितेक्षणरुचा तानाश्रमे शाखिनः
कुर्वत्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।
यद् दृष्टोऽस्मि तया मुनेरपि पुरस्तेनैव मय्याहते
पुष्पेषो भवता मुधैव किमिति क्षिप्यन्त एते शराः ॥

विदूषकः—भो वयस्स, कहिं खु ते गअं धीरत्तणं । [भो वयस्य, कुत्र खलु ते गतं धीरत्वम् ।] नायकः—ननु धीर एवास्मि । कुतः —

नीताः किं न निशाः शशाङ्करुचयो नाघ्रातमिन्दीवरं
किं नोन्मीलितमालतीसुरभयः सोढाः प्रदोषानिलाः ।
झङ्कारः कमलाकरे मधुलिहां किं वा मया न श्रुतो
निर्व्याजं विधुरेष्वधीर इति मां केनाभिधत्से भवान् ॥

अथवा सम्यगहं वदामि वयस्यात्रेय,

स्त्रीसुहृदयेन न सोढाः क्षिप्ताः कुसुमेषवोऽप्यनङ्गेन ।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम् ॥

विदूषकः—(आत्मगतम्) एव्वं अधीरत्तणं पडिवज्जंतेण आचक्खिदो अणेण हिअअस्स महन्तो आवेओ । [एवमधीरत्वं प्रतिपद्यमानेनाख्यातोऽनेन हृदयस्य महानावेगः ।]'

---

1. निरुद्धत्वाभिधाना॰—T. 2. T omits अनेन.

इति मलयवतीमलभमानस्य जीमूतवाहनस्यानुरागवचनमिति ।

उपन्यासं लक्षयति—

प्रसादनमुपन्यासो

यथा विक्रमोर्वशीये उर्वशी स्वहस्तलिखितं भूर्जपत्रं पवनवेगहृतं विदूषकादुपलभ्य 'राजा—(उत्थाय) भगवन् वसन्तप्रियसख दक्षिणवायो—

वासार्थं हर सम्भृतं सुरभिणा पौष्पं रजो वीरुधां
किं मिथ्या भवता हृतेन दयितास्नेहस्वहस्तेन मे ।
जानीते हि मनोविनोदनफलैरेवंविधैर्धारितं
कामार्तं जनमज्जनां प्रति भवानालक्षितप्रार्थनः ॥'

इति भूर्जपत्रप्रदानाय पवनप्रसादनमिति ।

केचित्तु व्याचक्षते—'पर्युपास्तिरनुनय' इत्यत्र पादप्रणामादिरनुनय उक्तः, 'प्रसादनमुपन्यास' इत्यत्रानुनयहेतुवचनमुपन्यास[1] उक्तः । अत्र च पक्षे 'अपराधी नामाहम्' इत्ययं श्लोकः प्रसादनोपाय इति 'पादयोः पततो'त्यादिनानुनयोदाहरणमिति ।

वज्रं लक्षयति—

वज्रं प्रत्यक्षनिष्ठुरम् ।

'प्रत्यक्षरूक्षं यद्वाक्यं तद्वज्रमिति कीर्त्तितम्' इति भोजराजवचनात् । यथा वेणीसंहारे द्वितीयेऽङ्के—'कञ्चुकी—देव, भग्नं भग्नम् । दुर्योधनः—धिक् प्रलापिन्, कोऽयमद्य[2] ते व्यामोहः । कञ्चुकी— न खलु कश्चिद् व्यामोहः । सत्यमिदम्—

भग्नं भीमेन भवतो मरुता रथकेतनम् ।
पतितं किङ्किणीक्वाणबद्धाक्रन्दमिव क्षितौ ॥

दुर्योधनः—यदि बलवत्समीरणवेगात् कम्पिते भुवने भग्नः स्यन्दनकेतुः, तत्किमित्युद्धतं प्रलपसि ?' इति प्रत्यक्षनिष्ठुरं वचनमिति ।

वर्णसंहारं लक्षयति—

चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ॥ ३५ ॥

वर्णग्रहणमुपलक्षणार्थम् । नानाजातीयानामुपगमनमि[3]त्यर्थः । यथा वीरचरिते-'वसिष्ठः[4]—

परिषदियमृषीणामेष वृद्धो युधाजित्
सह नृपतिरमात्यैर्लोमपादश्च वृद्धः ।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामद्रुहो याचकास्ते ॥'

---

1. ……उपन्यास इत्युक्तम्—M. 2, ……यमन्यतो—M. 3. ……मवगमन॰—T. 4. M omits वसिष्ठ.

इति क्षत्रियामात्यादीनामेकत्र सङ्गतानां वर्णानां वचसा रामविजयाशंसिनः परशुराम-दुर्णयस्याद्रोहयाच्चाद्वारेणोद्भेदाद् वर्णसंहार इति । 'वर्णितार्थोपसंहारो वर्णसंहार 'इष्यते'[1] इति केचित् ।

एवमुक्तानि प्रतिमुखसन्ध्यङ्गानि । एतेषां[2] च न क्रमो विवक्षितः । वज्रात् पश्चिम-स्योपन्यासस्य ततः पूर्वमेव लक्षणेन स्वयमनादृतत्वात् लक्ष्येषु व्युत्क्रमत्वदर्शनाद् वस्तु-स्वरूपालोचनेन क्रमविवक्षायां हेत्वन्तरादर्शनाच्च । एषां तु विधूतशमनर्मद्युतिप्रभृतीनां कार्यकारणतानियमात्[3] पौर्वापर्यनियमः[4] । तेषामेव तथा क्रम आदरणीयः । एषु च त्रयोदशस्वप्यङ्गेषु विलासपरिसर्पादीनां वस्तुनेतृरसानुगुण्येन तत्र तत्र[5] यथासम्भवं प्रधानत्वमनुसन्धातव्यम् ।

अथ गर्भसन्धिं लक्षयति—

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।
द्वादशाङ्गः

प्रतिमुखसन्धौ लक्ष्यालक्ष्यतया दृष्टनष्टस्य पुनरन्तरायादिनादर्शनं गतस्य बीजस्य पौनःपुन्येनान्वेषणं गर्भसन्धिरिति । पौनःपुन्यञ्चान्वेषणस्यापायशङ्कानुवृत्तेर्विच्छेदकस्य सातत्यादिति ।

अत्र चोत्सर्गतः प्राप्तायाः पताकाया विकल्पमाह—

पताका स्यान्न वा

तथा लक्ष्येष्वप्यनियमो दृष्टः । यथा मालविकादिषु पताकाभावः, मालतीमाधवानर्घ-राघववीरचरितादिषु सद्भावः ।

अथ प्रकृतेर्वैकल्पिकत्वात् प्राप्त्याशाया विकल्पो मा भूदित्याह—

स्यात् प्राप्तिसम्भवः ॥ ३६ ॥

प्राप्तिसम्भवस्तु स्यादेवेत्यर्थः । असत्यामपि पताकायां प्राप्त्याशागर्भसन्ध्योः पूर्वोक्त-रार्थ[6]प्रकृत्योर्यथासम्भवं निवेशः । यस्यामर्थप्रकृतौ प्राप्त्याशाभिनिविशते तया[7] सह तस्याः समन्वयमङ्गानि द्योतयन्तीति निर्णयः । तत्र गर्भसन्धिर्यथा मालविकाग्निमित्रे तृतीयेऽङ्के—'राजा—

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत् सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि[8] न कदाचिद् विरहितं
प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किम् ॥'

---

1. M omits इष्यते. 2. तेषां--M. 3. कार्यकारणनियमः—T. 4. T omits पौर्वापर्यनियमः. 5. M reads च after तत्र. 6. पूर्वोक्तार्थप्रकृतयोः—T. 7. अनया—T, 8. त्वमपि—M.

इत्यादिनाङ्कसमाप्तिं यावद् देवी सादररचणोरावतीदर्शनादिभिरदर्शनं गतस्य 'अथ क्व तत्र भवती' त्यादिनान्वेषणं कृतमिति ।

अङ्गान्युद्दिशति—

अभूताहरणं मार्गो रूपोदाहरणे क्रमः ।
सङ्ग्रहश्चानुमानं च तोटकाधिबले तथा ॥३७॥
उद्वेगसम्भ्रमाक्षेपा लक्षणं च प्रणीयते ।

तत्राभूताहरणं लक्षयति—

अभूताहरणं छद्म[1]

अभूतस्यातत्त्वस्य कथनं छद्मेति । तदुक्तम्[2]—'अभूताहरणं तत् स्याद्वाक्यं यदसदाश्रयम् ।' यथा वेणीसंहारे तृतीयेऽङ्के—

'अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा
स्वैरं शेषे गज इति किल व्याहृतं सत्यवाचा ।
तच्छ्रुत्वासौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच ॥'

इति द्रोणमुद्दिश्य युधिष्ठिरमिथ्यावचनमभूताहरणमिति ।

मार्गं लक्षयति—

मार्गस्तत्त्वार्थकीर्तनम् ॥ ३८ ॥

यथा रत्नावल्यां तृतीयेऽङ्के—'वासवदत्ता—हला कांचणमाले सच्चं एव्व मम वेसं करिअ अज्जउत्तं साअरिआ अभिसरिस्सदित्ति । [हला काञ्चनमाले मम वेषं कृत्वाऽऽर्यपुत्रं सागरिकाभिसरिष्यतीति ।] काञ्चनमाला—अहइं । अण्णहा किं भट्टिणीए विण्णवेमि । अहवा चित्तसालिआदुआरगओ वसंतओ एव्व दे पच्चअं उप्पादइस्सदित्ति । [अथ किम् । अन्यथा किं भट्टिन्यै विज्ञापयामि । अथवा चित्रशालिकाद्वारगतो वसन्तक एव ते प्रत्ययमुत्पादयिष्यतीति ।]' इति वेषपरिवर्तनेन सागरिकाभिसरणस्य कथनात्[3] तत्त्वाख्यानमिति ।

रूपं लक्षयति—

रूपं वितर्कवद्वाक्यं

ससन्देहवचनमित्यर्थः । तदुक्तम्—'चित्रार्थसमवाये तु वितर्को रूपमुच्यते ।' यथा वेणीसंहारे—'दुर्योधनः —

तेजस्वी रिपुहतबन्धुदुःखपारं
बाहुभ्यां तरति धृतायुधप्लवाभ्याम् ।
आचार्यः सुतनिधनं निशम्य सङ्ख्ये
किं शस्त्रग्रहणसमये विशस्त्र आसीत् ॥'

---

1. जन्म—M. 2. यदुक्तम्—M. 3. करणात्—M.

इति वितर्कवचनमिति ।

उदाहरणं लक्षयति—

सोत्कर्षं स्यादुदाहृतम् ।

अतिशयवद्वाक्यमित्यर्थः । यथा रत्नावल्याम्—'विदूषकः—(सपरितोषम्) ही ही कोसंबीरज्जलाहेण ण तादिसो पिअवअस्सस्स परितोसो आसी जादिसो अज्ज मम सआसादो पिअवअणं सुणिअ भविस्सदित्ति तक्केमि । [ही ही । कौशाम्बीराज्यलाभेन न तादृशः प्रियवयस्यस्य परितोष आसीद् यादृशोऽद्य मम सकाशात् प्रियवचनं श्रुत्वा भविष्यतीति तर्कयामि ।]' इति परितोषातिशयवचनमिति ।

क्रमं लक्षयति—

क्रमः सञ्चिन्त्यमानाप्तिर्भावज्ञानमथापरे ॥ ३९ ॥

अभिलषितप्राप्तिः क्रमः । अन्ये भावज्ञानं क्रम इत्याचक्षते[1] । यथा विक्रमोर्वशीये तृतीयेऽङ्के—

'गूढा नूपुरशब्दमात्रमपि मे कान्ता श्रुतौ पातयेत्
पश्चादेत्य शनैः कराम्बुजधृते कुर्वीत वा लोचने ।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बला—
दानीयेत पदात्पदं चतुरया सख्या ममोपान्तिकम् ॥

उर्वशी—इमं दाव से मणोरहं सम्पादइस्सं । [इमं तावदस्य मनोरथं सम्पादयिष्यामि ।] (पृष्ठतो गत्वा राज्ञो नयनं संवृणोति) इति मानासिर्निवद्धेति ।

भावज्ञानलक्षणस्य क्रमस्य स्वयमेवोदाहरणमूहनीयम् । अन्ये तु 'भावकत्वोपलब्धिः[2] (? भावतत्त्वोपलब्धिः) क्रम इत्यभिधीयते' इति वर्णयन्ति ।

सङ्ग्रहं लक्षयति—

सङ्ग्रहः सामदानोक्तिर्

यथा रत्नावल्याम् 'साधु वयस्य साधु, इदं ते पारितोषिकं ददामी'ति विदूषकं प्रति राज्ञः सामदानोक्तिरिति ।

अनुमानं लक्षयति—

अभ्यूहो लिङ्गतोऽनुमा ।

यथा वेणीसंहारे—'(नेपथ्ये कलकलः) (अश्वत्थामा पुरतोऽवलोक्य) धिक् कष्टम् । एष खलु भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं दुर्योधनराधेयौ शरैरभिद्रवति । सर्वथा पीतं दुःशासनस्य शोणितं भीमेन ।' इत्यूहनीयम् ।

अधिबलं लक्षयति—

---

1. इति व्याचक्षते—T. 2. भावलब्धोपपत्तिस्तु—T.

अधिबलमभिसन्धिः

अभूताहरणं छद्मेत्यत्रातत्त्ववचनमुक्तम् । अत्र चेष्टया वञ्चनमतिसन्धानमिति अभूताहरणाधिबलयोर्भेदः । यथा रत्नावल्याम्—'काञ्चनमाला—भट्टिणि, इयं सा चित्तसालिआ । ता पविसिअ वसंतअस्स अप्पागमणं सूआइ कहेहि[1] । [भट्टिनि, इयं सा चित्रशालिका तत्प्रविश्य वसन्तकस्यात्मागमनं सूचया कथय ।] वासवदत्ता—नखच्छोटिकां ददाती'त्यादिना राजविदूषकयोर्वासवदत्तानखच्छोटिकादानेनातिसन्धानमिति । 'कपटस्यान्यथाभावं ब्रुवतेऽधिबलं[2] बुधा' इति कैश्चिदुक्तम् ।

तोटकं लक्षयति—

संरब्धं तोटकं वचः ॥ ४० ॥

यथा वेणीसंहारे—'अश्वत्थामा—ह ह राजन्, किमाह भवान् किं क्रियत इति ? श्रूयतां यत् क्रियते—

योयः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥

भो जामदग्न्यशिष्य कर्ण—

देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।
तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रौणायनः क्रोधनः ॥'

इति पाण्डवानधिकृत्याश्वत्थाम्नः संरब्धवचनं तोटकमिति ।

उद्वेगं लक्षयति—

उद्वेगोऽरिकृता भीतिः

यथा वेणीसंहारे—'(नेपथ्ये)

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याग्रतः
प्रत्यक्षं कुरुबान्धवस्य मिषतः कर्णस्य शल्यस्य च ।
पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजक्षुण्णादसृग्वक्षसः ॥

सूतः—(श्रुत्वा सभयम्) अये, कथमासन्न एष स दुरात्मा कौरवराजवनोत्पातमारुतो मारुतिः । अनुपलब्धसंज्ञश्चाद्यापि महाराजः । भवतु सुदूरमपहरामि स्यन्दनम् । कदाचिद् दुःशासन इवास्मिन्नप्यनार्यो[3]ऽनार्यमाचरिष्यती'ति भीमकृता भीतिरिति ।

1. करेहि—M. 2. शबलं—M. 3. इवास्मिन्नार्ये—M.

सम्भ्रमं लक्षयति—

शङ्कात्रासौ च सम्भ्रमः ।

यथा रत्नावल्याम्—'विदूषकः—का उण एषा । [का पुनरेषा ।] (ससम्भ्रमम्) कहं देवी वासवदत्ता अत्ताणं वावादेइ । (कथं देवी वासवदत्ता आत्मानं व्यापादयति ।) राजा—(ससम्भ्रममुपसर्पन्) क्वासौ ? क्वासौ ?' इत्यादिना सम्भ्रम उक्तः ।

गर्भबीजसमुत्क्षेपादाक्षेपः परिकीर्तितः ॥ ४१ ॥

गर्भबीजयोः समुत्क्षेपादाक्षेप इति ।

यथा रत्नावल्याम्—'राजा—कष्टं भोः कष्टम्—

किं देव्याः कृतवेषरोषमुषितस्निग्धं स्मितं तन्मुखं
किं वा सागरिकाक्रमोद्गतरुषा सन्त्यज्यमानां तया ।
बध्वानीतमितो वसन्तकमहं किं चिन्तयाम्यप्रभुः
सर्वारम्भकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम् ॥

ततः किमिदानीमिह स्थीयते । देवीमेव गत्वा[1] प्रसादयामी'ति दृष्टनष्टबीजस्याक्षेपः कृतः ।

तेषाञ्च तोटकात् पश्चिमस्याधिबलस्य प्रथमं लक्षणाभिधानेन क्रमः स्वयमनादृत इति प्राधान्याप्राधान्ये पूर्ववदेवोहनीय इति ।

अवमर्शसन्धि लक्षयति—

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात् ।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः ॥ ४२ ॥

क्रोधव्यसनादिजन्यो गर्भनिर्भिन्नबीजार्थसम्बन्धो[2] विचारनिर्णयोऽवमर्शसन्धिरिति ।

यथा वेणीसंहारे षष्ठेऽङ्के—

'तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम् ।
भीमेन प्रियसाहसेन रभसात् स्वल्पावशिष्टे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥'

इत्यादिना भीष्माद्यपायभावेन नष्टदुर्योधनोपलब्धिमात्रेण च बीजावमर्शादवमर्शसन्धिरिति ।

अथ तदङ्गान्युद्दिशति—

तत्रापवादसम्फेटौ विद्रवद्रवशक्तयः ।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् ॥ ४३ ॥
प्ररोचना विचलनमादानञ्च[3] त्रयोदश ।

---

1. नत्वा—M. 2. ······बीजार्थसन्धौ—M. 3. विचलनञ्चादानञ्च—T.

तत्रापवादं लक्षयति—

दोषप्रख्यापवादः स्यात्

यथा वेणीसंहारे—'युधिष्ठिरः—कच्चिदासादिता तस्य दुरात्मनः कौरवापसदस्य पदवी ? पाञ्चालः—स एव दुरात्मा देवीकेशाम्बराकर्षणमहापातकहेतुरुपलब्ध' इति सुयोधनदोषप्रख्यापनमिति ।

सम्फेटं लक्षयति—

सम्फेटो रोषभाषणम् ।

यथा वेणीसंहारे सलिलनिमग्नं सुयोधनं प्रति 'वृकोदरः—रे रे वृथाप्रख्यातालीक-पौरुषाभिमान' इत्युपक्रम्य—

'जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणितसुराक्षीबं रिपुं भाषसे ।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे
सन्त्रासान्नृपशो विहाय समरं पङ्केऽधुना लीयसे ॥
पाञ्चाल्या मन्युवह्निः स्फुटमुपशमितप्राय एष प्रसह्य
व्यामुक्तैः केशहस्तैर्हतपतिषु मया कौरवान्तःपुरेषु ।
भ्रातुर्दुश्शासनस्य स्रवदसृगुरसः पीयमानं निरीक्ष्य
क्रोधात् किं भीमसेने विहितमसमये स त्वयास्तोऽभिमानः ॥'

इति सम्फेटः ।

विद्रवं लक्षयति—

विद्रवो वधबन्धादिर्

आदिशब्देन निरोधदाहयोर्ग्रहणम् ।

यथा छलितकरामे —

'येनावृत्य मुखानि साम पठतामत्यन्तमायासितं
बाल्याद्येन हृताक्षसूत्रवलयप्रत्यर्पणैः[1] क्रीडितम् ।
युष्माकं हृदयं[2] स एव[3] विशिखैरापूरितांसस्थलो
मूर्च्छाघोरतमःप्रवेशविवशो बद्ध्वा लवो नीयते ॥'

इति लवस्य बन्ध उक्तः ।

यथानर्घराघवे दशग्रीवनिग्रहे—

1. प्रत्यर्पितैः—M. 2. हृदये—T. 3. एष—T.

प्रहस्तधूम्राक्षमहोदरादीन्
व्यापाद्य सेनाधिपतीनमात्यान् ।
स एष लङ्कामुपरुध्य[1] रामः
शाखामृगैकार्णवमातनोति ॥'

इति वधनिरोधावुक्तौ ।

दाहो यथा—

'प्रदीप्तपावकपरिचयपिण्ड[2] (क) स्थहेमवेश्मानः ।
क्षणमुत्पुच्छयमाने हनुमति लङ्कापुरोद्देशाः ॥'

इत्यादिना दाह इति ।

द्रवं लक्षयति—

द्रवो गुरुतिरस्कृतिः ॥ ४४ ॥

यथोत्तररामचरिते—

'वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते
सुन्दस्त्रीनिधनेऽप्यकुण्ठयशसो लोके महान्तो हि ये ।
यानि त्रीण्यकुतोमुखान्यपि पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥'

इति लवेन रामतिरस्कृतिरिति ।

शक्तिं लक्षयति—

विरोधशमनं शक्तिस्

यथोत्तररामचरिते—

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन—
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन् दृष्टे किमिति परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥'

इति रामदर्शनेन लवविरोधप्रशमनम् ।

द्युतिं लक्षयति—

तर्जनोद्वेजने द्युतिः ।

यथानर्घराघवे दशग्रीवनिग्रहे रामारोहणाय रथमुपनीतवन्तं मातलिं प्रति रावणसारधिः—

1. …मुपरुध्यमानः—M. 2. पिण्डस्थ०—M.

'दर्पोऽयं भवतः सुरासुरचमूदोःकाण्डकण्डूविष-
ज्वालाजाङ्गलिकेन जाङ्गलभुजां पत्यापि न त्याजितः ।
येनैन्द्रे रथवर्मणी रघुशिशोरस्योपनीते त्वया
राजद्विष्टमिदं विधाय स कथं शक्रो[1]ऽपि वर्तिष्यते ॥'

इति मातलिं प्रति तर्जनोद्वेजने कृत इति ।

अथ प्रसङ्गं लक्षयति—

गुरुकीर्तनं प्रसङ्गश्

केचित्तु 'अप्रस्तुतार्थवचनं[2] प्रसङ्गः परिकीर्तितः' इति व्याचक्षते ।

यथा मृच्छकटिकायाम्—'चण्डालः—एशे शाअलदत्तश्श शुदे विश्शदत्तश्श णत्तिके चालुदत्ते वावादिदुं वज्झट्ठाणं णीअदि । एदिणा किल गणिआ वशन्तशेणा शुवण्णलोहेण वावादितेत्ति । [एष सागरदत्तस्य सुतो विश्वदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते । एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादितेति ।]

चारुदत्तः—

मखशतपरिपूतं गोत्रमुद्भासितं यत्
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम निधनदशायां वर्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥'

इति चारुदत्तगुरुकीर्तनं कृतम् ।

यथा रत्नावल्याम्—'रत्नावली—देव यासौ सिंहलेश्वरेण स्वदुहिता रत्नावली' त्यादिना सागरिकागुरुकीर्तनं कृतम् ।

छलनं लक्षयति—

छलनं चावमाननम् ॥ ४५ ॥

यथानर्घराघवे—'हेमः (?) इत्यमिदधानेनोत्प्लुत्य निर्दयं शिरसि ताडितः रथध्वज-दण्डावलम्बी कथञ्चिदाश्वसिति रावणः । (सर्वतो विलोक्य च सहर्षम्) सखे पश्य—

यन्माल्यग्रथनावशेषविकलैः सन्तानकैर्ना कना
भर्त्रेऽगर्भकमेव[3] दामनिभृतैः स्वर्मालिकैर्गुम्फितम्[4] ।
तस्मिन्नद्य दशास्यमूर्धनि नवप्रस्तावनामापदां
पश्यन्तो रभसौघभर्त्सितमियः क्रोशन्ति नः स्यन्दनाः ॥'

इति सुग्रीवेण रावणावमाननं छलनम् ।

---

1. शक्रो विवर्तिष्यते—T. 2. प्रस्तुतार्थस्य वचनं—T. 3. ऽनर्भकमेव—M.
4. गुम्भितम्—M.

व्यवसायं लक्षयति—

व्यवसायस्तु शक्त्युक्तिः

केचित्तु—'व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः' इति। यथा रत्नावल्याम्—
"ऐन्द्रजालिकः:—

किं धरणीए मिअंको आआसे महिहरो जले जलणो।
मज्झण्णे वि पओसो दाविज्जउ देहि आणत्ति॥
[किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः।
मध्याह्नेऽपि प्रदोषो दर्श्यतां देह्याज्ञप्तिम्॥]

किं बहुणा [किं बहुना]

मज्झ पइण्णा एसा भणामि हिअएण जं महसि दट्ठुं।
तं ते दावेमि अहं गुरुणो मंतप्पभावेण॥
[मम प्रतिज्ञैषा भणामि हृदयेन यद्वाञ्छसि द्रष्टुम्।
तत्ते दर्शयाम्यहं गुरोर्मन्त्रप्रभावेण॥]

इत्यैन्द्रजालिकः स्वशक्तिमुक्तवान्।

यथानर्घराघवे रावणः रामं प्रति—

यत्[1] कन्यामभिलष्यता निमिपतेर्न स्थाणवीयं मया
दोर्लीलातुलितावतारितहरग्राव्णा विरुग्णं धनुः।
तद्रक्षन्त्यधुना कियन्तमवधिं यावद् भवान्त्यमी
देवेन्द्रद्विपदानदुर्दिनभिदो रौद्रार्चिषो मार्गणाः॥

इति स्वशक्तिमुक्तवान्।

विरोधनं लक्षयति—

संरब्धानां विरोधनम्।

यथानर्घराघवे—'हेमाङ्गदः—(कर्णं दत्वा) किमाह रावणः 'आः क्षत्रियवटो! वाचाट! अयं न भवसि।' (ससम्भ्रममवलोक्य) कथमुपक्रान्तमेव शरसहस्रदुर्दिनं मण्डोदरीदयितेन। रत्नचूडः—कथं मैथिलीवल्लभेनापि प्रत्युपक्रान्तमेव।

पतन्ति रामभद्रेण खण्डिता रावणेषवः।
पूर्वार्द्धैः फलिभिर्वेगात् पश्चार्द्धैः पक्षिभिश्चिरात्॥

किञ्च—

अक्षे चक्रे च दण्डे च सारथौ च हयेषु च।
खेलन्ति राक्षसेन्द्रस्य स्यन्दने रामपत्रिणः॥

---

1. यं—M.

हेमाङ्गदः—(सभयम्)

अन्धकारीकृतव्योमा बाणवर्षेण रावणः ।
रामारूढं तिरोधत्ते शताङ्गं[1] शातमन्यवम् ॥'

इति रामरावणयोः संरब्धयोः परस्परमायोधनं विरोधनमिति ।

प्ररोचनां लक्षयति—

सिद्धामन्त्रणतो भाविदर्शिका स्यात् प्ररोचना ॥ ४६ ॥

सिद्धवदभिधानेन भाविनोऽर्थस्य दर्शिका प्ररोचना।

यथा वेणीसंहारे—'कृतं सन्देहेन—

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम् ।
रामे शातकुठारभास्वरकरे क्षत्रद्रुमच्छेदिनि
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ॥'

इति वेणीसंहारयुधिष्ठिराभिषेकयोर्भाविनोः सिद्धवदामन्त्रणमिति ।

विचलनं लक्षयति—

विकत्थना विचलनम्

यथानर्घराघवे—'रावणः—

क्रोधेन ज्वलिता मुहूर्तमनु च स्वैरेव[2] निर्वापिताः
क्लीबैरश्रुमहोर्मिभिर्मखभुजां पत्युः सहस्रं दृशः ।
यैर्दृष्टा भुवनत्रयीविजयिभिः सर्वङ्कषः सन्त्यमी
ते सम्प्रत्यपि मे नयापनययोर्निर्वाहबीजं भुजाः ॥'

इति रावणो विकत्थनां कृतवानिति ।

आदानं लक्षयति—

आदानं कार्यसङ्ग्रहः ।

यथानर्घराघवे—'(नेपथ्ये)

दिव्यास्त्रैर्भूर्भुवःस्वस्त्रितयसमरणोड्डामरैर्योधयित्वा
लूनोत्क्षिप्तैः शिरोभिर्दशभिरभि[3]नभो दर्शितैकादशार्कः ।
काकुत्स्थेनावकीर्णो[4] निजविशिखशिखायोगपीठोपहूत-
ब्रह्मास्त्रेणाधिशेते रजनिचरपतेर्वीरशय्यां कबन्धः ॥'

इति रामविजयकार्यसङ्ग्रह इति ।

यथा रत्नावल्यां दह्यमानां सागरिकां श्रुत्वा 'राजा—गच्छामि । वसुभूतिः—देव, किमकारणमेव भङ्गवृत्तिः क्रियते । विदूषकः—(राजानमुत्तरीये गृहीत्वा) मा खु साहसं करेहि ।

1. रथाङ्गं—M. 2. स्थैरेव—M. 3.… रपि—T. 4.… वतीर्णो—M.

[मा खलु साहसं कुरु ।] राजा (उत्तरीयमुत्सृज्य)—मूर्ख, सागरिका दह्यते । किमद्यापि प्राणा रक्ष्यन्ते (इति ज्वलनं प्रविशति)' इत्यादिना सागरिकासङ्ग्रहं वत्सराजः कृतवानिति ।

एवमुक्तान्यवमर्शसन्ध्यङ्गानि । एषां क्रमप्राधान्ययोः सैव प्रक्रियेति ।

अथोपसंहारं लक्षयति—

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ॥ ४८ ॥
ऐकार्थ्यमुपनीयन्ते[1] यत्र निर्वहणं हि तत् ।

निर्वहणमिति उपसंहृतेरेव[2] संज्ञान्तरमिति । बीजसहिता मुखाद्यर्था यत्र परमप्रयोजन-सम्बन्धं लभन्ते, तन्निर्वहणमिति ।

यथा रत्नावल्याम्—'वसुभूतिः (सागरिकां निर्वर्ण्य अपवार्य) बाभ्रव्य सुसदृशीयं कन्या राजपुत्र्याः ।' इत्यादिना आरभ्यापरिसमाप्तेर्यौगन्धरायणव्यापारान्वितानां मुख-सन्ध्याद्यर्थानां रत्नावलीलाभ[3]चक्रवर्तित्वप्राप्त्यर्थत्वम् ।

यथानर्घराघवे रावणवधानन्तरं प्रहारविह्वलवलीमुखाच्छभल्लगोलाङ्गूलसंवल्गनव-ल्गितसुग्रीवो लक्ष्मणनिहितधन्वा बिभीषणभुजावलम्बी वीरश्रिया प्र[4]दीप्तरमणीयो रामभद्र इत्यादिना बिभीषणव्यवहारसहितस्य रामोत्साहस्य रावणविजयार्थत्वमुक्तम् ।

तदङ्गान्युद्दिशति—

सन्धिर्विरोधो ग्रथनं निर्णयः परिभाषणम् ॥४९॥
प्रसादानन्दसमयाः कृतिर्भाषोपगूहने ।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥५०॥

तत्र सन्धिं लक्षयति—

सन्धिर्बीजोपगमनं

यथा रत्नावल्याम्—'वसुभूतिः—सुसदृशीयं कन्या राजपुत्र्याः । काञ्चुकीयः—ममाप्येवं प्रतिभाति ।' इत्यनेन नायिकाबीजोपगमनं सन्धिरिति ।

विरोधं लक्षयति—

विरोधः कार्यमार्गणम् ।

यथा रत्नावल्याम्—'वसुभूतिः—देव, कुत इयं कन्या ? राजा—देवी जानाति । वासवदत्ता—अज्जउत्त एसा सागरादो पाविअत्ति भणिअ अमच्चजोगन्धराअणेण मम हत्थे णिक्खित्ता । अदो एव्व साअरिअत्ति सम्भाविअदित्ति[5] । [आर्यपुत्र, एषा सागरात् प्रापितेति भणित्वाऽमात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता । अत एव सागरिकेति

1. एकार्थमुप०—M. 2. उपसंहृतिरेव—M. 3. लाभसम्बद्धं—T. 4. वीर-क्रियाप्रदीप्तरमणीयो—T. 5. संभाविदत्ति—M.

सम्भाव्यत इति ।] राजा (आत्मगतम्) यौगन्धरायणेन न्यस्ता । कथमसौ ममानिवेद्य किमपि[1] करिष्यति ।' इत्यनेन रत्नावली[2]लक्षणकार्यान्वेषणाद् विरोध इति ।

ग्रथनं लक्षयति —

ग्रथनं तदुपक्षेपो

यथा रत्नावल्याम्—'यौगन्धरायणः—क्षम्यतां यद् देवस्यानिवेद्य मयैतत् कृतम् ।' इत्यनेन वत्सराजस्य रत्नावलीप्रापणकार्योपक्षेपाद् ग्रथनमिति ।

यथा वेणीसंहारे 'भीमः—न खलु मयि जीवति दुःशासनविलुलिता वेणिरात्मपाणिना । तिष्ठतु । स्वयमेव संहरामि ।' इत्यनेन द्रौपदीकेशसंयमनोपक्षेपाद् ग्रथनमिति ।

अथ निर्णयं लक्षयति—

ऽनुभूताख्या तु निर्णयः ॥५१॥

यथा वेणीसंहारे—'युधिष्ठिरः —

रिपोरास्तां तावन्निधनमिदमाख्याहि शतशः
प्रियो भ्राता भीमस्त्वमसि मम[3] योऽसौ बकरिपुः ।

भीमसेनः—आर्य सोऽहम् ।

युधिष्ठिरः—

जरासन्धस्योरस्सरसि रुधिरासारसलिले
तटाघातक्रीडाललितमकरः संयति भवान् ॥'

इति युधिष्ठिरः स्वानुभूतं बृकोदरबलमुक्तवानिति ।

परिभाषणं लक्षयति—

परिभाषा[4] मिथो जल्पः

'परिवाद[5]कृतं यत् स्यात्तदाहुः परिभाषणम् ।' इति केचित् ।

यथा रत्नावल्याम्—'कआवराहा देवीए मुहं दंसिदुं ण सक्कणोमि । [कृतापराधा देव्यै मुखं दर्शयितुं न शक्नोमि ।]' इत्यादिना रत्नावलीवासवदत्तायौगन्धरायणादीनां मिथो जल्पः परिभाषणमिति ।

अथ प्रसादं लक्षयति—

प्रसादः पर्युपासनम् ।

यथा रत्नावल्याम्—'वासवदत्ता—एहि रदणावलि एत्तिअं वि दाव मे भइणिआणुरूवं होउ । [एहि रत्नावलि, एतावदपि तावन्मे भगिनिकानुरूपं भवतु ।] (इति रत्नावलीं स्वैरेवाभरणैरलङ्कृत्य हस्तेन गृहीत्वा राजानमुपसृत्य) पडिच्छदु एणं

1. किमपकरिष्यति—T. 2. T omits लक्षण. 3. Missing in M, T.
4. परिभाषो—M, T. 5. परिभाष०—T.

अब्भउत्तो । [प्रतीच्छत्वेनामार्यपुत्रः ।]' इति रत्नावलीं प्रति वासवदत्ताया प्रसादनं कृतमिति ।

आनन्दं लक्षयति—

आनन्दो वाञ्छितावाप्तिः

यथा वेणीसंहारे—'(नेपथ्ये)

क्रोधान्धैर्यस्य मोक्षाद् विनिहितकुरुभिर्बान्धवैर्युद्धमध्ये
क्लृप्तान्यामुक्तकेशान्यनुदिनमधुना पार्थिवान्तःपुराणि ।
कृष्णायाः केशपाशः कुपितयमसखो धूमकेतुः कुरूणां
दिष्ट्या बद्धः प्रजाभ्यो विरमतु निधनं स्वस्ति राज्ञां कुलेभ्यः ॥'

इत्यादिना वाञ्छितावाप्तिरिति ।

समयो दुःखनिर्गमः ॥५२॥

यथा वेणीसंहारे—'युधिष्ठिरः—(सहर्षम्) भगवन्, किमुतास्य मे विजयादन्यत् स्यात् यस्य भगवान् पुराणपुरुषो मङ्गलान्याशास्ते ।

कृतगुरुमहदादिक्षोभसम्भूतमूर्तिं
गुणिनमुदयनाशस्थानहेतुं प्रजानाम् ।
अजममरमचिन्त्यं चिन्तयित्वापि न त्वां
भवति जगति दुःखं किं पुनर्देव दृष्ट्वा ॥'

इत्यादि युधिष्ठिरदुःखनिर्गमः समय इति ।

कृतिं लक्षयति—

कृतिर्लब्धार्थशमनं

लब्धस्यार्थस्य शमनं स्थिरीकरणं कृतिरिति ।

यथानर्घराघवे—'वसिष्ठः (सहर्षम्)[1] चतुर्दशवर्षैः समुदयमानं दशरथकुटुम्ब-मीक्षामहे । (विमृश्य)

जेतारं दशकन्धरस्य जितवानेवार्जुनं भार्गव-
स्तं रामो यदि काकपक्षधरस्तत्पूरितेयं कथा ।
ऊर्ध्वं कल्पयतस्तु बालचरितानुप्रक्रियागौरवा-
दन्येयं कविता तथापि जगतस्तोषाय वर्तिष्यते ॥

(रामं प्रति) वत्स, माङ्गलिकलग्न[2]मतिक्रामति ।

तदिदं राजसिंहानां सिंहासनमलङ्कुरु ।
राजन्वन्तः प्रतन्वन्तु मुदमुत्तरकोसलाः ॥

---

1. M reads 'स एव दिष्ट्या' before चतुर्दश०. 2. M omits लग्न.

(रामः तथा करोति) वसिष्ठः मन्त्रपूतमभिषिञ्चती'त्यादिना रामलब्धयोर्विजय-राज्ययोर्वसिष्ठेनाभिषेचनात्[1] स्थिरीकरणमिति ।

भाषां लक्षयति—

मानाद्याप्तिश्च भाषणम् ।

यथा रत्नावल्याम्—'राजा—किमतः परं प्रियमस्ति । पश्य—नीतो विक्रमबाहुरात्म-समताम्' इत्यादि । यथानर्घराघवे—'रामः—नातः परं प्रियमस्ति । 'ताताज्ञामविमौलि मौक्तिकमणी'त्यादि ।

अथ पूर्वभावोपगूहने लक्षयति—

कार्यदृष्ट्यद्भुतप्राप्ती पूर्वभावोपगूहने ॥५३॥

यथाक्रमं कार्यदृष्टिः पूर्वभावः, अद्भुतप्राप्तिरुपगूहनम् ।

यथा रत्नावल्याम्—'यौगन्धरायणः—एवं हि विज्ञाय भगिन्याः सम्प्रतिकरणीये देवी प्रमाणमिति । वासवदत्ता—पढमं एव्व किं ण भणासि पडिवादेहि रअणावलिं । [प्रथममेव किं न भणसि प्रतिपादय रत्नावलिम् ।]' इत्यनेन यौगन्ध[2]रायणाभिप्रायात्तस्य सागरिकाप्रतिपादनकार्यस्य वासवदत्ता[3]दर्शनमिति ।

अद्भुतप्राप्तिर्यथानर्घराघवे—'वसिष्ठः—वत्सौ भरतशत्रुघ्नौ—

चक्रे लङ्केश्वरपरिभवच्छेदनिष्णातदोष्णा
यद्वत्सेन त्रिजगदरुजं तन्न[4] चित्रीयते नः[5] ।
बालेनाजौ विगलितवतो वीर्यनिर्यासराशे-
र्यत्पिण्याकः समुनिरमुना निर्मितो[6] जामदग्न्यः ॥

(राममवलोक्य सहर्षम्)

भल्लावलूनदशकन्धरकण्ठपीठ-
सीमासमासभुजविक्रमकर्मकाण्डः ।
दिष्ट्या जगद्विजयमाङ्गलिकैर्यशोभिः
सोऽयं पुनर्नयनवर्त्मनि रामभद्रः ॥' इति ।

कार्यसंहारं लक्षयति—

वराप्तिः कार्यसंहारः

यथानर्घराघवे—'वसिष्ठः (सहर्षम्)

उदयमुदयं धर्मैकन्धान्धुरं त्वयि बिभ्रति
क्व नु परिभवौ दृष्टादृष्टौ प्रजाः परिचिन्वते ।

---

1. M omits अभिषेचनात्. 2. यौगन्धरायणस्याभिप्रायात्—T. 3. सागरिका-प्रतिपादनस्य कार्यस्य—M. 4. तच्च—M. 5. न—M. 6. निर्जितो—M.

अपि खलु मया जीवात्मानः प्रभोः परमात्मनो
दिशि दिशि दिशामष्टौ नाथास्तवैव बिभीषिकाः ॥

किं ते भूयः प्रियमुपकरोमी'[1]त्यनेन वसिष्ठेन वरदानं कृतम् ।

प्रशस्तिं लक्षयति—

प्रशस्तिः शुभशंसनम् ।

यथा वेणीसंहारे—'युधिष्ठिरः-प्रीतश्चेद् भगवांस्तदिदं भवतु—

अकृपणमतिः कान्तं जीव्याज्जनः पुरुषायुषं
भवतु भगवद्भक्तिर्द्वैतं विना पुरुषोत्तमे ।
दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित्
सततसुकृती भूयाद् भूयः प्रसाधितमण्डलः ॥' इति ।

यथानर्घराघवे—

'सरन्मीलत्सूक्ति[2]स्तबकमकरन्दैः श्रवणयो-
रविश्रामां धारां[3] सततमुपचिन्वन्ति कवयः ।
न शब्दब्रह्माख्यं परिमलमनाघ्राय च जनः
कवीनां गम्भीरे वचसि गुणदोषौ कलयतु ॥'

तत्रैव—

'देवस्यात्मभुवः कमण्डलुजलस्रोतांसि मन्दाकिनी-
गङ्गाभोगवतीमयानि पुनते यावत् त्रिलोकीमिमाम् ।
तावद्वीरयशोरसायनमधुस्यन्दः कवीनामयं
जागर्तु श्रुतिशष्कुलीवलयितव्योमावगाही पुनः ॥' इति ।

एवमुक्तानि निर्वहणसन्ध्यङ्गानि । एष्वपि तथैव क्रमप्राधान्ये इति । यथोक्तं शृङ्गार-प्रकाशे—'विधानवशाद् व्युत्क्रमेण च प्रयोगः' इति । यदत्र कैश्चिल्लक्षणान्तरमुक्तम्, केषाञ्चिदुद्वापेन केषाञ्चिदावापः कृतः, तत्राप्ययं निर्णयः । न तेषामत्यन्तबाधः कार्यः । यथासम्भवं विकल्पसमुच्चयौ[4] कार्यौ लक्षणान्तरेषूपदिष्टत्वात् लक्ष्येषु तेषां दर्शनाच्च ।

एवं सन्धिपञ्चकान्येकैकत्वेनोपपाद्य तानि सङ्ख्यया संहृत्य दर्शयन् महाप्रकरण-मुपसंहरति—

उक्ताङ्गानां चतुःषष्टिः

एषां प्रयोजनमाह–

षोढा चैषां प्रयोजनम् ॥५४॥

---

1. प्रियमुपहरामि—M. 2. सूक्तिश्रवण०—M. 3. रविश्राम्यद्धारं—T.
4.···समवायौ—T.

इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम् ।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः ॥५५॥

अभिमतार्थनिबन्धः, गोप्यानामर्थानां गूहनम्, प्रकाश्यानामर्थानां प्रकाशनम्, प्रयोगस्य रागः रञ्जकत्वम्, आश्चर्यं चमत्कारित्वम्, वृत्तान्तस्यानुपक्षयः अविच्छेद इति षट् प्रयोजनानि । एषां[1] चैभ्योऽङ्गेभ्यः सिद्धिर्विस्तरभयान्नोदाह्रियते इति लक्ष्येषु स्वयमेवानुसन्धातव्यमिति प्रयोजनदर्शनेन चावश्यमेतानि प्रबन्धे निबन्धनीयानीत्युक्तम् । तथा शृङ्गारप्रकाशे--

'इष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः ।
रागप्राप्तिः प्रयोगस्य गोप्यानां चैव गूहनम् ॥
आश्चर्यवदभिज्ञानं प्रकाश्यानां प्रकाशनम् ।
अङ्गानां षड्विधं चेदं दृष्टं शास्त्रे प्रयोजनम् ॥
अङ्गहीनो नरो यद्वन्नैवारम्भक्षमो भवेत् ।
अङ्गहीनं तथा काव्यं न प्रयोगक्षमं भवेत् ॥
काव्यं यदपि हीनार्थं सम्यगङ्गैः समन्वितम् ।
दीप्तत्वात्तत्प्रयोगस्य शोभामेति न संशयः ॥
उदात्तमपि यत्काव्यं स्यादङ्गैः परिवर्जितम् ।
हीनत्वात्तत्प्रयोगस्य न सतां रञ्जयेन्मनः ॥
तस्मात् सन्धिप्रयोगेषु यथायोगं यथारसम् ।
कार्याण्यङ्गानी' ति ।

एवं त्रिचतुराङ्गलोपेऽपि न दोषः, प्रयोजनाधीनत्वादङ्गानाम् । प्रयोजनस्य त्रिचतुराभावेऽपि सिद्धत्वात् । तथा शृङ्गारप्रकाशे—'यावन्त्यङ्गानि पठितानि तावतामेव निबन्धः कार्यः इत्येष प्रचुरप्रयोगः । संविधानकवशान् न्यूनाधिकभावेनापि प्रयोग इति ।' तथा चाभियुक्ततमकालिदासादिप्रबन्धेषु त्रिचतुराद्यङ्गविलोपेऽपि शोभाप्रकर्षो दृश्यत एव । अतोऽयं लक्ष्यलक्षणानुसारी निर्णयः । यदि समस्तान्यङ्गानि निबध्येरन्, तदा भवत्येव गुणः । यद्यपि त्रिचतुराण्यपि हीयेरन्, तदापि न दोष इति ।

न चैषां प्राधान्येनेतिवृत्तान्वयो हि निबन्धनीय इति । इतरथापि दोषाभावात् । तथा च नाटकप्रकाशे—'उपक्षेपादयः प्रबन्धेष्वाधिकारिका वा प्रयोक्तव्याः यथा सन्दर्भस्य शोभायै भवन्ती'ति । अतो वस्तुनेतृरसानुगुण्येन यानि यावन्ति यत्प्रधानानि यत्क्रमकाणि यादृशानि चाङ्गानि प्रयोजनं साधयन्ति तानि तावन्ति तत्क्रमकाणि तादृशान्यवश्यं निबन्धनीयानीति निर्णय इति ।

---

1. T omits 'एषां··· निबन्धनीयानीत्युक्तम् ।'

पुनर्वस्तु द्वेधा विभजनीयमित्याह--

द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः ।
सूच्यमेव भवेत् किञ्चिद् दृश्यं श्राव्यमथापरम् ॥५६॥

कीदृक् सूच्यं कीदृक् श्राव्यमित्याह—

नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः ।
दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः ॥५७॥

सूच्यवस्तुनः प्रतिपादनोपायान् व्युत्पादयति--

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् ।
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः ॥५८॥

विष्कम्भः चूलिका अङ्कास्यम् अङ्कावतारः प्रवेशक इति अर्थस्य सूचकाः पञ्चोपायाः । एभिः सूच्यं प्रतिपादयेदिति ।

तत्र विष्कम्भं लक्षयति--

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
सङ्क्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥५९॥

सङ्क्षेपार्थः सङ्क्षेपप्रयोजन इत्यर्थः । स च शुद्धः सङ्कीर्णश्चेति द्विधा इत्याह--

एकानेककृतः शुद्धः सङ्कीर्णो नीचमध्यमैः ।

एकेन वानेकेन वा मध्येन पात्रेण कृतः शुद्धः । नीचमध्यमैस्तु कृतः सङ्कीर्ण इति । अतो विष्कम्भके न नायकादिप्रवेशः । यद्यपि सङ्कीर्णे नीचकृतत्वमस्ति तथापि मध्यमपात्रानुप्रवेशमात्रेण मध्यमपात्रप्रयोजित इति विष्कम्भसामान्यलक्षणमुक्तमिति । शुद्धो यथानर्घराघवे षष्ठेऽङ्के । सङ्कीर्णस्तत्रैव द्वितीयेऽङ्के ।

'कुतोऽपि स्वेच्छया प्राप्तः सम्बन्धो नोभयोरपि ।
विष्कम्भाख्यः स विज्ञेयः कथांशस्यापि सूचकः ॥'

इत्यपरे ।

प्रवेशकं लक्षयति--

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ॥६०॥
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः ।

तद्वदेवेति वृत्तवर्तिष्यमाणकथांशानां सूचक[1]त्वमतिदिशति—वृत्तवर्तिष्यमाणाङ्कद्वयोक्तशेषा[2]र्थोपसूचकत्वेऽङ्कद्वयमध्यपातित्वमनुदात्तोक्त्या नीचेनैव प्रयोजितत्व[3]मिति विशेष इति । अङ्कद्वयान्तःपातितवचनेन प्रथमेऽङ्के प्रवेशकप्रतिषेधः कृत इत्यनुसन्धेयमिति ।

1. सूचकमभिदर्शयति--M. 2. शेषार्थस्य सूचकत्वाङ्कद्वय०--T; विशेषार्थो०--M. 3. प्रयोजकत्वम्—M.

विष्कम्भकस्य तु प्रथमेऽङ्केऽपि निवेश इति । तथा तृतीये वक्ष्यति—'आदौ विष्कम्भकं कुर्यादि'ति । यथा शृङ्गारप्रकाशे—

'परिजनकथानुबन्धः प्रवेशकस्तत्र विज्ञेयः ।
अङ्कच्छेदं कृत्वा मासकृतं वर्षसञ्चितं वापि ॥
तत्सर्वं कर्त्तव्यं वर्षादूर्ध्वं न तु कदाचित् ।
नोत्तममध्यमपुरुषैराचरितं नाप्युदात्तवचनकृतम् ।
प्राकृतभाषाचारः प्रयोगमासाद्य कर्त्तव्यः ॥'

तथा—

'विटमुनिदैवतपुरुषैः कञ्चुकिभिश्चार्थयुक्तिमासाद्य ।
संस्कृतवाग्भिरपीत्थं प्रवेशकः संविधातव्यः ॥
विटतापसवृद्धाद्यैर्मुनिकञ्चुकिभिस्तथा ।
प्रवेशकमपीच्छन्ति सन्तः संस्कृतभाषणैः ॥'

इति मातृगुप्तमतम् ।

तथा पुनर्भोजराज.—

'कालोत्थानगतिरसव्यत्यासारम्भकामविषयाणाम् ।
अर्थाभिधानभूतः प्रवेशकः स्यादनेकार्थः ॥
बह्वाश्रयमप्यर्थं प्रवेशकैः सङ्क्षिपेत् प्रबन्धेषु ।
अङ्केषु[1] सम्प्रयुक्तो जनयति खेदं प्रयोगस्य ॥
यत्रार्थस्य समाप्तिर्न भवत्यङ्के प्रयोगबाहुल्यात् ।
वृत्तान्तः स्वल्पकथैः[2] प्रवेशकैः संविधातव्यः ॥'
'बहुचूर्णपदोपेतो जनयति खेदं प्रयोगस्य ।'

इति परिमितवचनात्मकत्वं प्रवेशकस्योक्तम् ।

तथा—

'युद्धं राज्यभ्रंशं मरणं नगरोपरोधञ्चैव ।
अङ्कपरोक्षाण्येतान्यभिधेयानि प्रवेशकैः प्रायः ॥'

इत्युक्तः प्रवेशकः । यथा विद्धसालभञ्जिकाद्वितीयेऽङ्के ।

चूलिकां लक्षयति—

अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना ॥६१॥

नैपथ्यस्थितैरप्रविष्टैरेव पात्रैरर्थस्य या सूचना सा चूलिका इति ।

---

1. अङ्गेषु—M. 2. स्वल्पकथः—M.

'अन्तर्यवनिकासंस्थैर्मागधसूतादिभिस्तु यः क्रियते ।
अर्थस्योपक्षेपो नैकविधिश्चूलिका सासौ ॥' इति

भोजः ।

यथानर्घराघवे सप्तमेऽङ्के नैपथ्ये—

'तमिस्रामूर्च्छालत्रिजगदगदङ्कारकिरणे
रघूणां गोत्रस्य प्रसवितरि देवे सवितरि ।
पुरस्थे[1] दिक्पालैः सह परगृहावासवचनात्
प्रविष्टा वैदेही दहनमथ शुद्धा च निरगात् ॥'

अपि च—

'एकैकानि शिरांसि राक्षसचमूचक्रस्य हुत्वा निजे
तेजोऽग्नौ दशकण्ठमूर्धभिरथो निर्माय पूर्णाहुतीः ।
अद्य स्वस्त्ययनं समाप्य जगतो लङ्केन्द्रबन्दीकृतां
सीतामप्यवलोक्य शोकरभसव्रीडाजडो राघवः ॥'

क्रमेण च—

सहैव सुग्रीवविभीषणाभ्यां सौमित्रिसीतापरिपूर्णपार्श्वः ।
उपैति वैवस्वतवंशवृत्तामेध्यामयोध्यामथ पुष्पकेण ॥

अङ्कास्यं लक्षयति—

अङ्कान्तपात्रैरङ्कास्यं छिन्नोक्तार्थस्य[2] सूचनात् ।

छिन्न उक्तः अङ्कार्थो यस्योत्तराङ्कार्थस्य तस्य[3] छिन्नोक्तार्थस्य अङ्कावसानप्रविष्टैः पात्रैः सूचनमङ्कास्यमिति । एतदुक्तं भवति—उत्तराङ्कार्थस्य पूर्वाङ्कार्थाविच्छेदकरणेन[4] या सूचना तदङ्कास्यमिति ।

यथा वीरचरिते द्वितीयाङ्कावसाने रामपरशुरामयोः कलहे सञ्जाते '(प्रविश्य) सुमन्तः—भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः । इतरे क्व भगवन्तौ ? सुमन्तः—महाराज[5]दशरथस्यान्तिके । इतरे—गुरुवचनाद् गच्छामः (इति निष्क्रान्ताः सर्वे) । (द्वितीयोऽङ्कः) ।

(ततः प्रविशतो वसिष्ठविश्वामित्रौ जामदग्न्यशतानन्दौ च) वसिष्ठविश्वामित्रौ—(जामदग्न्यं प्रति)

इष्टापूर्तविधेः सपत्नगमनात् प्रेयान् मघोनः सखा
येन द्यौरिव वज्रिणा वसुमती वीरेण राजन्वती ।

---

1. पुरस्थैः—T. 2. छिन्ने कार्यस्य सूचना—M. 3. M omits तस्य.
4. कारणेन—T. 5. महाराजस्य दशरथस्या०—M.

तस्यैते वयमग्रत: किमपरं वंशस्य वैवस्वत:
सोऽयं त्वां तनयप्रिय: परिणतो राजा शमं याचते ॥

तद्विरमतु शुष्ककलहातिप्रसङ्गात्' इति पूर्वोक्तरामपरशुरामकलहविच्छेदेन तृतीयाङ्कोपक्रमार्थस्य सूचना अङ्कावसानप्रविष्टेन सुमन्त्रेण सूचनादङ्कास्यमिति ।

'सूत्रणं सकलाङ्कानां ज्ञेयमङ्कमुखं बुधै: ।' इति षट्साहस्रीकार: । तदेवात्राप्युक्तमित्येके[1] ।

'अङ्कमुखं विश्लिष्टं यत्रोपश्लिष्यते स्त्रिया[2] वाक्यै: ।
पुरुषस्य वा[3] तदङ्कमुखमिति सन्तो व्यपदिशन्ति ॥'

अङ्कावतारं लक्षयति—

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागत: ॥६२॥

उपरितनस्याङ्कस्य पूर्वाङ्कावसाने कथार्थाविच्छेदेनैव पात: प्रवेशोऽङ्कावतार इत्यर्थ: ।

'समाप्यमान[4] एतस्मिन्नितराङ्कार्थसूचनम् ।
समासतो हि नाट्यज्ञैरङ्कावतार इष्यते ॥'

इति द्वादशसाहस्रीकार: ।

यथा मालविकाग्निमित्रे प्रथमाङ्कावसाने 'विदूषक:—तेण हि दुवेवि वग्गा पक्खाघरे संगीदरअणं कदुअ अत्तहोदो दूअं पेसअंतु अहव मिअंगसद्दो एव्व णो उट्ठावइस्सदि । [तेन हि द्वावपि वर्गौ प्रेक्षागृहे सङ्गीतरचनां कृत्वात्रभवतो दूतं प्रेषयतामथवा मृदङ्गशब्द एव न उत्थापयिष्यति ।]' इत्यनन्तराङ्कादौ प्रवेक्ष्यमाणे पात्रे अभिहिते (नेपथ्ये मृदङ्गशब्द:, सर्वे कर्णं ददति) 'परिव्राजिका—हन्त, प्रवृत्तं सङ्गीतम् । तथा ह्येषा—

जीमूतस्तनितविशङ्किभिर्मयूरैरुद्ग्रीवैरनुरसितस्य पुष्करस्य ।
निर्ह्रादिन्युपहित[5]मध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि ॥

इति मृदङ्गशब्दश्रवणेन सङ्गीतं प्रवृत्तमित्यवगते (निष्क्रान्ता: सर्वे) प्रथमोऽङ्क: ।

(तत: प्रविशति सङ्गीतरचनायां कृतायामासनस्थ: सवयस्यो राजा धारिणी परिव्राजिका विभवतश्च परिवार:) राजा—भगवति, अत्रभवतोराचार्ययो: कतरस्य प्रथममुपदेशं द्रक्ष्याम: ।' इति पूर्वाङ्कप्रवृत्तहरदत्तगणदासविवादाविच्छेदेनैव विष्कम्भाद्यनन्तरितमङ्कान्तरमवतारितमिति ।

एषु विष्कम्भादिषु पञ्चसु विष्कम्भप्रवेशकयोरेवाङ्कबहिर्भाव: । चूलिकायास्तु क्वचिद्

---

1. T omits इत्येके. 2. त्रिधा—M. 3. वै—T, चै०—M. 4. T reads 'अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कावतार इष्यते'. 5. ...व्यवहित०—M.

बहिर्भावः क्वचिदङ्कमध्ये निवेश इत्यनियमः । प्रवेशविष्कम्भयोरिवाङ्काद् बहिरेव सन्निवेश इत्यनुक्तत्वाल् लक्ष्येषु च वेणीसंहारादिपञ्चमाङ्कादिषु मध्ये दर्शनाच्च । 'अङ्कमुख-गर्भाङ्काभ्यामङ्काद् बहिष्ठाभ्यां सह' इति वृत्ताविच्छेदहेतुतया भोजराजेन लक्षितत्वाच्च ।

तथा नाटकानुवृत्तौ—

'अङ्कमुखं गर्भाङ्कः कार्योऽस्मिन् चूलिकाथवा कुशलैः ।
मा भूदितिवृत्तानां विच्छेदो विस्तरो वापि ॥'

अङ्कमुखाङ्कावतारयोः स्वभावादेवाङ्काबहिर्भावः[1] इत्यनुसन्धातव्यमित्युसंहरति—

एभिः संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत् ।

इयन्तोऽङ्का नाटकादौ ईदृशाश्चेति तुरीये वक्ष्यामः ।

पुनश्च नाट्यधर्मापेक्षया वस्तुत्रैविध्यं भवतीत्याह—

नाट्यधर्ममवेक्ष्यैतत् पुनर्वस्तु त्रिधेष्यते ॥६३॥

ता एव तिस्रो विधा दर्शयति—

सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च ।

तत्र सर्वेषां श्राव्यमश्राव्यञ्च लक्षयति—

सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ॥६४॥

नियतस्यैव श्राव्यमपि नाट्यधर्ममवेक्ष्य[2] जनान्तमपवारितमिति द्वेधा भिद्यत इत्याह—

द्वेधान्यं नाट्यधर्माख्यं जनान्तमपवारितम् ।

तत्र यथाक्रमं द्वयमपि लक्षयति—

त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् ॥६५॥
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ।
रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ॥६६॥

यस्य न श्राव्यं तस्यान्तरत ऊर्ध्वसर्वाङ्गुलिकं वक्रानामिकं त्रिपताकालक्षणं करं कृत्वा अन्येन सह यदामन्त्रणं तज्जनान्तिकमिति । परावृत्यान्यस्य रहस्यकथनमपवारितमिति ।

नाट्यधर्मप्रसङ्गाद् वस्तुनिर्वाहकत्वाच्चाकाशभाषितं व्युत्पादयति—

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥६७॥

एवं व्युत्पादितं वस्तुविभागमालोच्य रामायणबृहत्कथाद्यभियुक्तं[3] लक्ष्यं च यथावन्निरूप्य उचितचारुवचःप्रपञ्चः कविर्विचित्रां कथामारचयेदित्यभिदधान उपसंहरति—

---

1. अङ्काद् बहिर्भावः—T. 2. ···मपेक्ष्य —M. 3. रामायणबृहत्कथाद्यभियुक्त-लक्षणं—M.

इत्याद्यशेषमिह वस्तुविभेदजातं
रामायणादि परिभाव्य बृहत्कथाञ्च ।
आसूत्रयेत्तदनु नेतृरसानुगुण्या-
च्चित्रां कथामुचितचारुवचःप्रपञ्चः ॥६८॥

न केवलं रस एवानुसरणीयः[1], न च वचश्चातुर्यमेव, न च नायकोत्कर्ष एव, न च लक्षणमेव, न च लक्ष्यमेव । अतो यथैषां सर्वेषां परस्परमानुगुण्यं भवेत्तथा कथाशरीर-मारभेतेति ।

प्रज्ञामयेन नेत्रेण रूपं द्रष्टुं य इच्छति ।
तत्कृते बहुरूपेण रचिता रूपदीपिका ॥

इति महामहोपाध्यायबहुरूपमिश्रविरचितायां दशरूपक[2]दीपिकायां वस्तुविचारो नाम प्रथमः प्रकाशः ।

★

1. M omits 'न ··अनुसरणीयः'. 2. दशरूपटीकायां—M.

द्वितीयः प्रकाशः

एवं तावद् वस्तुभेदः प्रपञ्चितः । इदानीं नेतारं व्युत्पादयति--

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥ १ ॥

बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥ २ ॥

नेतेति लक्ष्यनिर्देशः । विनीतत्वादिसमस्तगुणसम्पत्तिर्लक्षणम् । तत्र मधुरत्वत्यागित्व-स्थिरत्वतेजस्वित्वानां सात्त्विकेन स्वरूपमुदाहरणञ्च सात्त्विकगुणावसर एवाभिधास्यामः । दक्षशूरत्वेऽपि शोभालक्षणसात्त्विकगुणफलत्वेन[1] तत्रैवोदाहरिष्येते ।

तत्र मधुरत्वं नाम सात्त्विकगुणव्यतिरेकेण[2] हृदय[3]ङ्गमत्वमित्येके । बुद्धिर्ज्ञानम् । प्रज्ञा गृहीतविषये विशेषग्रहणम् । मानसमन्वितः अहङ्कारीत्यर्थः ।

मानसमन्वितो यथा परशुरामं प्रति रामः--

'तैस्त्रिःसप्तभिरेव राजविजयैर्यत्ते भुजस्तम्भयोः
कृत्वा तोरणमालिकां पुनरमुं द्वाविंशमारिप्सते[4] ।
द्रक्ष्यामि त्वयि वर्तमानमधुना तच्चापविद्याद्भुतं
शम्भोस्तस्य हि केवलेन धनुषा कृष्टेन तुष्टिर्न मे ॥'

रक्तलोको यथा वनं व्रजन्तं रामं प्रति युधाजित्--

'स्कन्धारोपितयज्ञपात्रनिचया स्वैर्वाजपेयार्जितै-
श्छत्रैर्वारयितुं तवार्ककिरणानेते महाब्राह्मणाः ।
साकेताः सह मैथिलैरनुपतत्पत्नीगृहीताग्नयः
प्राक्प्रस्थापितहोमधेनव इमे धावन्ति वृद्धा अपि ॥'

प्रियंवदो यथा रामो वालिनं प्रति--

'बन्दीकृत्य जगद्विजित्वरभुजस्तम्भौघदुस्सञ्चरं
रक्षोराजमपि त्वया विदधता सन्ध्यासमाधिव्रतम् ।
प्रत्यक्षीकृतकार्तवीर्यचरितामुन्मुच्य रेवां समं
सर्वाभिर्महिषीभिरम्बुनिधयो[5] विश्वेऽपि विस्मायिताः ॥'

---

1. ...फलत्वे--T. 2. व्यतिरेके--M. 3. हृदयशमत्व०--M. 4. ...रिप्ससे--M.
5. निचयो--M.

एवमन्येऽपि गुणा उदाहार्याः ।

अत्र गुणतारतम्येन नायकतारतम्यमप्यूहनीयम् । तत्र समस्तगुणयुक्त उत्तमः, कतिपयगुणहीनो मध्यमः, बहुगुणविहीनोऽधमः । एतेषां[1] च मध्ये क्वचित् केचिदुद्भूततया कविभिर्वर्ण्यन्ते । यथा जीमूतवाहनादौ त्यागादयः, रामादौ लोकानुरागादयः ।

नायकभेदं व्युत्पादयति--

भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम् ।

ललितः शान्त उदात्त उद्धत इति चतुर्धा भिद्यते । तत्र धीरललितं लक्षयति--

निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः ॥ ३ ॥

धीरशान्तं लक्षयति--

सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः ।

सत्यपि चतुर्णां सामान्यगुणयोगे धीरशान्तेऽवश्यम्भावं सूचयितुमित्येके । अन्येषां धीरललितादीनामपि प्रदर्शनार्थमित्येके । द्विजादिक इति विप्रवणिक्सचिवानां शमप्रधानानां ग्रहणम्[2] ।

तथा चोक्तम्--

'धीरशान्ताश्च विज्ञेया ब्राह्मणा वणिजश्च ये' इत्यादि ।

भोजराजेन धीरशान्तनायकप्रकरणं लक्षयतोक्तम्—

'विप्रवणिक्सचिवानां पुरोहितामात्यसार्थवाहानाम् ।
[3]चरितं यन्नैकविधं तज्ज्ञेयं प्रकरणं कृतिभिः ॥' इति ।

अस्यापि कलासक्त्यादिरेकैको धीरललितगुणोऽस्त्येव लक्ष्येषु दृष्टत्वादविरुद्धत्वाच्च । तद्गुणसमुदायस्तु नोद्भूत इति विवेकः ।

धीरोदात्तं लक्षयति—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ॥ ४ ॥
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ।

धीरोद्धतं लक्षयति—

दर्पमात्सर्यभूयिष्ठो मायाच्छद्मपरायणः ॥ ५ ॥
धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः ।

एषु विशेषलक्षणेषु ये सामान्यगुणाः पुनरुपात्तास्ते तत्तन्नायकभेदेष्ववश्यम्भाविन इत्यनुसन्धेयम् । ये च सामान्यगुणविरोधेन विशेषलक्षणेषु मायाच्छद्मादय उक्तास्तद्बलेन तत्तद्विशेषेषु विरोधिभिः सामान्यगुणा बाधितव्या इति । एतदुक्तं भवति--प्रमात्यायत्त-

---

1. एषां—M. 2. M reads चोक्तं after ग्रहणं. 3. चरितं नैकविधं तद्विज्ञेयं--M.

सिद्धिरन्तःपुरव्यापारेषु नृत्तगीतादिषु सक्तो युद्धादिदुःखपराङ्मुखः शृङ्गारप्रधानो धीरललितः, कलादिसक्तो युद्धादिक्लेशेषु सहिष्णुः शमप्रधानो द्विजादिकश्च धीरशान्तः, सङ्ग्रामसागरसन्तरणादिमहापदानक्षमो वीराद्भुतप्रायारम्भो लोकोत्तरगुणयुक्तो धीरोदात्तः, एवं भरसहो रौद्रभयानकप्रायारम्भो मायेन्द्रजालादिभूयिष्ठो धीरोद्धतः। एषां चतुर्णामपि धैर्यस्यावश्यम्भावः। तदुत्तरपदोपात्तलालित्यादीनाञ्च यथासम्भवमवश्यम्भावो द्रष्टव्यः।

तत्र धीरोदात्तो यथा—रामजीमूतवाहनादयः, धीरोद्धतो यथा रावणजामदग्न्यादयः, धीरशान्तो यथा माधवादयः, धीरललितो यथा विद्याधरमल्लदेववत्सराजादयः।

एवं चतुर्विधस्य[1] नायकस्य नायिकासु शृङ्गारप्रत्ययवत्तया चातुर्विध्यमाह—

स दक्षिणः शठो धृष्टः[2] पूर्वां प्रत्यन्यया हृतः ॥ ६ ॥
दाक्षिण्योऽस्यां सहृदयो गूढविप्रियकृच्छठः।
व्यक्ताङ्गवैकृतो धृष्टोऽनुकूलस्त्वेकनायिकः ॥ ७ ॥

अन्यया नायिकया हृतो दक्षिणः शठो धृष्ट इति त्रेधा। [3]अनुकूलश्चैक इति संहत्य चत्वारः। तत्र दक्षिणो नाम पूर्वस्यां सबहुमानः, शठो नाम तस्यां गूढविप्रियकारी, धृष्टो नाम व्यक्तान्ययुवतिनखलदमादिकः, एकैव नायिका यस्य सोऽनुकूल इति। तत्र धीरोदात्तोऽनुकूलो यथा रामजीमूतवाहनादयः, तयोः सीतामलयवतीव्यतिरेकेण नायिकाभावात्। धीरललितो दक्षिणो यथा विद्याधरमल्लदेववत्सराजादिः, धीरशान्तोऽनुकूलो यथा माधवादिः। एवमन्येऽपि भेदा उदाहार्याः। शठधृष्टौ तु न प्रबन्धे प्रधाननायकाविति उपनायकादिषु तयोरुदाहरणं द्रष्टव्यम्।

एवं धीरोदात्तादीनां चतुर्णामपि एकैकत्वेन दक्षिणत्वादिचातुर्विध्यान्नायकस्य षोडशविधत्वमुक्तम्। षोडशानामपि उत्तममध्यमाधमविभागेनाष्टाचत्वारिंशन्नायका इति नायकसङ्ग्रहः। एवं तावन्नायको लक्षितः।

इदानीं तत्सहायलक्षणावसरे उपनायकं तावद् व्युत्पादयति—

पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः।
अस्यैवानुचरो भक्तः किञ्चिदूनश्च तद्गुणैः ॥ ८ ॥

यथा नखकुट्टः[4]—

'वेश्याचारः पीठमर्दः षिङ्गो वा तत्सुतोऽपि सः।'
यथा मकरन्दादिः।

विटं व्युत्पादयति—

1. चतुर्विधनायकस्य—T. 2. हृष्टः—M, T. 3. M reads तेषु before अनुकूल०. 4. निखण्डकृतः—M.

एकविद्यो विटश्चान्यो

मन्मथ[1]तन्त्रकौशलमेव विद्यात्वेनोक्तम् । यथा मलयवतीपरिणयने शेखरकादिः ।

विदूषकं लक्षयति--

हास्यकृच्च विदूषकः ।

हास्यकृदित्यनेन हास्यहेतुभूतविकृताङ्गवेषत्वादिकम[2]प्युक्तम् । 'विकृताङ्गवचोवेषै हास्यकृच्च विदूषक' इत्युक्तत्वात् ।

प्रतिनायकं लक्षयति--

लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यसनी रिपुः ॥ ९ ॥

स्तब्धः दीर्घसूत्रः, द्यूतमृगयादिषु सक्तः, रिपुः प्रतिनायकः । यथा रामयुधिष्ठिरयो रावणदुर्योधनाविव ।

एवं नायकोपनायकपीठमर्दविदूषकान् व्युत्पाद्य सात्त्विकान् गुणानाह—

शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ।

ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥ १० ॥

तत्र शोभामाह—

नीचे घृणाधिके स्पर्द्धा शोभायां शौर्यदक्षते ।

शोभायां सत्यां नीचे घृणादयो भवन्तीति शोभाफलभूतैर्गुणैः शोभालक्षणमुक्तमिति ।

तत्र नीचे घृणा यथा--

'उत्तालताटकोत्पातदर्शनेऽप्यप्रकम्पितः ।
नियुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सते ॥'
'यदधिकरणं धर्मं स्वीयं तवैव वचांसि नः ।' इति ।

अधिके स्पर्द्धा यथा--

'एतां पश्य पुरस्थलीमिह किल क्रीडाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः ।
इत्याकर्ण्य कथाद्भुतं[3] हिमनिधावद्रौ सुभद्रापते-
र्मन्दं मन्दमकारि[4] येन निजयोर्दोर्दण्डयोर्मण्डलम्[5] ॥'

शौर्यं यथा--

'यत्रैरावततीव्रदन्तमुसलैरेरण्डकाण्डायितं
वज्रेणापि विकीर्णवल्लितडितामा···नालायितम् ।
मद्वक्षस्यवलम्ब्य किञ्चिदधुना तद्विस्मृतं वज्रिणा
युद्धं यद्यविलम्बमेतु स पुनः सज्जोऽस्म्यहं रावणः ॥'

---

1. वेषादिक०--T. 2. तत्त्व०—M. 3. तथाद्भुतं--M. 4. मन्दमहारि—M. 5. मण्डनम्—M.

दाक्ष्यं क्षिप्रकारित्वम् । यथा दशरथविप्रलम्भविष्कम्भे--

'दोःस्तम्भद्वयदर्पडम्बरमिति स्पष्टं न[1] विस्पन्दते
वैदेहीकरबन्धसूचनमिति प्रस्तौति न व्रीडया ।
इत्यालोच्य कृतस्मितैर्मुनिभिरादिष्टेन येन क्षणा—
दात्तं वन्दितमाञ्चितं च सहसा भग्नं तदैशं धनुः ॥'

विलासं लक्षयति—

गतिः सधैर्या दृष्टिश्च विलासे सस्मितं वचः ॥ ११ ॥

यथा--

'दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद् गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव ॥'

माधुर्यं लक्षयति—

श्लक्ष्णो विकारो माधुर्यं संक्षोभे सुमहत्यपि ।

यथा--

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम् ।
निजं पश्यन् शृण्वन् रजनिचरसेनाकलकलं[2]
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥'

गाम्भीर्यं लक्षयति—

गाम्भीर्यं यत्प्रभावेन विकारो नोपलक्ष्यते ॥१२॥

यद्बलेन शोकहर्षादिविकारानुपलम्भस्तद् गाम्भीर्यमिति । यथा—

'आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥'

स्थैर्यं लक्षयति—

व्यवसायादचलनं स्थैर्यं विघ्नकुलादपि ।

यथा—

'प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥'

1. च--M. 2. ......कलकलज्जटा०—M.

तेजो लक्षयति—

अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि[1] ॥ १३ ॥

यथा—

'विफलीकृतयत्नस्य क्षतबाणस्य शम्भुना ।
गाण्डीवधन्वनः खेभ्यो निश्चचाल हुताशनः ॥'

ललितं लक्षयति—

शृङ्गाराकारचेष्टात्वं[2] सहजं ललितं मृदु ।

यथा—

'अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पकेतुः ॥'

औदार्यं लक्षयति—

[3]प्रियोक्त्याजीविताद् दानमौदार्यं सदुपग्रहः ॥१४॥

प्रियवचनपूर्वकं जीवितादेरपि दानं सतामुपग्रहश्चौदार्यमिति ।

यथा—

'सिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवैव[4] तावत् किं भक्षणात् त्वं विरतो गरुत्मन् ॥'

पात्रे यथा—

'पात्रे पुरोवर्तिनि विश्वनाथे क्षोदीयसि क्ष्मावलये च देवे ।
व्रीडास्मितं तस्य तदा तदासीत् चमत्कृतो येन स देवदेवः[5] ॥'

सदुपग्रहो यथा—

'[6]एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥'

अथ नायिकामाह—

स्वान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा ।

यथासम्भवं नायकगुणोपेता नायिका स्वीया अन्यदीया साधारणीति त्रेधा भिद्यत इत्यर्थः । तत्र स्वीयां शीलार्जवमन्मथोपचारादियोगेन सामान्यतो लक्षयन् त्रेधा विभजते—

मुग्धा मध्या प्रगल्भेति स्वापि (? स्वीया) शीलार्जवादियुक् ॥१५॥

---

1. प्राणात्ययेऽपि च—M. 2. चेष्टत्वं—M, T. 3. प्रियोक्त्याज्जीविताददान-मौदार्यं समुपग्रहः—M. 4. तवेह—T. 5. एव देवः—M. 6. एके—T.

शीलार्जवाद्युपेता स्वीया । सापि मुग्धा मध्या प्रगल्भेति त्रिधा भिद्यत इति ।

मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि ।

नववयोमन्मथा सुरतादिषु स्वयमप्रवृत्ता क्रोधे चातिसुलभानुनया मुग्धेत्यर्थः ।

रतौ वामा यथा—

'विरम नाथ विमुञ्च ममाञ्चलं शमय दीपमिमं न गता सखी ।
इति नवोढवधूवचसा युवा मुदमवाप परां सुरतादपि ॥'

वयसा मुग्धा यथा—'दोर्मूलावधिसूत्रितस्तनमुरः' इति ।

नवकामा यथा—'रोमाञ्चोऽयं स्तनतट' इति ।

सुलभानुनया यथा—'मन्यौ कृते प्रथममेवे'ति ।

मध्यां लक्षयति—

मध्योद्यद्यौवनानङ्गा मोहान्तसुरतक्षमा ॥ १६ ॥

उद्यद्यौवना यथा—'आलापाद् भ्रूविलासो विरल' इति ।

उद्यदनङ्गा यथा—'कान्ते तथा कथमपि प्रथितमि'ति ।

मोहान्तसुरता यथा—

'तावच्चिअ रइसमये महिलाणं बिब्भमा विराअन्ति ।
जाव ण उप्पलदलसच्छहाइँ मउलेन्ति णअणाइं ॥'
[तावदेव रतिसमये महिलानां विभ्रमा विराजन्ते ।
यावन्नोत्पलदलसच्छायानि मुकुलीभवन्ति नयनानि ॥]

इयं च मध्या धैर्यमानवृत्तिभ्यां धीरा अधीरा धीराधीरा चेति त्रेधा भिद्यत इत्याह—

धीरा सोत्प्रासवक्रोक्त्या मध्या साश्रु कृतागसम् ।
खेदयेद् दयितं कोपादधीरं परुषाक्षरम् ॥१७॥

[1]तत्र कृतापराधं नायकं धीरा सोत्प्रासवक्रोक्त्या वदति, धीराधीरा साश्रुवक्रोक्त्या वदति, अधीरा परुषाक्षरं वदन्ती दयितं खेदयति[2] ।

धीरा यथा—

'क्रोधो यत्र भ्रुकुटिरचना विग्रहो यत्र मौनं
यत्रान्योऽन्यस्मितमनुनयो दृष्टिपातः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वत्पादान्ते लुठति न च मे मन्युमोक्षः खलायाः ॥'[3]

---

1. अत्र—T. 2. खेदयेदिति—M. 3. M, T read इत्यमरुकः after '......खलायाः ॥'.

धीराधीरा यथा—

'बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥'[1]

अधीरा यथा—

'यातु यातु किमनेन तिष्ठता मुञ्च मुञ्च सखि मादरं कृथाः ।
खण्डिताधरकलङ्किनं प्रियं शक्नुमो न नयनैर्निरीक्षितुम् ॥'

एवं मध्या लक्षिता । इदानीं प्रगल्भामाह—

यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्के ।
विलीयमानेवानन्दाद्रतारम्भेऽप्यचेतना ॥१८॥

प्राप्तयौवनमन्मथा रतारम्भेऽप्यानन्दातिशयान्मुह्यन्तीव प्रगल्भेति ।

काष्ठाप्राप्तयौवना यथा—

'स्तनतटमतीव तुङ्गं निम्नो नाभिः समुन्नतं जघनम् ।
विषमे मृगशावाक्ष्या वपुषि नवे क इव न स्खलति ॥'

स्मरोन्मत्ता यथा—'यत्र स्वेदजलैरि'त्यादि ।

दयिताङ्के विलीयमाना यथा—'स्वामी भङ्गुरये'त्यादि ।

रतारम्भेऽप्यचेतना यथा—

'कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनात्
तद्वासः श्लथमेखलागुणधृतं किञ्चिन्नितम्बे स्थितम् ।
एतावत् सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः
कोऽसौ कास्मि कथं नु किञ्च सुरतं स्वल्पापि मे न स्मृतिः ॥'

प्रगल्भामपि धैर्यमानवृत्तिभ्यां त्रेधा[2] विभजते—

सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा ।
सन्तर्ज्य ताडयेन्मध्या मध्याधीरेव तं वदेत् ॥१९॥

तत्र धीरा कोपादिविकारगूहनोपचारवती रतावुदास्ते । इतरा त्वधीरा क्रोधेन दयितं सन्तर्ज्य ताडयति । मध्या तु धीराधीरा मध्याधीरेव तं वदति ।

तत्र सावहित्थादरा धीरा यथा—

'एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरत—
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।

1. M reads इति श्रुतिकुमारगर्भः, T reads इति शितिकुमारगर्भः after '..... रुद्यते ॥'. 2. मध्यावत् त्रिधा—M.

आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपकारतश्चतुरया कोपः कृतार्थीकृतः ॥'[1]

सैव रतावुदासीना यथा--'आयस्ता कलहं पुरैव कुरुत' इति ।

अधीरा प्रगल्भा यथा--

'कोपात् कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा मोहनमन्दिरं दयितया सायं सखीनां पुरः ।
भूयो द्रक्ष्यसि तां शठेति वचनैः संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥'

धीराधीरा यथा—'कोपो यत्र भ्रुकुटी'त्यादि ।

एवमेकैकं त्रिविधयोर्मध्याप्रगल्भयोर्ज्येष्ठाकनिष्ठाविभागेन द्वैविध्याद् द्वादशविधत्वं दर्शयन्नुपसंहरति—

द्वेधा ज्येष्ठा कनिष्ठा चेत्यमुग्धा द्वादशोदिताः ।

एवं स्वीया व्युत्पादिता । स्वीयत्वं नामैतदेव । यथाह रुद्रटः—

'सम्पत्तौ च विपत्तौ च मरणेऽपि न मुञ्चति[2] ।
सा स्वीया तां प्रति प्रेम जायते पुण्यकर्मणाम् ॥'[3]

अन्यस्त्रियमपि कन्यकोढाभावेन द्विधा विभजते—

अन्यस्त्री कन्यकोढा च

तत्र कन्यानुरागस्याङ्गाङ्गिरसयोरप्यनुज्ञां दर्शयन्नन्योढानुरागमङ्गिरसे प्रतिषेधति—

नान्योढाङ्गिरसे क्वचित् ॥२०॥

कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गिसंश्रयम् ।

साधारणीं लक्षयति—

साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक् ॥२१॥

तस्याः प्रहसनाद्यौपयिकं स्वाभाविकं रूपमाह —

छन्नकामसुखार्थाज्ञस्वतन्त्राहंयुपण्डकान् ।
रक्तेव रञ्जयेदाढ्यान् निःस्वान् मात्रा विमोचयेत् ॥२२॥

छन्नकामाः श्रोत्रियलिङ्गिप्रभृतयः । सुखार्थः सुखप्रयोजनः सुखपर इत्यर्थः । स्वतन्त्रः निर्यन्त्रणः । अहंयुः अहङ्कृतः । पण्डकः षिड्गबालषण्डादिः । आढ्यानेतान् रक्तेव भूत्वा रञ्जयति, निःस्वान् स्वतो मात्रा निष्कासयति । एतच्च रूपं प्रहसनादौ हास्यहेतुत्वात्

1. M, T read इत्यमरुकः after '……कृतार्थीकृतः ॥' 2. मुञ्चते--M. 3. M, T read 'यथा रामस्य सीता । एवं स्वीया व्युत्पादिता ।' after '………पुण्यकर्मणाम् ॥'

निबन्धनीयमिति प्रहसनव्यतिरिक्ते प्रकरणादौ रक्तैवैषा विधातव्येत्याह--

रक्तैव त्वप्रहसने नैषा दिव्यनृपाश्रये ।

प्रधानरसगोचरोऽयं प्रतिषेधः । अतो नाटकेऽप्यस्या अप्रधानतया निबन्धे न दोषः । यथा मालविकाग्निमित्रेऽग्निमित्रस्यैरावतीति । केचित् प्राहुः--'[1]न क्वापि प्रहसनादिव्यतिरिक्ते शृङ्गाररसनिष्यन्दिनि प्रकरणादौ गणिकाया निबन्धः कार्यः, गुणवत्यपि नायके तस्या अनुरागाभावात् ।' तथा चोक्तमभियुक्तैः—

'साधारणस्त्री गणिका सा वित्तं परमिच्छति ।
निर्गुणेऽपि न विद्वेषो न[2] रागोऽस्या गुणिन्यपि ॥'

अतः शृङ्गाराभास एव तासु स्यान्न शृङ्गारः । अतः प्रहसनादावेव विधेयेति । अत्रोच्यते—किमिहान्यद् वक्तव्यम् । रसिकसार्वभौमो रुद्रट[3] एवात्रोत्तरमाह—

'किन्तु तासां कलाकेलिकुशलानां[4] मनोरमम् ।
विस्मारितापरस्त्रीकं सुरतं जायते यथा ॥
गाढा[5]लिङ्गनपीडितस्तनतटं स्विद्यत्कपोलस्थलं
सन्दष्टाधरमुक्तसीत्कृतमुरु भ्राम्यद् भ्रु नृत्यत्कुचम् ।
चाटुप्रायवचोविचित्रभणितैर्घातै रुतैश्चाङ्कितं
वेश्यानां धृतिधाम पुष्पधनुषः प्राप्नोति धन्यो रतम् ॥
ईर्ष्याकुलस्त्रीषु न नायकस्य निःशङ्ककेली न पराङ्गनासु ।
वेश्यासु चैतद् द्वितयं प्ररूढं सर्वस्वमेतास्तदहो स्मरस्य ॥
कुप्यत्पिनाकिनेत्राग्निज्वालाभस्मीकृतः पुरा ।
उज्जीवितः पुनः कामो मन्ये वेश्याविलोकितैः ॥' इति ।

तथा चाहु[6]रन्येऽभियुक्ताः—

'कलाविलासवैदग्ध्यवसतिर्गणिकाजनः ।
पुंसां सौभाग्यवैदग्ध्यनिकषः[7] केन निर्मितः ॥'

अतः प्रकरणादौ रक्ता सती विधातव्येति । एवं मुग्धासहिता त्रयोदशधा स्वीया । गणिका चैका अन्यस्त्री कन्यकोढेति द्विधेति षोडशधा[8] नायिका व्युत्पादिताः ।

आसामिदानीं स्वाधीनपतिका वासकसज्जा विरहोत्कण्ठिता खण्डिता कलहान्तरिता विप्रलब्धा प्रोषितपतिका अभिसारिका चेत्यष्टाववस्था स्युरित्याह—

---

1. M omits 'न क्वापि ...... तथा चोक्तमभियुक्तैः'. 2. 'न रागो (?) स्याद् गुणिन्यपि'—M, 'ऽनुरागोऽस्या गुणिन्यपि'--T. 3. रुद्रभट—M. 4. कौशलानां—M. 5. गाढालिङ्गनपीडितस्तनतटे विद्यत्कपोलस्थलं—M. 6. तथाहु॰—M. 7. निकर्षः—M. 8. षोडशा—T.

आसामष्टाववस्थाः स्युः स्वाधीनपतिकादिकाः ॥२३॥

तत्र स्वाधीनपतिकां लक्षयति—

आसन्नायत्तरमणा हृष्टा स्वाधीनभर्तृका ।

प्रियतमसमागममुदिता स्वाधीनपति[1]केत्यर्थः ।

यथा—

'मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि भाजनमीदृशानां
वैरी न चेद् भवति वेपथुरन्तरायः ॥'

यथा वा—

'लिखति कुचयोः पत्रं कण्ठे निवेशयति स्रजं
तिलकमलिके कुर्वन् सर्वानुदस्यति कुन्तलान् ।
इति चटुशतैर्वारं वारं वपुः परितः स्पृशन्
विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः ॥'

इति रुद्रटः ।

वासकसज्जामाह—

मुदा वासकसज्जा स्वं मण्डयत्येष्यति प्रिये ॥२४॥

प्रियतमागमनं निश्चित्य या कल्पितोपभोगोपकरणा स्वास्तीर्णमृदुसुकुमारशयनीया चन्दनघुसृणभूषादिभिरात्मानं मण्डयति मुदा[2] सा वासकसज्जा । यथा—

'तल्पकल्पन[3]विधेरनन्तरं भर्तृमार्गमवलोकते मुहुः ।
दर्पणे क्षणमुदीक्षते वपु[4]र्हर्षभूषणमनिन्द्यभूषणा ॥'

विरहोत्कण्ठितां लक्षयति—

चिरयत्यव्यलीके तु विरहोत्कण्ठितोन्मनाः ।

अनपराधे[5] दयिते चिरयति अनागतनिमित्तोत्प्रेक्षणसमाकुला विरहोत्कण्ठिता । यथा—

'किं रुद्धः प्रियया कदाचिदथवा सख्या ममोद्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य[6] मृगीदृशा[7] करतले संस्थाप्य वक्त्राम्बुजं
दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः ॥'

---

1. स्वाधीनभर्तृकेत्यर्थः—T. 2. M omits मुदा. 3. कल्पक०—T. 4. मुहु०—M. 5. अनपराद्धे—T. 6. ...लोक्य—M. 7. मृगीदृशः—T.

खण्डितां लक्षयति—

ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता ॥२५॥

प्रिये अन्ययुवतिसमागमविह्नवति दृष्टे ईर्ष्याकषायिता खण्डितेति । यथा—

'लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले
वक्त्रे कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपरः ।
दृष्ट्वा कोपविधायि मण्डनमिदं [1]प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः ॥'

कलहान्तरितामाह—

कलहान्तरितामर्षाद् विधूतेऽनुशयार्तियुक् ।

अमर्षाद्[2] दयितेऽवज्ञाते गते अनुशयार्तिमती कलहान्तरिता । यथा—

'निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते
निद्रा नैति न दृश्यते प्रियमुखं नक्तन्दिवं रुद्यते ।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तथोपेक्षितः
सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः ॥'

विप्रलब्धां लक्षयति—

विप्रलब्धोक्तसमयमप्राप्तेऽतिविमानिता ॥२६॥

उक्तसङ्केतमप्राप्ते दयितेऽतितरां विमानिता विप्रलब्धेति । यथा—

'उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः ।
यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः ॥'

प्रोषितप्रियामाह—

दूरदेशान्तरस्थे तु कार्यतः प्रोषितप्रिया ।

कार्यवशाद् दूरदेशान्तरं गते नायके नायिका प्रोषितप्रियेति ।
यथा—

'आदृष्टिप्रसरात् प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विश्रान्तेषु पथिष्वहःपरिणतौ ध्वान्ते समुपसर्पति ।
गत्वैकं सशुचा गृहं प्रतिपदं पान्थस्त्रियास्मिन् क्षणे
मा भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥'

अभिसारिकामाह—

कामार्ताभिसरेत् कान्तं सारयेद् वाभिसारिका ॥२७॥

1. प्रास०—T. 2. T omits अमर्षाद्.

या तु कामार्ता प्रियमभिसरति, या तु दूतीवचनादिना प्रियमभिसारयति सोभयाप्यभिसारिकेति ।

अभिसरन्ती यथा—

'उरसि निहितस्तारो हारः कृता जघने घने
कलकलवती काञ्ची पादौ रणन्मणिनूपुरौ ।
प्रियमपि सरस्येवं मुग्धे किमाहतडिण्डिमा
किमपरस्त्रासोत्कम्पं दिशः समुदीक्षते ॥'

अभिसारयन्त्यप्युदाहर्तव्येति ।

आसां[1] मध्ये स्वाधीनपतिकावासकसज्जावर्जमन्याः षडपि चिन्तानिःश्वासाद्यैर्युक्ताः[2] । ते च स्वाधीनपतिकावासकसज्जे द्वेऽपि क्रीडौज्ज्वल्यादिभिर्युक्ते । अन्यासां षण्णां प्रियतमसमागमाभावात् स्वाधीनपतिकायाः प्रियतमसम्भोगात् वासकसज्जायाश्च तन्निश्चयादित्याह—

चिन्तानिःश्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणैः ।
युक्ताः षडन्त्या द्वे चान्ये क्रीडौज्ज्वल्यप्रहर्षितैः ॥२८॥

एवं षोडश विधाया नायिकाया अष्टावस्थात्वम् । एतासामपि पुनरुत्तमाधममध्यमभावेन त्रैविध्यम् । अतो नायिकानां शतत्रयमशीतिश्चतुरुत्तरा सम्पन्नेति ।

यथाह रुद्रटः—

'त्रयोदश विधा स्वीया द्विविधा चापराङ्गना ।
एका वेश्या पुनश्चाष्टाववस्थाभेदतोऽपि ताः ॥
पुनश्च ता स्त्रियः सर्वा उत्तमाधममध्यमाः ।
इत्थं शतत्रयं तासामशीतिश्चतुरुत्तरा ॥'

केचित् परस्त्रियस्त्र्यवस्थत्वमेव[3] वर्णयन्ति । तदाहुः—

'त्र्यवस्थैव परस्त्री स्यात् प्रथमं विरहात्मना ।
ततोऽभिसारिका भूत्वा ऽभिसरन्ती व्रजेत् स्वयम् ॥
सङ्केताच्च परिभ्रष्टा विप्रलब्धा भवेत् पुनः ।
पराधीनपतित्वेन नान्यावस्थात्र सङ्गता ॥' इति ।

एतेषां मते न रुद्रटोक्तसङ्ख्यासम्पत्तिरिति ।

आसामिदानीं मन्मथतन्त्र[4]साचिव्यकारिणीराहुः—

दूत्यो दासी सखी कारूर्धात्रेयी प्रातिवेशिका ।
लिङ्गिनी शिल्पिनी स्वा च नेतृमित्रगुणान्विताः ॥२९॥

---

1. M omits आसां मध्ये. 2. चिन्तानिःश्वासादियुक्ताः—M. 3. T omits एव, 4. M omits तन्त्र.

नायकसहायपीठमर्दादिगुणायत्ताः सख्यादयो दूत्य इति। काखः रजकादिस्त्री। प्रतिवेशिनी प्रतिवेशवनिता। शिल्पिनी चित्रकारादिस्त्री। लिङ्गिनी परिव्राजिका। स्वयं चेत्यादयो दूतीविशेषाः। आसामुदाहरणानि द्रष्टव्यानि।

एवं तावन्नायिकास्तद्दूत्यश्च व्युत्पादिताः। इदानीं मनोवाग्बुद्धिशरीरारम्भेषु चित्तारम्भान् स्त्रीणामलङ्कारानाह—

यौवने सत्त्वजाः स्त्रीणामलङ्कारास्तु विंशतिः।
[[1]भावो हावश्च हेला च त्रयस्तत्र शरीरजाः ॥३०॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।
औदार्यं धैर्यमित्येते सप्त भावा अयत्नजाः ॥३१॥]

लीलाविलासादीनां शरीरारम्भत्वेन सात्त्विकत्वाभावेऽपि 'छत्रिणो गच्छन्ती'तिवत् तल्लिङ्गत्वेन सत्त्वजा विंशतिरलङ्कारा इत्युक्तम्। लीलादीनाञ्च शरीरारम्भत्वेन भोजराजादिभिरुक्तत्वादिति। ते च भावः हावः हेला शोभा कान्तिः माधुर्यं दीप्तिः प्रागल्भ्यम् औदार्यं धैर्यमिति दश चित्तारम्भाः।

लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम्।
मोट्टायितं कुट्टमितं बिब्बोको ललितं हृतम् ॥३२॥

इति दश शरीराम्भाः।

तत्र सत्त्वं लक्षयंस्तत उत्पन्नं भावं लक्षयति—

निर्विकारात्मकात् सत्त्वाद् भावस्तत्राद्यविक्रिया।

प्रकृतिस्थं चेतः सत्त्वम्। तत उत्पन्नः प्रथमो विकारो भाव इति। यथाह—

'चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति।
ततोऽल्पा विकृतिर्भावो बीजस्यादिविकारवत् ॥'

यथा—

'दृष्टिः सालसतां बिभर्ति न शिशुः क्रीडासु बद्धादरः
श्रोत्रे प्रेषयति प्रवर्तितसखीसम्भोगवार्तास्वपि।
पुंसामङ्कमपेतशङ्कमधुना नारोहति[2] प्राग्यथा
बाला नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः ॥'

[3]हावं लक्षयति—

हेलाकृतः सशृङ्गारो हावोऽक्षिभ्रूविलासकृत् ॥३३॥

[4]हेलाहेतुः सशृङ्गारः अक्षिभ्रूविलासकारी किञ्चिज्जातप्रकर्षः स एव हावः। यथा—

1. M, T omit 'भावो…अयत्नजाः'. 2. नारोहति:—M. 3. M, T read द्वितीयं before हावं. 4. M omits हेलाहेतुः.

'गामणि सुग्राग्र संपइ दरवलिग्रविग्रड्ढमुद्धणग्रणेहिं ।
तरुणं पेच्छंतीए हावो भुमग्राहियो भुमिग्रो ॥
[ग्रामणीसुतायाः सम्प्रत्युपभुक्तविदग्धनयनाभ्याम् ।
तरुणं प्रेक्षमाणाया हावो भ्रूाहितो भ्रान्तः ॥]'

हेलां लक्षयति—

स एव हेला सुव्यक्तशृङ्गाररससूचिका ।

स[1] एव जातसुव्यक्तप्रकर्षशृङ्गारः हेलेति । यथा—

'तां कुमारीं पुरः प्रेक्ष्य सर्वाङ्गैस्तदचेष्टत ।
येनाजनि कुमारीत्वे सखीनामपि संशयः ॥'

शोभां लक्षयति—

रूपोपभोगतारुण्यैः शोभाङ्गानां विभूषणम् ॥३४॥

यथा—

'तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः ॥'

कान्ति लक्षयति—

मन्मथाप्यायितच्छाया सैव कान्तिरिति स्मृता ।

यथा—

'सम्भूयैव सुखानि चेतसि परं भूमानमातन्वते
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः ।
यद्बालेन्दुकलो[2]दयादुपचितैः सारैरिवोत्पादितं
तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम् ॥'

माधुर्यं लक्षयति—

अनुल्बणत्वं माधुर्यं

सर्वास्वस्थास्वनुल्बणत्वं माधुर्यम् इति । यथा—

'सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥'

दीप्तिं लक्षयति—

दीप्तिः कान्तेस्तु विस्तृतिः ॥३५॥

---

1. जातप्रकर्षः सुव्यक्तः शृङ्गारः हेलेति—T. 2. तलोच्चया०—T.

कान्तिरेवातिविस्तीर्णा दीप्तिरिति । यथा—

'दे आ पसिअ णिअत्तसु मुहससिजोण्हाविलुत्ततमणिवहे ।
अहिसारिआण विग्घं करेसि अण्णाण वि हदासे ॥
[प्रार्थये तावत्प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे ।
अभिसारिकाणां विघ्नं करोस्यान्यासामपि हताशे ॥]'

प्रागल्भ्यं लक्षयति —

नि:साध्वसत्वं प्रागल्भ्यम्

मनःक्षोभपूर्वकोऽङ्गसादः साध्वसम्, तद्वैधुर्यं प्रागल्भ्यमिति । प्रयोगनिःसाध्वसता प्रागल्भ्यमित्यर्थः । यथा—

'यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात् प्रत्युपदिशतीव मे बाला ॥'

औदार्यं लक्षयति—

औदार्यं प्रश्रयः सदा ।

यथा—

'भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता—
मीषन्मां प्रति[1]भेदकारि हसितं नोक्तं वचो निष्ठुरम् ।
अन्तर्बाष्पजलीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः[2] ॥'

धैर्यं लक्षयति—

चापलाविहता धैर्यं चिद्वृत्तिरविकत्थना ॥ ३६ ॥

चापलविकत्थनानुपहता चित्तवृत्तिर्धैर्यमिति । यथा—

'अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥'

एवमेव चित्तारम्भा दश । एतेषां चित्तारम्भत्वं भोजेनोक्तम् । तेन स्थैर्यं गाम्भीर्यमिति च चित्तारम्भावुक्तौ ।

तत्र सर्वास्ववस्थास्वचलनं स्थैर्यम् । यथा—

'ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किं वा मृत्योः परेण विधास्यति ।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवायं जनो न च जीवितम् ॥'

---

1. प्रतिषेधकारि—T. 2. प्रत्ययः—M.

अविदिताकारेङ्गितत्वं गाम्भीर्यम् । यथा—

'निशीथोऽयं हारी हरति मधु शीधुमधुरा
स्रजो हृद्या हृद्या रमयति मृगाङ्को रमयति ।
पदैरेवंप्रायैः परिजनमनःखेदभयदं
तथा गुप्तो मानः सपदि कृतदोषः कलयति ॥'

[1]एते द्वादश चित्तारम्भाः । पौरुषास्त्वष्टौ चित्तारम्भाः शोभादयः पूर्वमुक्ताः ।

अथ शरीरारम्भेषु लीलामाह—

प्रियानुकरणं लीला मधुराङ्गविचेष्टितौ ।

यथा—

'जं जं करेसि जं जं जप्पसि जह तुम णिअच्छेसि ।
तं तं अणुहरिरीए दीहो दिअहो ण संपडइ ॥
[यद्यत्करोषि यद्यज्जल्पसि यथा त्वं निरीक्षसे ।
तत्तदनुहरणशीलाया दीर्घो दिवसो न सम्पद्यते ॥]'

विलासमाह—

तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु ॥३७॥

नेत्रभ्रूवक्त्रकर्मणां प्रियतमसमागमादिकाले विशेषेण लसनं विलासः । यथा—

'अत्रान्तरे किमपि वाग्विभवातिवृत्ति[2]—
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः[3] ।
तद्भूरिसात्त्विक[4]विकारमपास्तधैर्य—
माचार्यकं विजयि मान्मथमाविरासीत् ॥'

विच्छित्तिं लक्षयति—

आकल्परचनाल्पापि विच्छित्तिः कान्तिपोषकृत् ।

भूषणानां कान्तिविशेषकारी अनादरविन्यासो विच्छित्तिरिति । यथा—

'यथा यथालकं यादृक् तादृशाभरणादिकम् ।
न्यस्तं तथापि सा तस्यां शोभा काचिदलौकिकी ॥'

विभ्रमं लक्षयति—

विभ्रमस्त्वरया काले भूषास्थानविपर्ययः ॥ ३८ ॥

प्रियतमसमागमादिकाले हाररनूपुरकेयूरादीनामस्थानविन्यासो विभ्रमः । यथा—

'चकार काचित् सितचन्दनाङ्के काञ्चीकलापं स्तनभारयुग्मे ।
प्रियं प्रति प्रेषितदृष्टिरन्या नितम्बबिम्बे च बभार हारम् ॥'

---

1. T reads त before एते. 2. ···तिवृत्त०—M. 3.···मुत्पलाक्ष्याः—M.
4. सात्त्विक०—T.

किलिकिञ्चितमाह—

क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलिकिञ्चितम् ।

रुदितहर्षादीनां सङ्करः एकीकरणं किलिकिञ्चितमिति । यथा —

'रतिक्रीडाद्यूते कथमपि समासाद्य समयं
मया लब्धे तस्याः क्वणितकलकण्ठार्धमधरे ।
कृतभ्रूभङ्गासौ प्रकटितविलक्षार्द्धरुदित—
स्मितक्रोधोद्भ्रान्तं पुनरपि[1] विदध्यान्मयि मुखम् ॥'

मोट्टायितं लक्षयति—

मोट्टायितं तु तद्भावभावनेष्टकथादिषु ॥ ३९ ॥

तद्भावभावनं मोट्टायितमिति । यथा—

'चित्रवर्तिन्यपि नृपे तत्त्वावेशेन चेतसा ।
व्रीडार्द्धवलितं चक्रे मुखेन्दुमवशैव सा ॥'

कुट्टमितं लक्षयति—

सानन्दान्तः कुट्टमितं कुप्येत् केशाधरग्रहे ।

यस्मिन् सत्यन्तःसानन्दा केशाधरग्रहादिषु बहिः कुप्येत् तत् कुट्टमितमिति । यथा—

'सन्दष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥'

बिब्बोकं लक्षयति—

गर्वाभिमानादिष्टेऽपि बिब्बोकोऽनादरक्रिया ॥४०॥

दयितेऽपि गर्वाभिमानादिनानादरकरणं बिब्बोकः । यथा—

'निर्भुज्य दशनच्छदं तदा वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुका ॥'

ललितं लक्षयति—

सुकुमारोऽङ्गविन्यासो मसृणं ललितं भवेत् ।

करचरणाङ्गविन्यासो रमणीयोऽनुल्बणश्च ललितं भवेदिति । यथा—

'सभ्रूभङ्गं करकिसलयावर्जनैरालपन्ती
सा पश्यन्ती ललितललितं लोचनस्याञ्चलेन ।
विन्यस्यन्ती चरणकमले लीलया स्वैरयातै—
र्निःसङ्गीतं प्रथमवयसा नर्तिता पङ्कजाक्षी ॥'

---

1. वपुरपि—M.

विहृतं लक्षयति—

प्राप्तकालं न यद् ब्रूयाद् व्रीडया विहृतं तु तत् ॥४१॥

वचनसमयेऽपि व्रीडया अवचनेन यत्किञ्चित्करणं विहृतमिति । यथा—

'पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ॥'

शरीरारम्भा दश । भोजराजेन तु क्रीडितं केलिरित्यपि शरीरारम्भावुक्तौ । बाल-यौवनकौमारसाधारणो विहारविशेषः क्रीडितम् । यथा—

'मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्यम् ॥'

क्रीडितमेव प्रियतमविषयं केलिः । यथा—

'व्यपोहितं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥'

एवं नायिकानां चित्तारम्भाः शरीरारम्भाश्चोक्ताः ।

इदानीं नायकमेवोपसङ्क्रम्य तस्य धर्मार्थसहायानभिधास्यन् प्रथममर्थसचिवानाह—

मन्त्री स्वो वोभयं वापि सखा तस्यार्थचिन्तने ।

स्व आत्मेत्यर्थः । यथा नायिकानां स्वयं दूती[1] - (कार्य) - करणात् स्वयं दूतीत्व-मुक्तम्, एवं नायकस्यापि सहायकार्य[2]करणात् स्वस्यैव सहायत्वमुक्तम्[3] ।

अत्र विशेषमाह—

मन्त्रिणा ललितः शेषा मन्त्रिस्वायत्तसिद्धयः ॥४२॥

तत्र पूर्वोक्तो ललितो मन्त्र्यायत्तसिद्धिरेव । शेषास्तु धीरोदात्तादय अमात्यायत्त[4]-सिद्धयः स्वायत्तसिद्धय[5] उभयायत्तसिद्धयश्चेति विभागः । अमात्यायत्तसिद्धिर्यथा वत्स[6]-राजादिः, स्वायत्तसिद्धिर्यथा जीमूतवाहनादिः । रामोऽपि स्वायत्तसिद्धिरित्येके, उभया-यत्तसिद्धिरित्यन्ये ।

अथ धर्मसचिवानाह—

ऋत्विक्पुरोहितौ धर्मे तपस्वि ब्रह्मवादिनः ।

पूर्वं पीठमर्दविटविदूषकादयः कामसचिवा उक्ताः । इदानीं धर्मार्थसचिवा उक्ता इति द्रष्टव्यम् ।

---

1. M omits दूती-(कार्य)-करणात्. 2. T omits कार्य. 3. M reads द्रष्टव्यम् after उक्त. 4. आत्मायत्तसिद्धयः—M, T. 5. M, T omit स्वायत्तसिद्धय. 6. माधवादिः -M.

अथेदानीं राज्यकार्यतन्त्रेषु प्रेष्यानाह--

सुहृत्कुमाराटविका दण्डे सामन्तसैनिकाः ॥४३॥

इदानीमन्तःपुररक्षिण आह—

अन्तःपुरे वर्षवराः किराता मूकवामनाः ।
म्लेच्छाभीरशकाराद्याः स्वस्वकार्ये नियोगिनः ॥४४॥

वर्षवरः षण्डः । आभीरो महाशूद्रः । शकारप्रायवचनः शकारः । यदाहुः--

'शकार इति विज्ञेयः शकारप्रायभाषणात् ।' इति ।

उक्तञ्च--

'मदात्प्रमादात् भयतोऽपि दर्पात् मौर्ख्याच्च मौढ्याच्च कुलाच्च हीनात् ।
वर्णैरपभ्रंशशकारयुक्तैः शकारवाक्यं भरतेन सृष्टम् ॥'

यथा--

'आगमलिङ्गविहीनं देशकलान्यायलोकविपरीतम् ।
व्यर्थैकार्थमपार्थं भवति हि वचनं शकारस्य ॥'

तथा—

'उज्ज्वलवेषाभरणः कुप्यत्यनिमित्ततः प्रसीदति च ।
प्राकृतभाषाचारो भवति शकारो बहुविकारः ॥'

इत्यादिचेष्टाभाषायुक्तः शकार इति ।

एवमुक्तानां नायकानां नायिकानां तत्सहायादीनाञ्च ज्येष्ठमध्यमाधमत्वेन त्रैविध्यमुक्तं[1] भवति । ज्येष्ठमध्यमाधमत्वं च गुणतारतम्येनेत्याह—

ज्येष्ठमध्यधमत्वेन सर्वेषां च त्रिरूपता ।
तारतम्याद्यथोक्तानां गुणानां चोत्तमादिता ।

एतच्चानागतावेक्षणेन[2] नायिकानायकयोरस्माभिः पूर्वमेवोक्तमित्युपसंहरति—

एवं नाट्ये विधातव्यो नायकः सपरिच्छदः ॥४५॥

सन्ति हि नायकादेः शृङ्गारादिरसाद्यनुभावभूता मनोवाग्बुद्धिशरीरारम्भाः । तत्र चित्तारम्भाः शरीरारम्भाश्चोक्ताः ।

अथेदानीं वागारम्भाश्चामी—आलापः, प्रलापः, विलापः, अनुलापः, सल्ँलापः, अपलापः, सन्देहः, अतिदेशः, निर्देशः, उपदेशः, अपदेशः, व्यपदेशः इति द्वादश । तत्र भाषणमालापः । यथा--'यथेच्छाभोग्यं वो वनमि'ति । अनर्थकं वचः प्रलापः । यथा—'क्वाकृत्यं शशलक्ष्मण' इति । दुःखोद्भवं वचो विलापः । यथा—'मातर्मातर्दलति हृदयमि'ति । बहुशोऽभिधानमनुलापः । यथा—'अहो रूपमि'ति । उक्तप्रत्युक्तं सल्ँलापः ।

---

1. M omits उक्तं. 2.······पेक्षणेन—M.

यथा--'पसिअ पिए का कुविआ [प्रसीद प्रिये का कुपिता]' इति । पूर्वोक्तस्यान्यथा वादोऽपलापः । यथा--'पत्तिअ ण पत्तिअन्ती [प्रतीहि न प्रतीयन्ती]' इति । देशान्तरवर्तिनः स्ववार्ताप्रेषणं सन्देशः । यथा--'पान्थ द्वारवतीमि'ति । एतदुक्तमित्यतिदेशः ।

यथा--'स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणः । वृणुते वरदः शम्भुरस्मत्सङ्क्रमितैः पदैः ॥' इति सोऽयमहमित्यादिनिर्देशः । यथा--'एते वयममी दाराः कन्येयं कुलजीवितमि'त्यादि । शिक्षाहेतुर्वचनमुपदेशः । यथा--'शुश्रूषस्व गुरूनि'ति । अन्यार्थकथनमपदेशः । यथा--'आसाइयं' इति । व्याजान्तरेण तत्कथनं व्यपदेशः । यथा--'महुएहिँ किं व पंथिअ जइ हरसि णिअंसणं णिअंबाओ । साहेमि कस्स रण्णे दूरे गामो अहं एका ॥ [मधूकैः किं वा पथिक यदि हरसि निवसनं नितम्बात् । कथयामि कस्यारण्ये दूरे ग्रामोऽहमेका ॥]' इति । एते वागारम्भा द्वादश ।

अथ बुद्ध्यारम्भास्त्रयः । रीतिः, वृत्तिः, प्रवृत्तिः । तत्र वचनक्रमविन्यासो रीतिः । सा चतुर्धा । वैदर्भी पाञ्चाली लाटी गौडीया चेति । विदर्भादिषु भवा वैदर्भीत्यादितत्तद्देशसम्बन्धाद् यौगिकानि नामानि । यथाह वामनः--

'सा वाक्यरचना मार्गस्तत्तद्देशसमाख्यया' इति ।

तत्र वैदर्भी--

'असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च न विधेया ॥'

गुणाश्चामी--

'श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजः -- कान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।'

गुणस्वरूपोदाहरणे विस्तरभयान्न प्रपञ्च्येते । वर्गद्वितीयशब्देनानुलोम्येन प्रातिलोम्येन च द्वितीयवर्णपरिग्रहान्महाप्राणाक्षरत्वमेव विवक्षितम् । तच्चाल्पाल्पप्राणाक्षरत्वमेव न विवक्षितम् । यथा--'शीर्णप्राणाङ्घ्रिपाणीनि'त्यादि, 'स्मरः खरः खलः कान्त' इति च । 'प्रेङ्खन्तः खे खराङ्गो खचितदिनमुखास्ते मयूखाः सुखं वः[1]' इति च । भोजे -- 'यदसमस्तमतिसुकुमारबन्धमनुपचारवृत्तिमत् स्थानानुप्रासयोगि योगवृत्तिमद्वचः सा वैदर्भी' इत्युक्तम् ।

तत्रासमस्ता यथा--

'येनैव बाणेन हतः प्रियो मे तेनैव मां त्वं जहि सायकेन ।
हता गमिष्यामि समीपमद्य न मामृते राम रमेत बाली ॥'

---

1. च—M.

एकसमस्ता यथा—

'पृथुलं नितम्बबिम्बे मध्ये क्षामं समुन्नतं कुचयोः।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥'

यथा वा—'सरसिजमनुविद्धम्' इत्यसमस्तैकसमस्तेति। असमस्तनियमेन दीर्घसमासत्वमेव निषिद्धम्। द्वयोस्त्रयाणां पदानामल्पाकाराणां समस्तत्वमनुमतमेवेति।

अतिसुकुमारबन्धो यथा—

'चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम्।
सम्प्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥'

यथा वा—

'कथय किमिह बाले का त्वमित्युल्लपंस्तां[1]
क्षणमपि [च] दुकूलस्याञ्चले धारयामि[2]।
अगद[3]दशनिकेतुः क्वाप्यसौ शारयन्ती
नव - कुवलयमालामांसलैर्दृष्टिपातैः ॥'

यथा—

'फुल्लेषु[4] यः कमलिनीकुसुमोदरेषु
चूतेषु वा विलसितः[5] कलिकान्तरस्थः[6]।
पश्याद्य तस्य मधुपस्य शरद्व्यपाये
कृच्छ्रेण वेणुविवरे दिवसाः प्रयान्ति ॥'

अनुपचारवृत्तिमती यथा—

'श्यामास्वङ्गं चकित[7]हरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्थं क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥'

स्थानानुप्रासयोगिनी यथा—

'राजानमाजानुविलम्बिबाहुं कृत्वा कृती वल्कलवान् बभूव' इत्यादि।

अन्ये तु—

'शिथिलशिथिलं न्यस्य स्वैरं धनुःशिखरे शिरो
नयनसलिलैः कुर्वन् मौर्वीलतामपरामिव।

1. त्वां—T. 2. चारयामि M. 3. अगमद् –T; Bhoja (S. P., p. 682) reads thus-'अगमदथ निकेतं'. 4. पुष्पेषु—M. 5. विलसितं--T. 6. कलिकान्तरस्थं--T. 7. चलित० --T.

अहह विकलः श्रुत्वा घनस्तनितध्वनिं
किमपि किमपि ध्यायन्नार्यो याति न तिष्ठति ॥'

योगवृत्तिमती यथा—

'सदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं जनं कथम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया[1] रहस्युपालभ्यत चन्द्रशेखरः ॥'

भोजराजेनोक्तानां सुकुमारबन्धत्वादीनामपि महाप्राणाक्षरत्वादिदोषनिषेधेन श्लेष-प्रसादादिगुणविधानेन च तत्रैव श्लोके यथासम्भवमुपादानं द्रष्टव्यमिति । एषां च रूपाणां मध्ये यत्र भूयांसि रूपाणि वैदर्भीप्रत्यभिज्ञाभूतानि दृश्यन्ते सा वैदर्भीति निर्णयः । सर्वेषां च व्यस्तानां कालिदाससूक्तिषु रामायणे चोदाहरणं द्रष्टव्यम् ।

अथ[2] पाञ्चाली—

'द्वित्रिपदैरपि यस्यां भवति समासो न बन्धपारुष्यम् ।
वैदर्भीसदृशगुणा पाञ्चाली वर्ण्यते सद्भिः ॥'

भोजराजेन—'यदनतिदीर्घसमासमनतिस्फुटबन्धमुपचारवृत्तिमत् पादा[3]नुप्रासप्रायं योगरूढिमद्वचः सा पाञ्चाली'त्युक्तम् । अनतिदीर्घसमासा यथा—'किरति कलितकिञ्चित्कोपरज्यन्मुखश्रीरविरतगुणगुञ्जत्कोटिना कार्मुकेण' इत्यादि ।

अनतिस्फुटबन्धा यथा—

'मण्डलीकृतबर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलापिनः प्रनृत्यन्ति काले जीमूतवाहिनि[4] ॥'

एवमन्यदप्युदाहर्त्तव्यम् ।

अथ लाटी—

'मृदुपदसमाससुभगा युक्तैर्व्यक्तैर्न[4] चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥'

भोजराजेन तु अनतिस्फुटबन्धमदीर्घसमासमत्युपचारवृत्तिमल्लाटानुप्रासयोगरूढिमद्वचः सा लाटीत्युक्तम् ।

लाटानुप्रासयोगिनी यथा—

'अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रवमविरतोत्कण्ठमुत्कण्ठतेन ।' इत्यादि ।

---

1. मुद्रया—M. 2. अथवा—T. 3. पदा०—M. 4. जीमूतमालिनि—M.
5. व्यस्तेन—M.

रूढिमती यथा—

'इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा सास्रमहं निषिद्धः ॥'

अदीर्घसमासा यथा—

'एतानि निःसहतनोरसमञ्जसानि
शून्यं मनः पिशुनयन्ति पदानि तस्याः ।
एते च मार्गतरवः कथयन्ति ताप—
मालम्बितोज्झितपरिग्लपितैः प्रवालैः ॥' इति ।

अत्युपचारवृत्तिमती यथा—

'अनाघ्रातं पुष्पं किसलयमलूनं कररुहै—
रनाविद्धं[1] रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥'

अनतिस्फुटबन्धस्योचितविशेषणपूरितवस्तुन्यासस्यापि 'मण्डलीकृतबर्हाणि' त्येतदेवो-दाहरणं कर्त्तव्यम् । अत्रापि पूर्ववदेव गुणभूयस्त्वं द्रष्टव्यम् । इयं च बाहुल्येन हर्षादि-प्रबन्धेषु कालिदासप्रबन्धेषु[2] चोदाहर्त्तव्येति ।

अथ गौडीया—

'बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्यसंयुक्ता ॥'

यदतिदीर्घसमासमतिस्फुटबन्धमत्युपचारवृत्तिमत्पादानुप्रासयोगि [योग]—रूढिपर-म्परागर्भं वचः[3] सा गौडीयेत्युक्तं भोजेन ।

अतिदीर्घसमासा यथा—

'नमन्नृपतिमण्डलीमकुटचन्द्रिकादुर्दिन—
स्फुरच्चरणपल्लवप्रतिपदोक्तदोःसम्पदा ।
अनेन ससृजेतरां तुरगमेघमुक्तभ्रम—
त्तुरङ्गखुरचन्द्रकप्रकरदन्तुरा मेदिनी ॥'

अतिस्फुटबन्धा यथा—

'मरुत्वददम्भोलिक्षणघटितघोरश्वयथुना
निसर्गोदग्रेण प्रसभमुरसा पीतगगनः ।

1. रनामुक्तं—T. 2. T omits कालिदासप्रबन्धेषु. 3. प्रवचः—M.

श्रियं देवध्रीचीं निजभुजवनोद्दामकरिणी—
मयं कुर्वन् वीरः स्मरसि कथमासीदृशमुखः ॥'

अत्युपचारवृत्तिमती यथा—

'लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलकाण्ड[1]मृणालदण्डाः ॥'

यथा वा—

'माना[2]ध्मातस्त्वां किलोत्कृत्य तावन्मूर्द्धश्रेणीमेकशेषोत्तमाङ्गः[3] ।
स्त्रीमर्द्धाङ्गे वञ्चयित्वा सुखेन प्रीतश्शम्भोरेष[4] पादे पपात ॥'

पादानुप्रासयोगिनी यथा—

'भिन्नैरावणगन्धसिन्धुरशिरस्सम्पादितैर्मौक्तिकैः
शश्वद्विश्वजयप्रशस्तिरचनावर्णावलीशिल्पिने ।
नाकान्तःपुरिकाकपोलविलसत्काश्मीरपत्राङ्कुर—
श्रीविन्यासविलासभूषणभुजस्तम्भाय तुभ्यं नमः ॥'

यथा वा—

'पाशानाशान्तपालादरुणवरुणतो माग्रहीः प्रग्रहार्थम्' इत्यादि ।

योगरूढिपरम्परागर्भा यथा—

'मध्येसमुद्रं ककुभः पिशङ्गीर्या कुर्वती काञ्चनभूमिभासा ।
तुरङ्गकान्तामुखहव्यवाहज्वालेव भित्वा जलमुल्ललास ॥'
'तारकेश्वरकिशोरशेखर' इत्यादि द्रष्टव्यम् ।

सुमहाप्राणाक्षरत्वं वैदर्भीप्रत्युदाहरणवेलायां शीर्णघ्राणाङ्घ्री' त्यादिनो[5]दाहृतम् ।

स्तोभवाक्ययुक्ता यथा—

'ये चत्वारो दिनकरकुलक्षत्रसन्दानवल्ली—
मालाम्लानस्तबकमधुपा जज्ञिरे राजपुत्राः ।
रामस्तेषाम[6]परमभवत्ताटकाकालरात्रि—
[7]प्रत्यूपोऽयं सुचरितकथाकन्दलीमूलकन्दः ॥'

---

1. कदलिकाण्ड॰—T. 2. मानध्मात॰—M. 3. ……ङ्कः—M. 4. ……रेक॰—M. 5. ………दिनोक्तमिति—T. 6. ………चरम॰—T. 7. प्रत्यूहो—T.

यथा वा--

'भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनामि'त्यादि मुरारिभट्टमयूरप्रबन्धयोर्बाहुल्येनोदाहर्त्तव्येति। एतासां चतसृणां च रीतीनां समासतारतम्यादुपचारतारतम्याद् बन्धसौकुमार्यादितारतम्यादनुप्रासभेदाद् योगादिभेदाच्च परस्परभेद इत्यनुसन्धातव्यमिति। अत्रान्तरे च सौराष्ट्रीद्राविड्यादिभेदात् पञ्चोत्तरशतविधा:[1] प्रोक्ता:। एतासां च वचनावान्तरजातित्वेन प्रतिपुरुषभेदाद्रीतीनामानन्त्येऽपि संक्षेपाच्चतुर्विधेत्युक्तम्। तथा चाहुरभियुक्ता:--

'त एव पदविन्यासास्ता एवाक्षरपङ्क्तय:।
पुंसि पुंसि विशेषेण कापि कापि सरस्वती॥'

अथ वृत्तिश्चतुर्धा--कैशिक्यारभटी भारती सात्त्वती चेति। प्रवृत्तिश्चतुर्धा--दाक्षिणात्या आवन्त्या पौरस्त्या उड्रमागधी चेति। एषु वागारम्भान् बुद्ध्यारम्भेषु च रीतिं वचनगतत्वेनोत्प्रेक्ष्य वृत्तिमिदानीं सामान्यतो लक्षयंश्चतुर्धा विभजते--

तद्व्यापारात्मिका वृत्तिश्चतुर्धा

तच्चेष्टाविन्यासात्मिका वृत्तिश्चतुर्धेत्यर्थ:। ताश्च कैशिकी सात्त्वती आरभटी भारती चेति। उत्पत्तिश्च तासामुक्ता—

'ऋग्वेदे भारती ज्ञेया यजुर्वेदे तु सात्त्वती।
कैशिकी सामवेदे च चतुर्थी स्यादथर्वणि॥'

अन्ये त्वाहु:—'मधुकैटभाभ्यां युद्धयमानाद् विष्णो: वृत्तित्रयं जातम्। भरतप्रोक्ता च भारतीति।' नृत्तनियमश्चात्र—

'भारत्यां वाचिकं नृत्तं सात्त्वत्यामपि सात्त्विकम्।
आहार्यञ्चैव कैशिक्यामारभट्यामथाङ्गिकम्॥'

रसनियमञ्चैव स्वयमेव वक्ष्यति।

कैशिकीमाह—

तत्र कैशिकी।
गीतनृत्तविलासाद्यैर्मृदु: शृङ्गारचेष्टितै:॥४६॥

गीतनृत्तादिशृङ्गारचेष्टितै: सुकुमारो नायकव्यापार: कैशिकीवृत्तिरिति। उक्तं च—

'या श्लक्ष्णनेपथ्यविशेषयुक्ता
स्त्रीसंयुता या बहुगीतनृत्ता।
कामोपभोगप्रभवोपचारा
तां कैशिकीं वृत्तिमुदाहरन्ति॥'

---

1. पञ्चोत्तरदशविधा:--M.

अन्यैरप्युक्तम्—

'बहुवाद्यगीतविषया शृङ्गाराभिनयचित्रनेपथ्या ।
माल्यालङ्कारयुता प्रशान्तवेषा च कान्ता च ॥'

चित्र[1]पदवाक्यबन्धैरलङ्कृता रोषहासवती कैशिकीति । अन्यैस्तु रीतिनियमगर्भञ्च कैशिकीलक्षणमुक्तम्—

'या नृत्तगीतप्रमदोपभोग-
देशाङ्गसङ्कीर्तनचारुबन्धा ।
माधुर्ययुक्ताल्पसमासरम्या
वाणी स्मृतासाविह कैशिकीति ॥'

इदानीं तस्या नर्म, नर्मस्फञ्ज:[2], नर्मस्फोट:[3], नर्मगर्भ इति चत्वार्यङ्गानि भवन्तीत्याह—

नर्मतत्स्फञ्जतत्स्फोटतद्गर्भैश्चतुरङ्गिका ।

उक्तञ्च—

'नर्म च नर्मस्फञ्जो नर्मस्फोटश्च नर्मगर्भश्च ।
कैशिक्याश्चत्वारो भेदा ह्येते समाख्याता: ॥'

तत्र नर्म लक्षयति—

वैदग्ध्यात् क्रीडितं नर्म प्रियोपच्छन्दनात्मकम् ॥४७॥

अग्राम्य इष्टजनावर्जनरूप: परिहासो नर्म इति ।

यथा—

'वयं तथा नाम यदात्थ किं वदा-
म्ययं च कस्माद् विकल: कथान्तरे ।
कदम्बगोलाकृतिमाश्रित: कथं
विशुद्धमुग्ध: कुलकन्यकाजन: ॥'

शुद्धहास्येन सभयहास्येन सशृङ्गारहास्येन च विहितं नर्म त्रिविधमित्याह—

हास्येनैव सशृङ्गारभयेन विहितं त्रिधा ।

अन्यैश्च नर्मसामान्यलक्षणगर्भं त्रैविध्यमुक्तम् ।

'ललितमधुराभिधानं शृङ्गाररसाश्रयं सुखोपेतम् ।
इच्छाभयहास्यकृतं नर्म त्रिविधं विजानीयात् ॥'

शृङ्गारसहितनर्मानुरागनिवेदनभोगेच्छाप्रकाशनसापराधप्रियप्रतिभेदनैस्त्रिविधं सभयं नर्मापि शुद्धं रसान्तराङ्गमिति द्विविधमित्याह—

1. चित्रपदा—M. 2. नर्मस्फञ्जनं—T. 3. नर्मस्फोटनं—T.

आत्मोपक्षेपसम्भोगमानैः शृङ्गार्यपि त्रिधा ॥४८॥

शुद्धमङ्गं भयि द्वेधा

शृङ्गारोऽस्यास्तीति शृङ्गारी । एवं भयीति । एवं सशृङ्गारस्य त्रैविध्यात् सभयस्य द्वैविध्यात् सहास्य नर्मण ऐकध्यात् षोढा व्यूढं नर्मेत्यवगन्तव्यम् । एवं हास्यनर्मसहितस्य षोढा व्यूढस्य नर्मणो वाग्वेषचेष्टितैस्त्रैविध्यं दर्शयन्नुपसंहरति—

त्रेधा वाग्वेषचेष्टितैः ।

सर्वं सहास्यमित्येवं नर्माष्टादशधोदितम् ॥४९॥

अथ नर्मस्फञ्जं लक्षयति—

नर्मस्फञ्जः सुखारम्भो भयान्तो नवसङ्गमे ।

प्रथमसमागमे भयावसानः सुखारम्भो नर्मस्फञ्जः । यथा—

'प्राप्तासौ वृषपर्वणः प्रियसुता सङ्केतषण्डं सखे
दृष्टिः सेयमनम्बुदामृतमयी गात्राणि मे सिञ्चति ।
किं जानासि विनोदयिष्यति मनः सन्तप्तमेवाद्य मे
दुर्वार्त्येव निवर्तयिष्यति न भोस्तां देवयानी यदि ॥'

'उत्कण्ठा[1]निर्भरं प्रेम नव[2]सङ्गमसम्भवम् । अन्ते भयानकं **प्राहुर्नर्मस्फञ्जमि'ति** कोहलः ।

नर्मस्फोटं लक्षयति—

नर्मस्फोटस्तु भावानां सूचितात्परसो लवैः ॥५०॥

अनुभावादिभावानामेकदेशैः सूचिताल्परसः सुखारम्भो नर्मस्फोट इति । यथा—

'दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥'

इति शकुन्तलाचेष्टितेन दुष्यन्तस्यानुरागनिवेदनमिति ।

अकाण्ड[3] एव सम्भोगभङ्गो नर्मस्फोट इति भोजः । यथा—'कथय किमिह बाले का त्वमि'ति सुषिरस्तम्भप्रवेशानुभूतमृगाङ्कावलीदर्शनस्य विद्याधरमल्लदेवस्य सम्भोग-भङ्ग इति ।

नर्मगर्भं लक्षयति—

छन्ननेतृप्रतीचारो नर्मगर्भोऽर्थहेतवे ।

---

1. उत्कर्षानिर्भरं—M. 2. न च सङ्गम०—T. 3. क्षत—T.

प्रयोजनवशेन नेतुर्नायिकाच्छन्नतया प्रतीचारो नर्मगर्भ इति । यथा—

'कान्ते सागसि शापिते[1] प्रियसखीवेषं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्सङ्गमाकाङ्क्षया ।
मुग्धे दुष्करमेतदित्यतितरामुक्त्वा सहासं बला-
दाश्लिष्य[2] छलितास्मि तेन कितवेनाद्य प्रदोषागमे ॥' इति ।

अथवा प्रियदर्शिकायां गर्भाङ्के वत्सराजवेषगतसुसङ्गतास्थाने साक्षाद्वत्सराजप्रवेशः ।

उपसंहरति—

अङ्गैः सहास्यनिर्हास्यैर्वृत्तिरेषात्र कैशिकी ॥५१॥

सहास्यं नर्म निर्हास्यमुत्तरं त्रयमिति ।

एवं तावत् कैशिकी लक्षिता । इदानीं सात्त्वतीमाह—

विशोका सात्त्वती सत्त्वशौर्यत्यागदयार्जवैः ।

सत्त्वादिसात्त्विकगुणयुक्ता विशोका वृत्तिः सात्त्वतीति । तथाह—

'या सात्त्विकेनेह गुणेन युक्ता
त्यागेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतशोकभावा
सा सात्त्वती नाम भवेत्तु वृत्तिः ॥'

अन्ये प्राहुः—

'हर्षप्रधानाधिकसत्त्ववृत्ति-
स्त्यागोत्तरोदारवचो मनोज्ञा ।
आश्चर्यसम्पत्सुभगा च या स्यात्
सा सात्त्वती नाम मताऽत्र वृत्तिः ॥'

नियमश्चात्र—'नातिगूढार्थसम्पत्तिहृद्यशब्दमनोहरे'त्यादिनाभिहित इति ।

अस्यामपि वृत्तौ चत्वार्यङ्गानि भवन्तीत्याह—

संल्लापोत्थापकावस्यां सङ्घात्यः परिवर्तकः ॥५२॥

तत्र संल्लापं लक्षयति—

संल्लापः स्याद् गभीरोक्तिर्नानाभावरसा मिथः ।

ईर्ष्याक्रोधगर्वादिभावैर्वीराद्भुतादिरसैश्च परस्परं[3] गभीरोक्तिः संल्लाप इति ।

यथाश्वत्थामाङ्के कर्णं प्रत्यश्वत्थामा—

'कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।

---

1. यापिते—M. 2. दालिङ्ग्योच्चलितास्मि—M. 3. परस्परगभीरोक्तिः—T.

तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम् ॥'

इत्यादिना कर्णाश्वत्थाम्नोः परस्परोक्तिः संल्लाप इति ।

उत्थापकमाह––

उत्थापकस्तु यत्रादौ युद्धायोत्थापयेत्परम् ॥५३॥

यथा वीरचरिते––

'प्रहर नमतु चापं प्राक्प्रहारप्रियोऽहं
मयि तु कृतनिघाते किं विदध्याः परेण ।
झटिति विततवह्न्युद्गारभास्वत्कुठार––
प्रविघटितकठोरस्कन्धबन्धः कबन्धः ॥'

परस्परासूययार्थेषूत्थापनमुत्थापक इति भोजः ।

सङ्घात्यं लक्षयति––

मन्त्रार्थदैवशक्त्यादेः सङ्घात्यः सङ्घभेदनम् ।

मन्त्रशक्त्या यथा मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्ध्या भेदनम्, यथा श्रीरामायणे रामस्य दैवशक्त्या रावणाद् विभीषणभेदनमिति । आदिशब्दोपात्तात् पौरुषात् सङ्घभेदनं यथा––

'अपश्यद्भिरिवेशानं रणान्निववृते गणैः ।
मुह्यत्येव[1] हि कृच्छ्रेषु सम्भ्रमज्वलितं[2] मनः ॥'

इति परस्य पौरुषात् गणानां सङ्घ[3]भेदनमिति ।

परिवर्तकमाह—

प्रारब्धोत्थानकार्यान्यकरणात् परिवर्तकः ॥५४॥

प्रस्तुतोद्योगकार्यस्यापरित्यागे कार्यान्तरकरणं परिवर्तक इति । यथा वीरचरिते जामदग्न्यो रामं प्रति—

'हेरम्बदन्तमुसलोल्लिखितोरुभित्ति––
वक्षो विशाखविशिखव्रणलाञ्छितं[4] मे ।
रोमाञ्चकञ्चुकितमद्भुतवीरलाभा-
द्यत्सत्यमद्य परिरब्धुमिवेच्छति त्वाम् ॥'

रामः––भगवन्, परिरम्भणमिति प्रस्तुतसङ्ग्रामात्[5] प्रतीपमेतदि'ति[6] ।

1. भवत्येव—T. 2. ज्वरितं—M. 3. सङ्घात०—T. 4. लज्जितं—M. 5. संरम्भात्—T. 6. प्रतीपमिति—T.

उपसंहरति—

एभिरङ्गैश्चतुर्धेयं सात्त्वती

आरभटीमाह—

आरभटी पुनः ।

मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ॥५५॥

मायादिमती वृत्तिरारभटीति । यदाहुः—

'पुस्तावपातप्लुतलङ्घनानि
छेद्यानि मायाकृतमिन्द्रजालम् ।
चित्राणि युद्धानि च यत्र वृत्ति
तां तादृशीमारभटीं वदन्ति ॥'

अन्यैस्तु रीतिनियमगर्भमारभटीलक्षणमुक्तम् । यथा—

'या चित्रयुद्धश्रमशस्त्रपातै-
र्मायेन्द्रजालद्रुतलङ्घनाद्या ।
ओजस्विगुर्वक्षरबन्धगाढा
ज्ञेया बुधैः सारभटीति वृत्तिः ॥' इति ।

अस्या अपि वृत्तेश्चत्वार्यङ्गानीति दर्शयंस्तानि तावदुद्दिशति —

सङ्क्षिप्तिकास्यां सम्फेटो वस्तूत्थानावपातने[1] ।

सङ्क्षिप्तिकां लक्षयति—

सङ्क्षिप्तवस्तुरचना सङ्क्षिप्तिः शिल्पयोगतः ॥५६॥

मायेन्द्रजालनेपथ्यादिभिर्वस्तुसङ्क्षेपः सङ्क्षिप्तिरिति । यथा—

'रक्षसा मृगरूपेण वञ्चयित्वाथ[2] राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥'

मतान्तरमाह—

पूर्वनेतृनिवृत्त्यान्ये नेत्रन्तरपरिग्रहः ।

इति सङ्क्षिप्तिं मन्यन्त इति शेषः । यथा बालिवधात् सुग्रीवपट्टाभिषेकः । धीरोदात्तत्वादिनिवृत्त्या धीरशान्तत्वाद्यवस्थापरिग्रह इति केचिद् व्याचक्षते । तत्र यथा परशुरामस्यौद्धत्यनिवृत्त्या राघवसङ्ग्रामादूर्ध्वं धीरप्रशान्तत्वमित्यादि ।

सम्फेटमाह—

सम्फेटस्तु समाघातः क्रूरसंरब्धयोर्द्वयोः ॥५७॥

1. ···वपाटनैः—M. 2. तु—T.

यथा दशग्रीवनिग्रहे—

'विशिखौघविशीर्णगण्डशैले तरुसञ्चूर्णितशक्तितोमरे च ।
कपिराक्षसराजयोरजस्रं तुमुलो भाति तलातलि प्रपञ्चः ॥'

इति सुग्रीव[1]दशग्रीवयोः ।

वस्तूत्थापनमाह—

मायाद्युत्थापितं वस्तु वस्तूत्थापनमिष्यते ।

यथा नायकानन्दे रामः—

'उद्यम्य दृष्टनिजपन्नगरत्नमात्रा-
नस्त्राणि चन्दनतरूपरि विभ्रमन्तः ।
द्यां ज्योतिरिङ्गणमयीमिह मेघनाद-
मायातमावलयिताः कपयो वितेनुः ॥'

अवपातनमाह—

अवपातस्तु निष्क्रामः प्रवेशत्रासविद्रवैः ॥५८॥

यथा तत्र दशग्रीवनिग्रहे—

'अगस्त्याज्ञासद्यःशमितविष[2]मोच्छ्रायविषमा-
नुदस्यन्तः सेतावलगितवतो विन्ध्यशिखरान् ।
शिरःसङ्ख्यासत्यापितदशमुखालोकरभसा-
दुपेत्याभित्रस्ताश्चपलमपसर्पन्ति कपयः ॥' इति ।

भारत्याः शब्दवृत्तित्वेनार्थवृत्तित्वं निराकुर्वन्नारभटीमुपसंहरति—

एभिरङ्गैश्चतुर्धेयं नार्थवृत्तिरतः परा ।

भारती तु तृतीयेऽभिधास्यत इत्याह—

चतुर्थी भारती सा तु वाच्या नाटकलक्षणे ॥५९॥

एवं स्वमतेनार्थवृत्तित्रयं शब्दवृत्तिं चैकामभिधायाधुनोद्भटमतानुसारिणां भारतीमप्यर्थवृत्तिमाचक्षाणानां पुनः शब्दवृत्त्यङ्गीकारेण वृत्तिपञ्चकप्रतिज्ञानं भवेदित्याह—

भारतीं (? कैशिकीं) सात्त्वतीं चार्थवृत्तिमारभटीमिति ।
पठन्तः पञ्चमीं वृत्तिमौद्भटाः प्रतिजानते ॥६०॥

एतच्च प्रतिज्ञामात्रमेव नोपपत्तियुक्तं भारत्याः शब्दवृत्तित्वेनार्थवृत्तित्वाभावादित्युक्तं प्रतिजानत इति । अन्ये तु मिश्रां नाम पञ्चमीं वृत्तिमाहुः—

'यत्रारभट्यादिगुणाः समस्ता
मिश्रत्वमाश्रित्य मिथः प्रथन्ते ।

---

1. दशग्रीवसुग्रीवयोः—T. 2. विकलोच्छ्रायविषमान्—T.

मिश्रेति तां वृत्तिमुशन्ति धीराः
साधारणीमर्थं – चतुष्टयस्य ॥'

एवं वृत्तय उक्ताः ।

इदानीं तत्तदसाधारणेषु रसेषु ता नियच्छति—

शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः ।
रसे रौद्रे सबीभत्से वृत्तिः सर्वत्र भारती ॥६१॥

आरभट्यनुवृत्तौ रुद्रटः[1]––

'रौद्रे भयानके चैव बीभत्से च विचक्षणैः ।
काव्यशोभाकरी वृत्तिरियमित्थं प्रयुज्यते ॥'

तथा सात्त्वत्यनुवृत्तौ स एव––

'वीरे रौद्रेऽद्भुते शान्ते वृत्तिरेषा बुधैर्मता ।'

तथा कैशिक्यनुवृत्तौ स एव––

'शृङ्गारहास्यकरुणरसातिशयसिद्धये ।
एषा वृत्तिः प्रयत्नेन प्रयोज्या विबुधैर्ध्रुवम् ॥'

इत्यादि ।

अतः शृङ्गारे कैशिकीत्याद्यसाधारण्येन वा प्राधान्येन वा वृत्तित्रयस्यैकैकरसनियम उक्त इति द्रष्टव्यम् ।

एवं वृत्तिं व्युत्पाद्य प्रवृत्तिं व्युत्पादयति––

देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः ।
लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत् ॥६२॥

भाषा मागध्यादिसप्तकं प्रदर्शनमात्रमिदम् । विभाषासप्तकमप्युपात्तं द्रष्टव्यमिति ।

ताश्च—

'मागध्यवन्तिजा[2] प्राच्या शौरसेन्युड्रमागधी ।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥
शकाराभीरचण्डालशबरद्रमिडान्ध्रजाः ।
हीना वनेचराणाञ्च विभाषाः[3] सप्त कीर्तिताः[4] ॥'

एवं भाषावेषादिविन्यासः प्रवृत्तिरिति सामान्यलक्षणमुक्तम् । सा च प्रतिदेशं भिन्ना लोकत एवावगम्य प्रयोक्तव्येति । सा च सङ्क्षेपतश्चतुर्धा––आवन्त्या, पौरस्त्या, दाक्षिणात्योड्रमागधी चेति तत्तद्देशसम्बन्धनिमित्ताः संज्ञाः ।

---

1. रुद्रभटः––M. 2. ......वन्तिका––T. 3. भाषाः––T. 4. प्रकीर्तिताः––T.

तत्र पौरस्त्या यथा--

'[1]ताटङ्कवल्गनतरङ्गितगण्डरेख--
मानाभिलम्बिदरदोलिततारहारम् ।
आश्रोणिगुल्फपरिमण्डलितान्तरीयं
वेषं नमस्यत महोदयसुन्दरीणाम् ॥'

उड्रमागधी यथा--

'आर्द्रार्द्रचन्दनकुचार्पितसूत्रहारः
सीमन्तचुम्बिसिचयस्फुटबाहुमूलः ।
दूर्वाप्रकाण्डरुचिरास्वगुरूपभोगाद्-
गौराङ्गनासु चिरमेष चकास्तु वेषः ॥'

दाक्षिणात्या यथा—

'आमूलतो वलितकुन्तलचारु[2]चूड-
श्चूर्णालकप्रकरलाञ्छितफालभागः ।
कक्ष्यानिवेशनिबिडीकृतनीविरेष
वेषश्चिरं जयतु कुन्तलकामिनीनाम् ॥'

आवन्त्या यथा—

'सितांशुका मङ्गलमात्रभूषणा
पवित्रदूर्वाङ्कुरलाञ्छितालका ।
धृतोपवासोज्झित[3]गर्ववृत्तिका
मयि[4] प्रसन्ना वपुषैव लक्ष्यते ॥'

एवं नायकनायिकादय उक्ताः । तद्गुणास्तत्सचिवास्तद्रीतयस्तद्वृत्तयस्तत्प्रवृत्तयश्च यथोक्ताः ।

इदानीं संस्कृतादिभाषाः[5] पात्रेषु नियच्छन्नाह--

पाठ्यन्तु संस्कृतं नृणामनीचानां कृतात्मनाम् ।
लिङ्गिनीनां महादेव्या मन्त्रिजावेश्ययोः क्वचित् ॥६३॥

लिङ्गनी[6] परिव्राजिका यथा मालविकाग्निमित्रे पण्डितकौशिकी, मालतीमाधवे कामन्दकी । क्वचिदिति महादेवीप्रभृति सम्बद्ध्यते । अतो देवीवेश्यादीनां कार्यवशात् क्वचिदेव संस्कृतं पाठ्यं न सार्वत्रिकमिति । तथा चाहुः--

1. मातङ्ग०--M. 2. ....मात्र०--M. 3. ....त्सित०--M. 4. मया--M. 5. भाषा----M. 6. T reads क्वचित् before लिङ्गनी.

स्त्रीणां तु प्राकृतं प्रायः शौरसेन्यधमेषु च ।
पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा ॥६४॥
यद्देशं नीचपात्रं यत् तद्देशं तस्य भाषितम् ।

पाठ्यन्तु संस्कृतं नृणामित्यत्रापवादमाह--

कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः ॥६५॥

तथा चाहुः---

'परिव्राण्मुनिशाक्येषु चोक्तेषु श्रोत्रियेषु च ।
विशिष्टाः परलिङ्गस्थाः संस्कृतं तेषु योजयेत् ॥
ऐश्वर्येण[1] प्रमत्तस्य दारिद्रो परु०.........स्य च ।
उन्मत्तस्यापि पठतः प्राकृतं सम्प्रयोजयेत् ॥'
'अतिमत्तेषु तु कार्यं पाठ्यं पुनरुक्तिसंयुक्तम् ।' इत्यादि ।

तथा---

'विजयार्थानि नामानि राज्ञां स्त्रीणां तु कारयेत् ।
दत्ता सेना च मित्रा च वेश्यानाञ्च तथैव च ॥
मङ्गलार्थानि नामानि विटानामपि नित्यशः ।
लताकुसुमनामानि चेटीनामपि कारयेत् ॥
गभीरार्थानि नामानि उत्तमानां तथैव च ।
यस्मान्नामानुसदृशं कर्म चैषां भविष्यति ॥'

तत्र सिन्धुदत्तादयो वणिजः । शशिकलाकर्पूरमञ्जरीकुवलयमालाद्या नायिकाः, बकुलावलिकाचतुरिकाद्याश्चेट्यः, क्षीरोदविनयस्वरादयः कञ्चुकिनः, शाकल्यमौद्गल्याद्या विदूषकाः, चन्द्रसेनारागमञ्जर्याद्याः वेश्याः, गोणकगोयुक्ताद्याश्चण्डालाः, रुधिरप्रियाद्या राक्षसाः, रत्नशिखण्डचित्राङ्गदादयो विद्याधराः, हिरण्यशृङ्गाद्याः शैलाः, कपालशेखराद्याः पाषण्डाः । एवमन्यदप्यूह[2]नीयमिति ।

एवं लक्ष्येषु लक्ष्यान्तरेषु च प्रसिद्धत्वान्नामान्यभिधायैव परस्परामन्त्रणोपायानाह—

भगवन्तोऽधरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः ।

अधरैरवरैरित्यर्थः । देवर्षिप्रभृतयो भगवच्छब्देन वाच्या इति । तथा—

विप्रामात्याग्रजाश्चार्या नटीसूत्रभृतौ मिथः ॥ ६६ ॥
रथी सूतेन चायुष्मान् पूज्यैः शिष्यात्मजानुजाः ।
वत्सेति

1. T omits ऐश्वर्येण......प्रयोजयेत् ॥'. 2. ऊहितव्यमिति----T.

नटीसूत्रधारौ परस्परमार्यशब्देन वाच्याविति । अग्रजादिभिः शिष्यादय आयुष्मन्-वत्सशब्दाभ्यां वक्तव्या इति, शिष्यादिभिरग्रजाचार्यादयस्तात सुगृहीतनामेति च वक्तव्या इत्याह—

तातः पूज्योऽपि सुगृहीताभिधश्च तैः ॥ ६७ ॥

अपि शब्दाच्छिष्यादयोऽपि तातशब्देन वाच्या इति द्रष्टव्यम् । तथा—

भावोऽनुगेन सूत्री च मार्षेत्येतेन सोऽपि च ।

अनुगः पारिपार्श्विकः । सूत्री सूत्रधारः ।

देवः स्वामीति नृपतिर्भृत्यैर्भट्टेति चाधमैः ॥ ६८ ॥

आमन्त्रणीयाः पतिवज्ज्येष्ठमध्याधमैः स्त्रियः ।

देवीस्वामिनीभट्टिनीत्यादि पतिवदामन्त्रणमिति ।

स्त्रीषु विशेषमाह—

समा हलेति प्रेष्या च हञ्जे वेश्याज्जुका तथा ॥ ६९ ॥

कुट्टिन्यम्बेत्यनुगतैः पूज्याम्बाजरतीजनैः ।

तया वेश्यया कुट्टिन्यत्तेति वक्तव्या, अनुगतैर्जनैः पूज्या जरती अम्बेति वक्तव्या । तथा—

विदूषकेण भवती राज्ञी चेटी च शब्द्यते ॥ ७० ॥

उक्तञ्च—

'आर्येति ब्राह्मणो वाच्यो देवस्तु भगवानिति ।
सम्भाष्याः शाक्यनिर्ग्रन्था भदन्तेति प्रयोक्तृभिः ॥
मार्षेत्यमात्यो वक्तव्यः किञ्चिदूनस्तु मारिषः ।
समानश्च वयस्येत्यादि ।

एवं सामान्यतो लक्षितो नायकः । विस्तरतो लक्षणाशक्तिं वदन्नुपसंहरति—

चेष्टागुणोदाहृतिसत्त्वभावा—
न्निःशेषतो नेतृदशाविभिन्नान् ।
को वक्तुमीष्टो भरतो न यो वा
यो वा न देवः शशिखण्डमौलिः ॥ ७१ ॥

न यथोक्ता एव नेतृभेदा अनन्तास्तु ते । ते[1] च लक्ष्येषु स्वयमेव द्रष्टव्या इति भावः ।

इति महामहोपाध्यायश्रीबहुरूपमिश्रकृतायां दशरूपकदीपिकायां नेतृविचारो नाम द्वितीयः प्रकाशः ।

1. M omits ते.

[1] तृतीयः प्रकाशः

एवं तावद्वस्तुनेता विचारितः । इदानीं नाटकाद्यसाधारणलक्षणावसरे नाटकं प्रथमं विवक्षंस्तत्प्राथम्ये हेतुमाह—

प्रकृतित्वादथान्येषां भूयो रसपरिग्रहात् ।
सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते ॥ १ ॥

प्रकृतित्वं स्वयमुपदिष्टधर्मकत्वेन रूपकान्तराणामतिदेशद्वाराङ्गसमर्पकत्वं भूयो रसपरिगृहीतत्वं च विकासविस्तरक्षोभविक्षेपाभिधानचतुर्विधभेदप्रसूताङ्गाङ्गिभूताष्टरसाश्रयत्वं सम्पूर्णलक्षणत्वं च प्रकृत्यवस्थासन्धिपञ्चकतदङ्गचतुःषष्टिरीतिवृत्तिप्रवृत्तिपताकास्थानचतुष्टयादिसकललक्षणयोगित्वम् । तस्मादतिदिष्टकतिपयाङ्गकेभ्य एकैकरसाश्रयेभ्यश्च भाणप्रहसनादिभ्यः प्राथम्यं नाटकस्य युज्यत इति ।

इदानीं नाटकारम्भप्रकारमाह—

पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नटः ॥ २ ॥

प्रत्याहाराद्यङ्गप्रयोगः पूर्वरङ्गः । तानि च प्रत्याहारावतरणाश्रावणारम्भपरिघट्टनासङ्घोटनामार्ग[2]सारितशुष्कापकृष्टोत्थापनपरिवर्तननान्दीप्रभृतीनि । प्रयोजनं चैषाम्—

'प्रत्याहारे यातुधानाः प्रीयन्ते सह पन्नगैः ।
तथावतरणे यक्षा क्रव्यादा देवयोनयः ॥'

इत्यादि भरतेनैवोक्तम् ।

अथ नान्दी प्रधानभूता, अतः सैव कविभिर्निबध्यते । यथोक्तं बादरायणेन—

'यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रशान्तये ॥'

स्वरूपं तस्याः कोहलेनोक्तम्—

'देवतादिनमस्कारो मङ्गलारम्भपाठनम् ।
नाट्यादौ शस्यते यत्तु सा नान्दी कथिता बुधैः ॥'

---

1. M, T read 'प्रज्ञामयेन नेत्रेण रूपं द्रष्टुं य इच्छति । तत्कृते बहुरूपेण रचिता रूपदीपिका ॥' in the beginning of the third Prakasa.
2. ··· ··मार्गानुसारित०—M.

तथा[1]—

'आशीर्वचनसंयुक्ता यस्मान्नित्यं भवेदिह ।
देवद्विजनृपादीनां तस्मान्नान्दीति शब्दिता ॥'

इयञ्चाष्टपदा द्वादशपदा वा कार्या ।

यदुक्तम्—

'सूत्रधारः पठेत्तत्र मध्यमस्वरमाश्रितः ।
नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृताम् ॥'

तत्राष्टपदा यथा वीरचरितोपक्रमे—'अथ स्वस्थाय देवाये'ति । द्वादशपदा यथानर्घ-राघवे 'निष्प्रत्यूहमुपास्महे' इत्यादि । 'समपदा वा[2] नान्दी'त्येके मन्यन्ते । समपदा यथा बालरामायणे—'प्रसक्तेर्यः पात्रमि'ति । एवंरूपां नान्दीं विधाय तत्पाठके सूत्रधारे विनिर्गते[3] तत्समानानुकृतिपरः प्रविश्य मुखबीजादि सूचयेदित्यर्थः । यदुक्तम्—

'प्रयुज्य[4] रङ्गान्निष्क्रामेत् सूत्रधारः सहानुगः ।
स्थापकः प्रविशेत्तत्र सूत्रधारगुणाकृतिः ॥'

इतिवृत्तभेदेन स्थापकस्य रूपं सूच्यं चाह—

दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः ।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥ ३ ॥

दिव्यं मर्त्यं चेतिवृत्तं[5] दिव्यमर्त्ये इति । तत्र वस्तु यथा—'रामो मूर्ध्नी'त्यादि । यथा वानर्घराघवे—

'प्रीतिर्नाम सदस्यानां प्रिया रङ्गोपजीविनाम् ।
जित्वा तदपहर्त्तारमेष प्रत्याहरामि ताम् ॥
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥'

इति नायकोपनायकभूतयोः रामसुग्रीवयोरितिवृत्तसूचनमिति ।

बीजं यथा 'विजयि सहजमस्त्रैरि'त्यादि ।

पात्रं यथा शाकुन्तले—

'तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥'

इति दुष्यन्तपात्रप्रवेशसूचनमिति ।

---

1. आकथा—T. 2. T omits. 3. निर्गते—M. 4. प्रविश्य—T. 5. वृत्तं—T.

तथा—

रङ्गं प्रसाद्य[1] मधुरैः श्लोकैः काव्यार्थसूचकैः ।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥ ४ ॥

यथा वेणीसंहारे—

'सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥'

भारतीवृत्तिं लक्षयति—

भारती संस्कृतप्रायो वाग्व्यापारो[2] नराश्रयः[3] ।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः ॥ ५ ॥

भेदैरङ्गैरुपलक्षितेत्यर्थः । उक्तं च—

'या वाक्प्रधाना नृवरप्रयोज्या
स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता ।
स्वनामधेयैर्भरतैः प्रयोज्या
सा भारती नाम भवेत्तु वृत्तिः ॥'

तत्र प्ररोचना—

उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना ।

प्रस्तुतप्रशंसातः परिषत्प्रवृत्त्युन्मुखीकरणं प्ररोचनेति । यथानर्घराघवे—

'मद्वर्ग्याः [4]रसपाठगीतिगतिषु प्रत्येकमुत्कर्षिणो
मौद्गल्यस्य कवेर्गभीरमधुरोद्गारा गिरां सूक्तयः ।
धीरोदात्तगुणोत्तरो रघुपतिः काव्यार्थबीजं मुनि-
र्वाल्मीकिः फलति स्म यस्य चरितस्तोत्राय दिव्या गिरः ॥'

यथा वा—'श्रीहर्षो निपुणः कविरि'त्यादि । इति[5] परिषदः प्रवृत्त्युन्मुखीकरणम् ।

वीथी प्रहसनञ्चापि स्वप्रसङ्गेऽभिधास्यते ॥ ६ ॥
वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव

आमुखं लक्षयति—

तत्पुनः ।
सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ॥ ७ ॥
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।

---

1. प्रसाध्य —M. 2. व्यापारो वा—T. 3. Printed editions of the Dasarupaka read नटाश्रयः. 4. स्वर०—M. 5. M omits इति.

तस्य संज्ञान्तरमाह—

प्रस्तावना वा

सूत्रधारस्यैवंरूपं वचनं प्रस्तावनामुखमिति च गीयते। आमुखसंज्ञं मत्वाभिधानं दृष्टान्तार्थमिति। उक्तं च—

'नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संल्लापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैर्वीथ्यङ्गैरन्यथापि वा।
आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि वा॥'

प्रस्तावनायामेतान्यङ्गानीत्याह—

तत्र स्युः कथोद्घातः प्रवृत्तकम्॥ ८॥
प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश।

त्रीणि कथोद्घातादीनि त्रयोदश वीथ्यङ्गानीति षोडशाङ्गा प्रस्तावनेति। तत्र प्रथमं कथोद्घातं लक्षयति—

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः॥ ९॥
गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधैव सः।

वाक्यं यथा 'द्वीपादन्यस्मादि'ति सूत्रधारेण स्वदुहितृवृत्तान्तेऽभिहिते तदेव पठतो यौगन्धरायणस्य प्रवेश इति। अर्थं यथा मुद्राराक्षसे—

'क्रूरग्रहः स केतुश्चन्द्रमसं पूर्णमण्डलमिदानीम्।
अभिभवितुमिच्छति बलाद्रक्षत्येनं तु बुधयोगः॥'

इति सूत्रधारेणोक्ते 'आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छती'ति चाणक्यप्रवेशः।

[1]प्रवृत्तकमाह—

कालसाम्यसमाक्षिप्तः प्रवेशः स्यात् प्रवृत्तकम्[2]॥ १०॥

वसन्तादिप्रवृत्तकालसमानगुणवर्णनया सूचितपात्रप्रवेशात्[3] प्रवृत्तकम्[4]। यथा प्रतिज्ञाभीमे 'सत्पक्षा मधुरगिर' इति सूत्रधारेण शरत्समयवर्णने कृते दुर्योधनादिविनिपाताशङ्कया 'शान्तं पापं प्रतिहतममङ्गलमि'ति पारिपार्श्विकप्रवेशः।

प्रयोगातिशयमाह—

एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः।
पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः॥११॥

---

1. प्रवर्तक०—M. 2. प्रवर्तकम्—M. 3. ......प्रवेशः स्यात्—M. 4. प्रवर्तकम्—M.

यथा 'एष राजेव दुष्यन्त' इति ।

वीथ्यङ्गान्युद्दिशति—

उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ॥१२॥
असत्प्रलापव्याहारमृदवानि त्रयोदश ।

तत्र—

गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा ॥१३॥
यत्रान्योन्यसमालापो द्वेधोद्घात्यं तदुच्यते ।

गूढार्थं पदं तत्पर्यायश्चेत्येवं माला । प्रश्नश्चोत्तरञ्चेत्येवं वा माला द्वयोरुक्तिप्रत्युक्ती, तद्द्विविधमुद्घात्यम् । तत्राद्यं यथा विक्रमोर्वशीये 'विदूषकः—भो वअस्स ।' द्वितीयं यथा पाण्डवानन्दे——

'का भूषा बलिनां क्षमा परिभवः कोऽयं स्वकुल्यैः कृतः
किं दुःखं परसंश्रयो जगति कः श्लाघ्यो य आश्रीयते ।
को मृत्युर्व्यसनं शुचं जहति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरच्छन्नस्थितैः पाण्डवैः ॥'

यथा वा—

'नाटकं कैर्गुणैः शस्तं ये हरन्ति सतां मनः ।
क्व तेषां दृष्टमुत्थानं कालिदासकवेः कृतौ ॥'

यथा मालतिकायां वीथ्यां 'मालतिका—को विसमो संसारे को वा दुक्खेण तीरए तरिउं । [को विषमः संसारे को वा दुःखेन शक्यते तरितुम् ।] कुसुमशरस्तरलाक्षी-वियोगदुःखाम्बुधिश्चैव ॥ विदूषकः—को एसो कामो जेण तुमंपि दूमिज्जसि । किं पुरिसो आदु इत्थित्ति । [क एष कामो येन त्वमपि दूयसे । किं पुरुषोऽथवा स्त्रीति ।]

राजा——सखे, मनोजा[1]तिरनाधीना सुखेष्वेव प्रवर्तते । स्नेहस्य ललितो मार्गः काम इत्यभिधीयते ॥ विदूषकः—वअस्स, एव्वं पि ण जाणे । [वयस्य, एवमपि न जानामि ।] राजा—इच्छाप्रभवः सः । विदूषकः— किं जो जं इच्छदि सो तस्स कामोत्ति । [किं यो यमिच्छति स तस्य काम इति ।] राजा——अथ किम् । विदूषकः—ता जाणिदं जह अहं सूवयारसालाए भोअणं इच्छामित्ति । [तद् ज्ञातं यथाहं सूपकारशालायां भोजन-मिच्छामीति ।] राजा —तथा भवतु ।'

1. मनोजाधीरनाडीनां——M.

अवलगितमाह—

यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते ॥१४॥
प्रस्तुतेऽन्यत्र वान्यत्स्यात् तच्चावलगितं द्विधा ।

प्रस्तुतार्थसमावेशेनान्यकार्यस्य साधनम्, यथोत्तर[1]चरिते उत्पन्नवनविहारगर्भदौहृदाया सीताया दौहृदकार्या[2]नुप्रवेशेन जनापवादादरण्ये त्यागः । अप्रस्तुतस्य समावेशेनान्यकार्य-साधनम्, यथा 'तवास्मि गीतरागेण हारिणा प्रसभं हृतः' इत्यादि अप्रस्तुतदुष्यन्तमृगया-व्याजेन प्रवेदयमाणपात्रसूचनमिति ।

प्रपञ्चमाह—

असद्भूतं मिथःस्तोत्रं प्रपञ्चो हास्यकृन्मतः ॥१५॥

असद्भूतेन पारदारिक[3]त्वादिनैपुण्यादिना यान्योन्यस्तुतिः स प्रपञ्चः । यथा नागानन्दे—'णिच्चं जो पिबइ सुरं जणस्स पिअसङ्गमं च जो कुणइ । मह दे दो च्चिअ देवा बलदेवो कामदेवो अ ॥ [नित्यं यः पिबति सुरां जनस्य प्रियसङ्गमञ्च यः करोति । मम तौ द्वा एव देवौ बलदेवः कामदेवश्च ॥]'

अथ त्रिगतम्—

श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह ।
नटादित्रितयालापः पूर्वरङ्गे तदिष्यते ॥१६॥

श्रुतिसाम्यादनेकार्थयोजनात्मकं त्रिगतं प्रस्तावना[4]ङ्गमुदाह्रियते । यथेन्दुलेखायां[5] वीथ्यां 'राजा—

किं नु कलहंसनादो मधुरो मधुपायिनां तु झङ्कारः ।
हृदयगृहदेवतायास्तस्याः सन्नूपुरश्चरणः ॥'

छलं लक्षयति—

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलनाच्छलम् ।

यथा वेणीसंहारे भीमार्जुनौ—

'कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् ।
कृष्णाकेशोत्तरीयव्यपनयनमरुत पाण्डवा यस्य दासा
क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ॥'

---

1. T omits 'यथोत्तरचरिते ... त्यागः ।' 2. दौहृदकार्येऽनुप्रवेशे—M. 3. पानद्यूतादि०—T. 4. प्रस्तावनायाम्—M. 5. M omits इन्दुलेखायां.

वाक्केलिमाह—

विनिवृत्त्यास्य वाक्केलिर्द्विस्त्रिः प्रत्युक्तितोऽपि वा ॥१७॥

अस्येति प्रक्रान्तवाक्यावमर्श इत्येके । वयं तु अनन्तरोक्तच्छलाभिधायिनो वाक्यस्यापरिसमाप्तिं मन्यामह इति । द्विस्त्रिःप्रत्युक्तिरूपा वाक्केलिरनर्घराघवे सूत्रधारपारिपार्श्विकयोर्द्रष्टव्येति । प्रक्रान्तवाक्यापरिसमाप्तिरूपा[1] यथा—

'सकुण्डलं सकवचं सर्वलक्षणलक्षितम् ।
कथमादित्यसङ्काशं मृगी व्याघ्रं प्रसूयते ॥'

छलवाक्यापरिसमाप्तिरूपा यथा—

'त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण ॥'

इति रामं प्रति वासन्तीवचनस्याप्रियस्य विनिवृत्तिरिति ।

यथा वा—

'मलयमरुतां व्राता याता विकासितमल्लिका—
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि ।
घन घटयितुं तं निःस्नेहं य एव निवर्तने
प्रभवति गवां किं नश्छिन्नं स एव धनञ्जयः ॥'

अधिबलमाह—

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं भवेत् ।

यथा दशग्रीवनिग्रहे[2] रामरावणयोर्द्रष्टव्येति ।

गण्डमाह—

गण्डं प्रस्तुतसम्बन्धि[3] भिन्नार्थं सहसोदितम् ॥१८॥

यथा भानुमत्यङ्के 'दुर्योधनः—

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम् ॥'

इति स्वविजयप्रस्तावे पाण्डवजयोक्तिः ।

अवस्यन्दितं लक्षयति—

यथोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं हि तत् ।

---

1. ......समाप्तिमात्ररूपा—T. 2. दशग्रीववधे—M. 3. सम्बन्धात्—T.

यथा रत्नावल्याम्—'सुसङ्गता—सहि, जस्स किदे तुमं आअदा (सो) अअं पुरदो वट्टइ। [सखि, यस्य कृते त्वमागता सोऽयं पुरतो वर्तते।]' इति गृहीतफलकं च राजानमवलोक्य सुसङ्गतयोक्ते, 'सागरिका—कस्स किदे अहं आअदा। [कस्य कृतेऽहमागता।] सुसङ्गता—णं चित्तफलअस्सत्ति। [ननु चित्रफलकस्येति।]' इति सुसङ्गतावचनस्यान्यथा व्याख्येति।

नालिकामाह—

सोपहासा निगूढार्था नालिकैव प्रहेलिका ॥१९॥

प्रहेलिकेवेत्यर्थः। यथा मुद्राराक्षसे—'चरः—हंहो बम्हण, मा कुप्प। किंपि तुह उवज्झायो जाणादि, किंपि अम्हारिसा जणा जाणन्ति। [अहो ब्राह्मण, मा कुप्य। किमपि तवोपाध्यायो जानाति, किमप्यस्मादृशा जना जानन्ति।] शिष्यः—मूढ, किमस्मदुपाध्यायस्य सर्वज्ञत्वमपहर्तुमिच्छसि। चरः—जदि ते उवज्झायो सव्वं जाणादि ता जाणादु दाव कस्स चन्दो अणभिप्पेदोत्ति। [यदि तवोपाध्यायः सर्वं जानाति, तर्हि जानातु तावत्कस्य चन्द्रोऽनभिप्रेत इति।] शिष्यः—किमनेन ज्ञातेन भवती'त्युपक्रमे 'चाणक्यः—चन्द्रगुप्तादपरक्तान् जानामी'त्युक्तं भवति।

असत्प्रलापमाह—

असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः।

स्पष्टार्थः।

'मूर्खजनसन्निकर्षे हितमपि यत्र प्रभाषते विद्वान्।
न च गृह्यतेऽस्य वचनं विज्ञेयोऽसत्प्रलापोऽसौ॥'

इति भोजः[1]।

यथा रामाभ्युदये सीतापहरणसाचिव्याभिहितेन मारीचेन जीवतो रामस्य परिभवो न कर्तव्य इत्युक्ते 'रावणः—आ मूढ मारीच—

युक्त्यैव क्षत्रबन्धो परिभवमसमं जीवतः कर्तुमिच्छन्[2]
मायासाहायके त्वं निपुणतर इति प्रार्थ्यसे नासमर्थः।
यच्चान्यत्तत्र[3] वज्रप्रहति[4]मसृणितस्फारकेयूरभाजः
सज्जास्त्रैलोक्यलक्ष्मीहठहरणसहा बाहवो रावणस्य॥'

इति मारीचहितवचनस्य रावणेनाग्रहणादसत्प्रलापत्वमुक्तम्।

---

1. M omits इति भोजः. 2. ………मिच्छा—T. 3. यत्रान्यत्—T. 4. ………प्रहृति०—M.

यथा वा—

'भुक्ता हि मया[1] गिरयः स्नातोऽहं वह्निना पिबामि नभः ।
हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि[2] ॥'

इत्यसम्बद्धकथारूपोऽसत्प्रलापः ।

व्याहारं लक्षयति—

अन्यार्थमेव व्याहारो हास्यलोभकरं वचः ॥२०॥

यथा मालविकाग्निमित्रे लास्यप्रयोगावसाने '(मालविका निर्गन्तुमिच्छति) विदूषकः–मा दाव उपदेसविसुद्धा गमिस्ससि । [मा तावत्, उपदेशविशुद्धा गमिष्यसि ।]' इत्युपक्रमे 'गणदासः—(विदूषकं प्रति) आर्य, उच्यतां यस्त्वया क्रमभेदो लक्षितः । विदूषकः—पढमोवदेसदंसणे बम्भणस्स पूजा पडिच्छिदव्वा, सा तु लंघिदा । [प्रथमोपदेशदर्शने ब्राह्मणस्य पूजा प्रत्येषितव्या, सा तु लङ्घिता ।] (मालविका स्मयते ।)' इत्यादि राज्ञो मालविकादर्शनार्थं विदूषकस्य हास्यलोभकारिवचनमिति ।

मृदवं लक्षयति—

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।

तत्र गुणा दोषा यथानर्घराघवे नायकानन्दे—

'कस्मैचित् कपटाय कैटभरिपूरःपीठदीर्घालया
देवि त्वामभिवाद्य कुप्यसि न चेत्तत्किञ्चिदाचक्ष्महे ।
यत्रो मन्दिरमम्बुजन्म किमिदं विद्यागृहं यच्च ते
नीचान्नीचतरोपसर्पणमपामेतत्किमाचार्यकम् ॥'

दोषा गुणा यथा शाकुन्तले—

'मेदश्छेदकृशोदरं लघु भवत्युत्साहयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्येऽचले
मिथ्या हि व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ॥'

एवं प्रस्तावनाङ्गत्वेन वीथ्यङ्गानि व्युत्पाद्य तेषां प्रस्तावनायां वैकल्पिकत्वं दर्शयंस्तामुपसंहरति—

एषामन्यतमेनार्थं पात्रं वाक्षिप्य सूत्रभृत् ॥२१॥
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत् ।

अथैवं गुणयुक्तो महीपतिर्दिव्यो वा नाटके नायकः स्यात् । तच्चरितञ्चेतिहासप्रसिद्धं विधातव्यमित्याह—

1. महागिरयः—M. 2. तृप्यामि—T.

अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान् ॥२२॥
कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः ।
प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः ॥२३॥
तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम् ।

अनुद्वेजनीया सांसिद्धिका अभिगम्यगुणाः ।

अतिरोहितमन्यद् यत्तु तत्र प्रख्याते आधिकारिके रसादीनामनुचितं छद्मना बालिवधादि तत्कविना हेयमन्यथाकरणीयं वेत्याह—

यत्तत्रानुचितं किञ्चिन्नायकस्य रसस्य वा ॥२४॥
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ।

यथानर्घराघवे वालिवधोऽन्यथाकृतः, रामाभ्युदये परित्यक्तः ।

आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च ॥२५॥
खण्डशः सन्धिसंज्ञांस्तान् भागानपि च खण्डयेत् ।
चतुःषष्टिस्तु तानि स्युरङ्गानीत्य्

उक्तेन प्रकारेण हेयमुपादेयञ्च निश्चित्य बीजबिन्दुपताकादिरूपेण कथाशरीरं पञ्चधा विभजेत्, पुनर्मुखप्रतिमुखसन्धिनियतत्वेन तत्संज्ञकान् कथाशरीरावयवान् पञ्चापि सन्ध्यङ्गचतुःषष्टिरूपेण बन्धयेदित्यर्थः ।

अपरं वृत्तमाह—

अपरं तथा ॥२६॥

तत्र पताकावृत्तस्यापि प्रकारमाह—

पताकावृत्तमप्यूनमेकाद्यैरनुसन्धिभिः ।
अङ्गान्यत्र यथा लाभम्

अनुसन्धिभिः सन्ध्यङ्गैरित्यर्थः । पूर्वार्द्धं प्रति तृतीयपादहेतुत्वेनान्वय इति ।

अन्ये तु समासादिसन्ध्यन्तराण्यनुसन्धय इति मन्यन्ते[1] ।

प्रकरीन्यासप्रकारमाह—

असन्धि प्रकरीं न्यसेत् ॥२७॥

एवमवयवशो विभक्ते नाटकशरीरे—

आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः ।

आदौ प्रस्तावनायाः समासौ नाटकोपक्रम इति । केन पुनः कार्ययोगेन कुत्र विष्कम्भकः केन वा कुत्राङ्क इत्याह—

1. अनुमन्यन्ते—T.

अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम् ॥२८॥
यदा सन्दर्शयेच्छेषं कुर्याद् विष्कम्भकं तदा।
यदा तु सरसं वस्तु मूलादेव प्रवर्तते ॥२९॥
आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः।

मूलादादित इत्यर्थः। यथा रामाभ्युदयोपक्रमे शूर्पणखानासिकाकर्तनादिवस्तुविस्तरो रामरावणवैरकारणतयापेक्षितो नीरसश्च विष्कम्भकेनैव सूचितः। आदित एवाङ्को यथा शाकुन्तले। तत्र विष्कम्भः[1] पूर्वप्रकाशे लक्षितः। अङ्कमिदानीं लक्षयति—

प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः ॥३०॥
अङ्को नानाप्रकारार्थसंविधानरसाश्रयः।

रङ्गप्रवेशेन प्रत्यक्षं निर्दिश्यमाननायकचरितो नानाविधप्रयोजनसंविधानरसाधिकरणत्वेनोत्सङ्गकल्पोऽङ्क इति। यथाह—'भावा रसाश्च यस्मिन्नारोहन्त्यङ्कवत् सोऽङ्क'इति। अथवा प्रबन्धचिह्नत्वादप्यङ्कः। यथाह—'नानाविधानयुक्तो लक्ष्यमेव च यः प्रबन्धस्य' इति।

अङ्काश्रयस्य रसस्येत्थं परिपोषः कर्त्तव्य इत्याह—

अनुभावविभावाभ्यां स्थायिनो व्यभिचारिभिः ॥३१॥
गृहीतमुक्तैः कर्त्तव्यमङ्गिनः[2] परिपोषणम्।

अनुभावशब्देन सात्त्विकानामप्युपादानम्। स्थायिनोऽङ्गिन इत्यन्वयः। न च वस्तुरसादीनामन्यतरोपमर्देनान्यतराभिनिवेशः कर्त्तव्य इत्याह—

न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ॥३२॥
रसं वा न तिरोदध्याद् वस्त्वलङ्कारलक्षणैः।

उपमादयोऽलङ्कारा अतिशयादयो नाटकालङ्काराः शोभोदाहरणसंशयदृष्टान्तक्षमागुणवादाक्रन्दकपटादीनि लक्षणानीति। नाटकाङ्केषु वीरशृङ्गारयोरन्यतर एवाङ्गी प्रधानः कर्त्तव्य इत्याह—

एको रसोऽङ्गी कर्त्तव्यो वीरः शृङ्गार एव वा ॥३३॥
अङ्गमन्ये रसाः सर्वे

निर्वहणसन्धावद्भुतरसोऽवश्यकर्त्तव्य इत्याह—

कुर्यान्निर्वहणेऽद्भुतम्।

एवं नानारसभावाधिकरणमङ्कं व्युत्पाद्य तन्मध्ये पुरुषादिस्नानभोजनमैथुनानि न प्रत्यक्षेण दर्शनीयानीत्याह—

दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम् ॥३४॥

---

1. M reads एव after विष्कम्भः. 2. ·········मङ्गिनां—M.

संरोधं भोजनं स्नानं सुरतं चानुलेपनम् ।
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् ।।३५।।

अङ्के नैवोपनिबध्नीयात्, प्रवेशकादिभिरेव सूचयेदित्यर्थः ।

तथा—

नाधिकारिवधः क्वापि त्याज्यमावश्यकं न च ।

अधिकृतनायकवधः प्रवेशकादिनापि न सूचयेत् । आवश्यकं तु देवपितृकार्याद्यवश्यमेव क्वचित् कुर्यात् ।

तथा—

एकाहचरितैकार्थ इत्थमासन्ननायकः ।।३६।।
पात्रैस्त्रिचतुरैरङ्कैस्तेषामन्तेऽस्य निर्गमः ।

एकस्मिन्नहनि यन्नायकचरितं तत्प्रतिपादकः एकप्रयोजनसम्बन्धः सन्निहितनायको देवीविदूषकादित्रिचतुरपात्रप्रयोज्योऽवसाने निष्क्रान्तसमस्तपात्रश्चाङ्कः कर्त्तव्य इति । अर्धदिवसप्रयोज्योऽप्यङ्क इति भरतमतानुसारिणो मन्यन्ते । अस्याप्यङ्कस्यान्ते तेषां पात्राणां निर्गम इति योजना ।

तथा—

पताकास्थानकान्यत्र बिन्दुमन्ते च बीजवत् ।।३७।।

अत्राङ्क इत्यर्थः । पताकास्थानानि पूर्वमुक्तानि ।

एवमङ्कान् व्युत्पाद्य[1] प्रवेशकविष्कम्भादिपुरस्कृतत्वं तेषामभिदधान उपसंहरति—

एवमङ्काः प्रकर्त्तव्याः[2] प्रवेशादिपुरस्कृताः ।

अर्थोपक्षेपकेषु प्रवेशविष्कम्भकौ प्रधानभूताविति । अयमत्र निर्णयः । रसभावनिरन्तरो बीजबिन्दुव्याप्तिपुरस्कृतः सन्निहितनायक एकाहचरितरूपो विष्कम्भादिपुरस्कृतो नायकासन्ननातिबहुपात्रप्रयोज्यः पताकास्थानालङ्कृतश्चाङ्क इति । यथा प्रतिज्ञाभीमसुग्रीवाभिषेकादयः । अर्धदिवसप्रयोज्यो यथा नागानन्दे गौरीगृहाङ्कः ।

तथा—

पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्[3] ।।३८।।

एतदुक्तं भवति—प्रकृत्यवस्थासन्ध्यर्थोपक्षेपकपञ्चकवृत्तिप्रवृत्तिपताकास्थानकचतुष्कसन्ध्यङ्गचतुःषष्टिषट्त्रिंशल्लक्षणाङ्गगद्यपद्यमिश्रसर्वभाषाभ्युपेतो देवक्षत्रियान्यतरधीरोदात्तनायको वीरशृङ्गारान्यतराङ्गिरस उपमारूपककाव्यार्थालङ्कारशोभित इतिहासादिप्रसिद्धाधिकारिकोऽनधिकाम्यूनदशपञ्चाङ्को रूपकविशेषो नाटकमिति । तत्र पञ्चाङ्कं

1. प्रतिपाद्य—M. 2. प्रयोक्तव्याः—T. 3. वरम्—T.

यथा विक्रमोर्वशीयादि । षडङ्कं यथा रामाभ्युदयादि, सप्ताङ्कमभिज्ञानशाकुन्तलादि, अष्टाङ्कं नलविजयादि, नवाङ्कं देवीपरिणयादि, दशाङ्कं बालरामायणादि । रूपकाणां च सर्वेषां[1] नाटकं प्रधानम् । यथाहुः—

'न तच्छास्त्रं न सा विद्या न तच्छिल्पं न ताः कलाः ।
नासौ योगो न तज्ज्ञानं नाटके यन्न दृश्यते ॥'

अन्यैरप्युक्तम्—

'अपि लभ्येत विद्वद्भिर्मुक्तिरभ्यासकौशलात् ।
न तु नाटकविद्येयं सर्वलोकानुरञ्जनी ॥'

नाट्यवेदं विधाय···पितामहः —

'धर्मादिसाधनं नाट्यं सर्वदु.खापनोदकम्[2] ।
अनुसेवध्वमृषयस्तस्योत्थानन्तु नाटकम् ॥'

तस्य नाटकविशेषस्य तोटकस्य 'दिव्यमानुषसंयोगो यत्राङ्केऽङ्के विदूषकः' इति श्रीहर्षदेवेन लक्षणमुक्तम् । तत्तोटकस्यापि विक्रमोर्वशी॰स्य प्रत्यङ्कं विदूषकाभावादव्यापकत्वम् ।

'दिव्यमानुषसंयोगस्तोटकं नाटकानुगम् ।
नवाष्टसप्तपञ्चाङ्कं दिव्यमानुषसङ्गमम् ॥
तोटकं नाम तत्प्राहुर्भेदं नाटकसम्भवम् ।' इत्याचार्याः ।

तत्र नवाङ्कं मेनकानहुषम्, अष्टाङ्कं मदलेखा, सप्ताङ्कं स्तम्भितरम्भम्, पञ्चाङ्कं विक्रमोर्वशीयमिति ।

अथ सुबन्धस्तु पञ्चधा नाटकमाह—

'पूर्णञ्चैव प्रशान्तञ्च भास्वरं ललितं तथा ।
समग्रमिति विज्ञेया नाटके पञ्चजातयः ॥' इति ।

तत्र मुखादिपञ्चकयुक्तं पूर्णं यथा वेणीसंहारे···(क्र)त्यारावणादि । प्रचुरसात्त्वतीवृत्तिकं 'किन्ते भूय: प्रियमुपहरामी'ति कार्यसंहारविधुरं प्रशान्तं यथा स्वप्नवासवदत्तनाटकम् । प्रचुरारभटीवृत्तिकं वीराद्भुतरसप्रायं भास्वरं यथानर्घराघवबालरामायणादि । प्रचुरकैशिकीवृत्तिकं शृङ्गाररसप्रायं ललितं यथा मालविकाग्निमित्रविक्रमोर्वशीयादि । सर्ववृत्तिसम्पन्नं सर्वलक्षणसंयुतं समग्रं यथा नृत्यचारकादि (?) ।

अथ प्रकरणं लक्षयति—

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् ।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम् ॥३९॥

---

1. T omits सर्वेषां. 2. ···नोदकृत—M.

धीरप्रशान्तं सापायं धर्मकामार्थतत्परम् ।

यथा––नन्दनपरिणयनाघोरघण्टव्यवसायकपालकुण्डलाकोपलक्षणापायबहुलमालती-विवाहतत्परो मन्त्रिपुत्रो माधवः ।

तथा—

शेषं नाटकवत्सन्धिप्रवेशकरसादिकम् ॥४०॥

नायिकाविशेषमाह––

नायिका तु द्विधा नेतुः कुलजा गणिका तथा ।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित् ॥४१॥

अत्र पक्षे नियमान्तरमाह––

कुलजाभ्यन्तरा वेश्या बाह्या नातिक्रमोऽनयोः ।
आभिः प्रकरणं त्रेधा

नायिकाद्वयसंकीर्णस्य प्रकरणस्यासंकीर्णाभ्यां विशेषमाह—

सङ्कीर्णं धूर्तसङ्कुलम् ॥४२॥

अत्र भोजः––

'यत्र कविरात्मबुद्ध्या वस्तुशरीरञ्च नायकञ्चैव ।
औत्पत्तिकं प्रकुरुते तज्ज्ञेयं प्रकरणं नाम ॥'

तथा––

'दास[1]विटश्रेष्ठियुतं वेशस्त्र्युपचारकारणोपेतम् ।
मन्दकुलस्त्रीचरितं काव्यं कार्यं प्रकरणे तु ॥'

किञ्च भोजराजेन प्रकरणे शुद्धविष्कम्भ एव कार्य इत्युक्तम्––

'मध्यमपुरुषैर्नित्यं योज्यो विष्कम्भकोऽत्र तन्त्रज्ञैः ।
संस्कृतवचनानुगतः सङ्क्षेपार्थः प्रवेशकवत् ॥

तथा[2]—

'नोदात्तनृपोपेतं न दिव्यचरितं न राजसम्भोगम् ।
न बाह्यजनसम्प्रयुक्तं तज्ज्ञेयं प्रकरणं लोके ॥'

अत्र कोहलः––

'शकारः कुट्टिनी चेटी धर्मशास्त्रबहिष्कृताः ।
विटचेटादयो बाह्या नित्यं प्रकरणे मताः ॥'

शकारो द्वितीयप्रकाश एव लक्षितः ।

---

1. दासी—M. 2. यथा—T.

'वेषोपचारकुशलो मधुरो दक्षिणः कविः ।
ऊहापोही च वाग्मी च चतुरस्रो विटो मतः ॥'

यथा मृच्छकटिकायां प्रथमेऽङ्के वसन्तसेनानुधावनेन प्रविष्टौ विटशकाराविति ।

अयमत्र निर्णयः । धीरशान्तनायकमुत्पाद्येतिवृत्तं शृङ्गारादिरसं कैशिकीवृत्तिमदपायबहुलधर्मकामार्थसिद्धिदं विकल्पितसमुच्चितकुलवधूगणिकानायिकं शकारविटचेटादिसमाकुलं सङ्कीर्णविष्कम्भादिविधुरम् उदात्ततरराजसम्भोगादिविधुरं यथोक्तरूपाविरोधि अनधिकान्यूनदशपञ्चाङ्कादिनाटकलक्षणोपेतं रूपकं प्रकरणमिति । यथा कुलवधूनायिकं मालतीमाधवम्, गणिकानायिकं यथा तरङ्गदत्तम्, उभयनायिकं यथा मृच्छकटिका, अमात्यचरितं यथा पद्मावतीपरिणयादि, वणिक्चरितं यथा पुष्पदूषितकादि ।

अथ प्रकरणनाटिकयोः सङ्करात्मिकां[1] नाटिकां प्रस्तौति—

लक्ष्यते नाटिकाप्यत्र[2] सङ्कीर्णान्यनिवृत्तये ।

सङ्कीर्णा प्रकरणनाटकसङ्करात्मिकेत्यर्थः ।

तां लक्षयति—

तत्र वस्तु प्रकरणान् नाटकान्नायको नृपः ॥४३॥
प्रख्यातो धीरललितः शृंगारोऽङ्गी सलक्षणः ।

अनेनैव सङ्कीर्णत्वमपि[3] दर्शितमिति । इदानीं नाटिकायाः सङ्करात्मकत्वमेव स्थापयितुं रूपकान्तरत्वं निराकरोति—

स्त्रीप्रायचतुरङ्कादिभेदकं यदि चेष्यते ॥४४॥
एकद्वित्र्यङ्कपात्रादिभेदेनानन्तरूपता ।

यानि तु नाटिकायां वक्ष्यमाणानि स्त्रीप्रायचतुरङ्कत्वादीनि लक्षणानि तै रूपकभेदं प्रत्यप्रयोजकैर्नाटिकाया नाटकप्रकरणाभ्यां भेदेऽभिधीयमाने एकद्वित्र्यादिपात्रभेदेन रूपकाणामानन्त्यप्रसंग इति श्लोकार्थः । वस्तुनेतृरसादीनामेव रूपकशरीरतया प्रविष्टानां तद्भेदं प्रति प्रयोजकत्वं न पुनर्बहिष्ठानामङ्कपात्रादिसङ्ख्यानां प्रयोजकत्वम् । वस्तुनेतृरसात्मकं त्रितयं नाटिकायां प्रकरणनाटकाभ्यां समानमित्यभिप्रायः । तत्र प्रख्यातनृपनायकत्वेनोत्पाद्येतिवृत्तत्वेन शृङ्गाररसत्वेन च नाटकप्रकरणतुल्यत्वमुक्तं पूर्वस्मिन् ग्रन्थे । एवं वस्तुनेतृरसानां[4] भेदेनाभेदं व्युत्पाद्येदानीं भेदेनौपयिकानपि धर्मान्नाटिकास्वरूपप्रतिपत्त्यर्थमाह—

देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥४५॥

---

1. सङ्करात् before सङ्करात्मिकां in M. 2. नाटिका ह्यत्र—M.
3. सङ्कीर्णत्वं प्रदर्शितमिति—M. 4.……रसानामभेदं प्रतिपाद्य –T.

गम्भीरा मानिनी कृच्छ्रात्तद्वशान्नेतृसङ्गमः ।
नायिका तादृशी मुग्धा दिव्याकारा मनोहरा ॥४६॥
अन्तःपुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः ।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् ॥४७॥
नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः ।
कैशिक्यङ्गैश्चतुर्भिश्च युक्ताङ्कैरिव नाटिका ॥४८॥

नेतृसङ्गम इति नायकस्य नायिकायाश्च समा[1]गम इति । तादृशी नृपवंशजा । नर्मतत्स्फञ्जतत्स्फोटादीनि कैशिक्यङ्गानि । चतुर्भिरङ्कैरिवेति प्रसिद्धवदुपादानेन चतुरङ्किका नाटिकेत्युक्तम् । किञ्चास्याः प्रकरणनाटकभेदकत्वं लक्षणान्तरकारैरप्युक्तम् —

'प्रकरणनाटकभेदो रूपकमिह नाटिका भवति ।'

किमिह बहुभिर्भरतेनैवोक्तं प्रकरणनाटकानुवृत्तौ—

'अनयोः सम्बन्धवशादेको भेदः प्रयोक्तृभिर्ज्ञेयः ।'

नाटीत्यत्र कैश्चिदवमर्शसन्धिलोप उक्तः चतुर्थस्यैकलोपे त्विति । कैशिकीवृत्तिप्रधानायां नाटिकायां वीररौद्रादयो रसा अङ्गत्वेन निविशन्ते[2] । यदुक्तम्—

'मृद्वीयं कैशिकीवृत्तिर्न स्यादन्यरसाश्रया[3] ।
न कुञ्जरतटाघातपात्रं भवति कन्दली ॥'

तथा चास्यां—

'न विटः पीठमर्दश्च सहायो बाह्यसञ्चरः[4] ।
अन्तःपुरचरो राज्ञो विरूपः स्याद् विदूषकः ॥'

अयमिह निर्णयः । उत्पाद्येतिवृत्तं प्रख्यातधीरललितनृपनायकं शृङ्गारादिरसं कैशिकीवृत्तितदङ्गचतुष्कयुक्तं स्त्रीप्रायपात्रकं देव्यायत्तनायिकासमागमं केवलविदूषककृतनर्मसाचिव्यं चतुरङ्कमविरोधिनाटकधर्मान्तरं रूपकं नाटिकेति । यथा विद्धसालभञ्जिकारत्नावली - माधवी-प्रियदर्शिकाप्रभृतयोऽनन्ताः । एषैव नाटिका विष्कम्भप्रवेशकशून्या प्राकृतभाषाविशेषमयी अङ्कस्थानीययवनिकान्तरचतुष्कवती सट्टकमिति गीयते । यथा कर्पूरमञ्जरीप्रभृतयः ।

अथ भाणं लक्षयति—

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा ।
यत्रोपवर्णयेदेको निपुणः पण्डितो विटः ॥४९॥

---

1. सङ्गम—M. 2. ······नानुविशन्ते—M. 3. स्यादस्य रसाश्रयः—T. 4. बाह्यसत्वरः—T.

सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद् वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः ॥५०॥
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च ।
भूयसा भारतीवृत्तिरेकाङ्कं वस्तु कल्पितम् ॥५१॥

धूर्तश्चोरद्यूतकारादयः मुखसन्धिर्निर्वहणसन्धिश्च द्वावेव सन्धी । अतः प्रतिमुखगर्भविमर्शानां लोपः । तदुक्तम्—

'द्वितृतीयचतुर्थानां त्रिलोपे लोप इष्यते ।'

गेयपदस्थितपाठ्यादीनि दश लास्याङ्गानि । यथा तत्र वीणादिवादनसहितं नायिकागीतं गेयपदम्, भूमिचारचञ्च[1]त्पुटादिसहितं नायिकावचनं स्थितपाठ्यम्, सभ्रूविलासचरणविलासाभिनयमासीननायिकाप्रयुक्तमासीनपाठ्यम्, स्त्रीवेशधारिणा पुंसा प्रयुक्तं लास्यं द्विमूढकम्[2], विविधवाद्यताललयान्वितं लास्यं पुष्पगन्धिका, अन्यानुरक्तं नायकमाशङ्क्य प्रेमच्छेदकुपितनायिकाप्रयुक्तं प्रच्छेदकम्, अपरिज्ञात[3]पार्श्वस्थमुत्कण्ठितनायिकावचनमुत्तरोत्तरम्, नायकनायिकयोः सव्यलीकोपालम्भं प्रश्नोत्तरवचनमुक्तप्रत्युक्तम्, ललितचारिप्रयोजितं त्रिमूढकम्—

गेयपदं स्थितपाठ्यमासीनं पुष्पगन्धिका ।
प्रच्छेदकं त्रिमूढञ्च सैन्धवाख्यं द्विमूढकम् ॥५२॥
उत्तरोत्तरकञ्चान्यदुक्तप्रत्युक्तमेव च ।
लास्ये दशविधं ह्येतदङ्गनिर्देशकल्पनम् ॥५३॥

एतदुक्तं भवति—लास्याङ्गदशकोपेतमुत्पाद्येतिवृत्तं बहुलभारतीवृत्तिकं शृङ्गारप्रधानं सूचितवीररसं स्वपरानुभूतधूर्तचरितवर्णनात्मकं विटोक्तिप्रत्युक्त्याकाशभाषितभूयिष्ठं मुखनिर्वहणसन्धिमात्रकमेकाङ्कं रूपकं भाण इति । यथा ललितनागरादयः ।

अथ प्रहसनं लक्षयति—

तद्वत्[4] प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः ।
पाषण्डविप्रप्रभृतेश्चेटचेटीविटाकुलम् ॥५४॥
चेष्टितं वेषभाषादि शुद्धं हास्यवचोऽन्वितम् ।
कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैः ॥५५॥
विकृतं सङ्कराद् वीथ्या सङ्कीर्णं धूर्तसङ्कुलम् ।

भावकल्पं प्रहसनं त्रेधा—शुद्धं वैकृतं सङ्कीर्ण[5]मिति । तत्र शाक्यनिर्ग्रन्थयाज्ञिकादीनां

1. चर्चरिकादि—M. 2. विमूढकम्—M. 3. अपरिज्ञातं—T. 4. तत्र—M.
5. समाकुलम्—M.

वेषभाषादिचेष्टितरूपं हास्यवचोऽन्वितं चेटचेटीविटाकुलं शुद्धम्। तत्र वीथ्यङ्गैरुद्घात्यकाव[1]लगितादिभिर्मिश्रं सङ्कीर्णम्। तत्र कामुकविटादिवचोवेषधारिभिः[2] नपुंसकवृद्धपरिव्राजका[3]दिभिः कृतं वैकृतमिति। एवं त्रिविधे प्रहसने स्मितहसितोपहसितापहसितादिरूपेण षड्विधो हास्य एव रसः कार्य इत्याह—

रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु ॥५६॥

अयमर्थः। मुखसन्धिनिर्वहणसन्धिद्वयोपेतमेकाङ्कं हास्यैक[4]रसं शाक्यनिर्ग्रन्थयाज्ञिकादिचेष्टितात्मकं कल्पितवस्तुकं रूपकं प्रहसनमिति। तत्र शुद्धं यथा शशिकलादि, सङ्कीर्णं यथा भगवदज्जुकादि, वैकृतं स्वयमेव द्रष्टव्यमिति।

डिमं लक्षयति—

डिमे वस्तु प्रसिद्धं स्याद् वृत्तयः कैशिकीं विना।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः ॥५७॥
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः।
रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः ॥५८॥
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि ॥५९॥
चतुरङ्कश्चतुःसन्धिर्निर्विमर्शो डिमः स्मृतः।

चन्द्रसूर्योपरागैश्च युक्त इत्यर्थः। [5]न्याय्योपेते रौद्ररसेऽङ्गिनि प्रधानभूत इति। एतदुक्तं भवति। प्रख्यातवस्तुविषयं प्रख्यातात्यन्तधीरोद्धतयक्षराक्षसगन्धर्वदेवादिनायकमवमर्शसन्धियुक्तं चतुरङ्कं षोडशनायकं कैशिकीवृत्तिविधुरं भारत्यारभटीभूयिष्ठं हास्यशृङ्गारविधुरं रौद्राङ्गिरसं भयानकबीभत्सादिबहुलं चन्द्रसूर्योपरागवात्योल्कानिर्घातवातादिमहोत्पातबहुलं न्यायप्रवृत्तनायकं सङ्ग्रामसंरम्भभूयिष्ठं रूपकं डिम इति। यथा तारकोद्धरणवृत्रोद्धरणादि। एवमुक्तं डिमलक्षणं त्रिपुरदाहाख्ये डिमे सम्पूर्णमिति ब्रह्मणोदितमित्याह—

'इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम्।'

[6]तदप्युदाहरणमित्यर्थः।

अथ व्यायोगं लक्षयति—

ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः ॥६०॥

---

1. T omits वलगिता. 2. धरैः—T. 3. परिव्राजिकादिभिः—M.
4. हास्यरसोपेत—T. 5. न्याय्योपेते रौद्रे रसेऽङ्गिनि—M; न्याय्योपेतरौद्र—T.
6. तदुदाहरण०—T.

हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः ।
अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजयो यथा ॥६१॥
एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः ।

एतदुक्तं भवति । प्रख्यातधीरोद्धतानेकराजर्षिनायकं प्रख्यातेतिवृत्तमस्त्रीनिमित्तयुद्धनियुद्धाधर्षणयुक्तमारभटीसहितं हीनतरकैशिकीशृङ्गारहास्यं डिमवद्भयानकरौद्रादिदीप्तरसबहुलं गर्भावमर्शसन्धिविधुरसन्धित्रयोपेतमेकदिवसचरितरूपमेकाङ्कं रूपकं व्यायोग इति । बहवस्तत्र पुरुषा व्यायच्छन्ते कथाशरीरवशादिति भोजवचनाच्च[1] व्यायोगशब्दनिर्वचनं द्रष्टव्यम् । यथा हि सिन्धुराजभीमविक्रमादयः ।

समवकारं लक्षयति—

कार्यं समवकारे स्यादामुखं नाटकादिवत् ॥६२॥
ख्यातं देवासुरं वस्तु निर्विमर्शास्तु सन्धयः ।
वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः ॥६३॥
द्वादशोदात्तविख्याताः फलं तेषां पृथक् पृथक् ।
बहुवीररसाः सर्वे यद्वदम्भोधिमन्थने ॥६४॥

नाटकादिवदामुखमिति रूपकान्तराणामपि प्रदर्शनार्थमिति ।

अङ्कैस्त्रिभिस्त्रिकपटस्त्रिशृङ्गारस्त्रिविद्रवः ।

कपटत्रयं विद्रवत्रयं च वक्ष्यते[2] । कामशृङ्गारोऽर्थशृङ्गारो धर्मशृङ्गार इति शृङ्गारास्त्रयः । तत्र धर्मप्रधानः शृङ्गारो धर्मशृङ्गारः । शेषौ तद्वत् । यथाह[3]—

'यस्मिन् धर्मप्रापकमात्महितं भवति साधनं बहुधा ।
व्रतनियमतपोयुक्तो ज्ञेयोऽसौ धर्मशृङ्गारः ॥'
'अर्थव्याप्तिर्यस्मिन् भवति हि बहुधा स चार्थशृङ्गारः ।
स्त्रीसम्भोगविषयको ह्यथार्थमपीष्यते सद्भिः ॥'
'कन्याविलोभनकृतः प्राप्तौ स्त्रीपुंसयोः सुरम्यो वा ।
निभृतः सावेगो वा विज्ञेयः कामशृङ्गारः ॥'

तत्रैकैकेष्वङ्केषु एकैकः कपटः शृङ्गारो विद्रवश्च विधेय इति केचिन्नैव नियममिच्छन्ति । इदानीमित्थं प्रथमोऽङ्कः कर्त्तव्य इत्याह—

द्विसन्धिरङ्कः प्रथमः कार्यो द्वादशनाडिकः ॥६५॥

मुखप्रतिमुखयुक्तो द्वादशनाडिकालक्षणकालपरिमाणयुक्त इति । चतुर्भिर्द्वाभ्यां च नाडिकाभ्यां यथासङ्ख्यं द्वितीयतृतीयावित्याह—

1. भोजवचनेन—M. 2. लक्ष्यते—T. 3. यदाह—T.

चतुर्द्विनाडिकावन्त्यौ

नाडिकां लक्षयति—

नाडिका घटिकाद्वयम् ।

मुहूर्तस्य तुरीयांशो घटिकेति ।

हेतुतः[1] कपटं त्रेधा विभजते—

वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः ॥६६॥

विद्रवहेतुमाह—

नगरोपरोधयुद्धे वाताग्न्यादिषु विद्रवः ।

[[2]धमर्थिकामैः शृङ्गारो नात्र बिन्दुप्रवेशकौ ॥६७॥

वीथ्यङ्गानि यथालाभं कुर्यात् प्रहसने यथा ।]

विद्रवस्य यद्यपि न हेतुतस्त्रैविध्यमुक्तं तथापि समवकारे आवृत्त्या त्रित्वमभिमतमिति द्रष्टव्यम्—

'युद्धजलसम्भवो वा वाय्वग्निगजेन्द्रसम्भ्रमकृतो वा ।
नगरोपरोधजो वा विज्ञेयो विद्रवस्त्रिविधः ॥' इति ।

हेतुत एव क्वचित् त्रैविध्यमुक्तमिति उष्णिग्गायत्र्यादीनि यानि बन्धकुटिलानि वृत्तानि समवकारे कविभिस्तानि प्रयोज्यानि इति भोजेन कुटिलवृत्तत्वमपि समवकार इत्युक्तम् । एतदुक्तं भवति । प्रख्यातदेवासुरेतिवृत्तं विमर्शविधुरसन्धिचतुष्कोपेतं मन्दकैशिकीवृत्तिकं प्रख्यातोदात्तदेवदानवपृथक्प्रयोजनवद्द्वादशनायकोपेतं वीरप्रधानसर्वरसोपेतं त्र्यङ्कं त्रिशृङ्गारं त्रिविद्रवं त्रिकपटमष्टादशनाडिकाप्रमाणपरिवीतं द्विसन्धिकप्रथमाङ्कमुष्णिगादि-कुटिलवृत्तसम्बद्धं रूपकं समवकार इति । यथामृतमन्थनशक्रानन्दादयः ।

वीथीं लक्षयति—

वीथी तु कैशिकीवृत्तौ सन्ध्यङ्काङ्कैस्तु भाणवत् ॥६८॥

रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम् ।

युक्ता प्रस्तावनाख्यातैरङ्गैरुद्घात्यकादिभिः ॥६९॥

एवं वीथी विधातव्या द्व्येकपात्रप्रयोजिता ।

अयमर्थः । एकेन द्वाभ्यां वा पात्राभ्यां प्रयुक्तमुद्घात्यकादित्रयोदशाङ्गोपेतं सर्वरस-स्पर्शि शृङ्गारप्रधानं कैशिकीवृत्तियुक्तं मुखनिर्वहणाख्यसन्धिद्वयोपेतमेकाङ्कं रूपकं वीथीति । यथा मालतिकेन्दुलेखावकुलवीथिकाकामदत्तादयः ।

उत्सृष्टिकाङ्कं लक्षयति—

उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत् ॥७०॥

---

1. हेतुभिः—T. 2. M, T omit 'धमर्थि ....प्रवेशकौ'.

रसस्तु करुणः स्थायी नेतारः प्राकृता नराः ।
भाणवत्सन्धिवृत्त्यङ्कै[1]र्युक्तः स्त्रीपरिदेवितैः ॥७१॥
वाचा युद्धं विधातव्यं तथा जयपराजयौ ।

अयमर्थः । प्रख्यातेतिवृत्तं करुणरसप्रधानं प्राकृतनरनायकमेकाङ्कं मुखनिर्वहणसन्धिद्वययुक्तं भारतीवृत्तिप्रधानं स्त्रीपरिदेवितबहुलं वाङ्मात्रप्रयुक्तयुद्धनियुद्धजयपराजयं रूपकमुत्सृष्टिकाङ्क इति । यथा नागविजयादि ।

ईहामृगं लक्षयति—

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिमत् ॥७२॥
नरदिव्यावनियमान्नायकप्रतिनायकौ ।
ख्यातौ धीरोद्धताव्

ख्यातो धीरोद्धतो दिव्य एव नायको नर एव प्रतिनायक इत्यादिनियमो नास्तीत्यर्थः । प्रतिनायकस्तु भ्रमादयुक्तकारी भवेदित्याह—

अन्यो विपर्यासादयुक्तकृत् ॥७३॥

किञ्च—

दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराकारमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत् ॥७४॥

इच्छतोऽस्य प्रतिनायकस्येति यावत् ।

संरम्भं परमानीय युद्धं व्याजान्निवर्तयेत् ।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः ॥७५॥

ईहामृगे व्यायोगधर्मानतिदिशति—

कार्यो व्यायोगवत्

कार्य ईहामृग इत्यर्थः । तत्र विशेषमाह—

किन्तु स्त्रीहेतुरिह सङ्गरः ।

व्यायोगस्त्वस्त्रीनिमित्तसङ्ग्राम इति । एतदुक्तं भवति । प्रख्यातोत्पाद्येतिवृत्तमिश्रं चतुरङ्कसहितं मुखनिर्वहणसन्धित्रयोपेतं प्रख्यातधीरोदात्तदेवनरनायकं दिव्यस्त्रीनिमित्त[2]सङ्ग्रामं [3]हठहरणप्रयुक्तायुक्तकारिप्रतिनायकं व्याजनिर्वर्तितयुद्धसंरम्भं तुल्यव्यायोगवृत्तिरसं रूपकमीहामृग इति । यथा कुसुमशेखरविजयोर्वशीमदनादयः ।

---

1. ……वस्त्वङ्कैर्युक्तं—M. 2. ………निमित्तवृत्त०—M. 3. T omits हठ.

अत्र मुखप्रतिमुखगर्भावमर्शनिर्वहणानां मध्ये डिमसमवकारयोर्व्यायोगेहामृगयोर्भाण-प्रहसनोत्सृष्टिकाङ्कवीथिषु यथाक्रममेकद्वित्रिलोपः। तत्रैवं प्रत्येतव्यम्--

एकलोपे चतुर्थस्य द्विलोपे त्रिचतुर्थयोः।
द्वितृतीयचतुर्थानां त्रिलोपे लोप इष्यते ॥

एवं रूपकाणां लक्षणमुक्तम्। इदानीं लक्ष्यं लक्षणं वस्तुशरीरञ्चावधानेनालोच्य-यत्नसिद्धैरलङ्कारैरतिमधुरैर्वाक्यैः प्रबन्धं कुर्यादित्यभिदधान उपसंहरति—

इत्थं विचिन्त्य दशरूपकलक्ष्ममार्ग—
मालोच्य वस्तु परिभाव्य कविप्रबन्धान्।
कुर्यादयत्नवदलङ्कृतिभिः प्रबन्धं
वाक्यैरुदारमधुरैः स्फुटमन्दवृत्तैः ॥७६॥

इति बहुरूपमिश्रविरचितायां दशरूपकदीपिकायां तृतीयः प्रकाशः।

चतुर्थः प्रकाशः

रसं व्युत्पादयति—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वादुत्वं स्थायी भावो रसः स्मृतः ॥१॥

विभावाश्चन्द्रोदयादयः, अनुभावा हसितवीक्षितविहृतादयः, सात्त्विकाः स्तम्भप्रलयरोमाञ्चादयः, व्यभिचारिणो निर्वेदादयः । एतैः सर्वैः स्वादुतां नीयमानो रत्यादिस्थायी भावो रस इति । यथा—

'इयमविरलश्वासा शुष्यन्मुखी भिदुरस्वरा
तनुरवयवैः श्रान्तिस्रस्तैरुपैति विपाण्डुताम् ।
स्फुरति हृदयं बाष्पायेते दृशौ गलति स्मृति-
र्मयि रसतया शोको भावश्चिरेण विपच्यते ॥'

विभावं लक्षयति—

ज्ञायमानतया तस्य विभावो भावपोषकृत् ।
[[1]आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा ॥ २ ॥]

यो हि चन्द्रोदयादिर्विभाव्यमानः सन् स्थायिनं भावं रसतया पुष्णाति स विभाव इति । स चालम्बनोद्दीपनत्वप्रभेदेन द्विधा । तत्र परस्परानुरागावलम्बनभूता नायकनायिकादय आलम्बनविभावाः ।

यथा—

'अनारतोत्कण्ठितयोः प्रसिद्ध्यता
समागमेनाविरतिर्न विद्यते[2] ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानु[3]रागयोः ॥'

यथा वा—

'रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् ।' इत्यादि ।

उद्दीपनविभावश्चन्द्रोदयदक्षिणसमीरणोपवनदर्शनादिः । यथा—

'इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।

---

1. M, T omit आलम्बनो०. 2. मां प्रति—T. 3. समानरागयोः—M.

किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥'

यथा वा—

'अयमुदयति चन्द्रश्चन्द्रिकाधौतविश्वः
परिगतविमलिम्नि व्योम्नि कर्पूरगौरः ।
ऋजुरजतशलाकास्पर्द्धिभिर्यस्य पादै-
र्जगदमलमृणालीपञ्जरस्थं विभाति ॥'

अनुभावं लक्षयति—

अनुभावो विकारस्तु भावसंसूचनात्मकः ।

हृदयगतरत्यादिभावमात्रो भ्रूक्षेपकटाक्ष[1]वीक्षणादिविकारः कार्यत्वादनुमापयन्ननुभाव इत्युच्यते । पश्चाद् भवतीत्यनुभाव इत्येके ।

यथा—

'गामणि सुआअ संपइ दरवलिअविअड्ढमुद्धणअणेहिं ।
तरुणं पेच्छंतीए हावो भुमआहियो भुमिओ ॥'
[ग्रामणीसुतायाः सम्प्रत्युपभुक्तविदग्धमुग्धनयनाभ्याम् ।
तरुणं प्रेक्षमाणाया हावो भ्रूहितो भ्रान्तः ॥]

स्थायिनोऽष्टौ, सात्त्विकाश्चाष्टौ त्रयस्त्रिंशद् व्यभिचारिणो भावा इति एकोनपञ्चाशद्भावाः । कारणकार्यभूतयोर्यथाक्रमं विभावानुभावयोर्लोकव्यवहारादेव सिद्धत्वान्न वक्तव्य[2] एव विशेषभाव इत्याह—

हेतुकार्यात्मनोः सिद्धिस्तयोः संव्यवहारतः ॥ ३ ॥

सात्त्विकलक्षणावसरे तेषामपि भावत्वेन[3] भावसामान्यं प्रथमं लक्षयति—

सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ।

रामादिगतसुखदुःखादिभावेन सामाजिकमनसो वासनं तद्भावापत्तिर्भाव इत्यर्थः । सत्यप्यनुभावत्वे सत्त्वादेवोत्पन्नत्वात् सात्त्विकाः स्तम्भप्रलयरोमाञ्चादयः पृथग्भावा भवन्ति । तच्च सत्त्वं परगतसुखदुःखाद्यनुभवे चेतसोऽत्यन्तानुकूल्यतस्तद्भावभावनात्मक[4]मित्याह—

पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः ॥ ४ ॥
सत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम् ।

---

1. ············कटाक्षभुजाक्षेपतटाकवीक्षादिविकारः – M. 2. कर्त्तव्य—M.
3. तेषां विभावत्वेन – M. 4. तद्भावनात्मिकामित्याह—M.

अथ सात्त्विकान् भावानुद्दिशति—

> स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू ॥ ५ ॥
> अश्रुवैस्वर्यमित्यष्टौ

तत्र स्तम्भप्रलयौ लक्षयन्नन्येषां प्रसिद्धत्वान्न वाच्यं लक्षणमित्याह—

> स्तम्भोऽस्मिन्निष्क्रियाङ्गता ।
> प्रलयो नष्टसंज्ञत्वं शेषाः सुव्यक्तलक्षणाः ॥ ६ ॥

स्तम्भो यथा—

'नादस्तावद् विकलकुररीकूजितस्निग्धतार-
श्चित्ताकर्षी परिचित इव श्रोत्रसंवादमेति ।
अन्तर्भिन्नं भ्रमति हृदयं विह्वलत्यङ्गमङ्गं
गात्रस्तम्भः स्खलयति[1] गतिं कः प्रकारः किमेतत् ॥'

प्रलयो यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं
कृतोपकारेव रतिर्बभूव ॥'

रोमाञ्चो यथा—

'वयं तथा नाम यदात्थ किं वदा-
म्ययं त्वकस्माद् विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं
विशुद्धमुग्धः कुलकन्यकाजनः ॥'

स्वेदो यथा—

'परिओस विअ······जणमज्झे पडिवण्णत्ति ।' (अस्पष्टम्)

वैवर्ण्यं यथा—

'नखदलितहरिद्राग्रन्थिगौरे शरीरे
भवति विरहजन्मा कोऽप्ययं पाण्डुभावः ।
बलवति सति यस्मिन् सार्धमावर्त्य हेम्ना
रजतमिव मृगाक्ष्याः कल्पितान्यङ्गकानि ॥'

वेपथुर्यथा—

'मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तरचिता मम मञ्जरीति ।

1. तुलयति—M.

अन्याऽपि किं न सखि भाजनमीदृशानां
वैरी न चेद्भवति वेपथुरन्तरायः ॥'

अश्रु यथा—

'त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया–
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥'

वैस्वर्यं यथा—

'तत्तादृग्दशकण्ठवञ्चनरुषा धूमायमानो[1] गिरं
नार्धोक्तिप्रविलीनवर्णविधुरामार्यः समाप्नोति मे ।'

इत्यादि ।

अथ व्यभिचारिभावानां तच्छब्द[2]निर्वचनेन सामान्यलक्षणमाह—

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ॥ ७ ॥

विशब्दो विशेषवचनः । अभिशब्दस्त्वाभिमुख्यवचनः । चरिर्गतिकर्मा । अतोऽयमर्थः समुद्रस्थानीये स्थायिनि भावे ये कल्लोलस्थानीया निर्वेदादयो निमज्जनोन्मज्जनव्यतिकरेण रसात्मकपरिणामं प्रति विशेषादानुकूल्येन चरन्ति, ते व्यभिचारिण इति—

तानेवोद्दिशति—

निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्योग्रचिन्ता
त्रासेर्ष्यामर्षगर्वस्मृतिमरणमदा सुप्त[3]निद्रावबोधाः ।
व्रीडापस्मारमोहाः सुमतिरलसता वेगतर्कावहित्था
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च ॥ ८ ॥

तत्र निर्वेदं कारणतः स्वरूपतः कार्यतश्च लक्षयति—

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।
तत्र चिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वासदीनताः ॥ ९ ॥

तत्त्वज्ञानादयो विभावाः, स्वावमाननं स्वरूपम् । तत्र चिन्तादयोऽनुभावाः । तत्त्वज्ञानविभावको निर्वेदो यथा—

'प्राप्ताः श्रियः कामदुघास्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ।

---

1. ····· धूमायमानो गिरन्नर्धोक्तिप्रविलीयमानविधुरामार्यः—T. 2. तत्तच्छब्द०—T. 3. स्वप्न०—M.

सम्प्रीणिताः प्रणयिनो विभवैस्ततः किं
कल्पस्थितं तनुभृतां तनुभिस्ततः किम् ॥'

आपद्विभावको निर्वेदो यथा—

'राज्ञो विपद्बन्धुवियोगदुःखं
देशच्युतिर्दुर्गममार्गखेदः ।
आस्वाद्यतेऽस्याः कटुनिष्फलायाः
फलं मयैतच्चिरजीविकायाः ॥'

ईर्ष्याविभावको निर्वेदो यथा—

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥'

वीरशृङ्गारयोर्व्यभिचारी निर्वेदो यथा—

'ये बाहवो युधि न वैरिकठोरकण्ठ-
पीठोच्चलद्रुधिरराजिविराजितांसाः ।
नापि प्रियापृथुपयोधरपत्रभङ्ग-
सङ्क्रान्तकुङ्कुमरसाः खलु निष्फलास्ते ॥'

आत्मानुरूपं रिपुं रमणीं चालभमानस्य निर्वेदादियमुक्तिः । एवं रसान्तराणामङ्गभाव उदाहार्यः—

रसानङ्गः स्वतन्त्रो निर्वेदो यथा—

'कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्' इत्यादि । विभावानुभावरसाङ्गानङ्गभेदेनानेक[1]शाखो निर्वेदो दर्शनीयः ।

अथ ग्लानिः—

रत्याद्यायासतृट्क्षुद्भिर्ग्लानिर्निष्प्राणतेह च ।
वैवर्ण्यकम्पानुत्साहक्षामाङ्गवचनक्रियाः ॥१०॥

यथा—

'लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बा
रजनय इव निद्राक्लान्तनीलो[2]त्पलाक्ष्यः ।
तिमिरमिव दधानाः स्रंसिनः केशपाशा-
नवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः ॥'

1. ......भेदाग्नेकशाखो—M. 2. ......रक्तो०—M.

शङ्कामाह—

अनर्थप्रतिभा शङ्का परक्रौर्यात् स्वदुर्नयात् ।
कम्पशोषाभिवीक्षादिरत्र वर्णस्वरान्यता ॥११॥

यथा—

'प्रीते पिनाकिनि पुरा परिभूय मर्त्यान्
वज्रेऽन्यतो यदभयं स भवानहंयुः ।
तन्मर्मणि स्पृशति मामतिमात्रमद्य
हा वत्स शान्तमथवा दशकन्धरोऽसि ॥'

श्रमं लक्षयति—

श्रमः खेदाऽध्वरत्यादेः स्वेदोऽस्मिन्मर्दनादयः ।

अध्वनो यथा—

'मूले मूले पथि विटपिनां खेदिनी दीर्घमास्ते
शुष्यत्कण्ठी पिबति सलिलं निर्झरे निर्झरे च ।
जातत्रासा निमिषति दृशौ कन्दरे कन्दरे च
स्थाने स्थाने वहति च मतिं बद्धवासाभिलाषान् ॥'

रतिश्रमो यथा—

'प्राप्य मन्मथरसादतिभूमिं दुर्वहस्तनभरात्सुरतस्य ।
शश्रमुः श्रमजलार्द्रललाट[1]श्लिष्टकेशमसितायतकेश्यः ॥'

अथ धृतिः—

सन्तोषो ज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत् ॥१२॥

ज्ञानात् सन्तोषो यथा—

'वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषा विशेषाः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥'

शक्तितः सन्तोषो यथा—

'राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः ।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः ॥'

---

1. ललाटा—T.

अथ जडता—

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥१३॥

इष्टदर्शनाद्यथा—

'एवमालिनिगृहीतसाध्वसं शङ्करो रहसि[1] सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्तिनी प्रिये ॥'

अनिष्टश्रवणाद्यथोदात्तराघवे 'राक्षसः—

तावन्तस्ते महात्मानो निहताः केन राक्षसाः ।
येषां नायकता प्राप्तास्त्रिशिरःखरदूषणाः ॥

द्वितीयः—गृहीतधनुषा रामहतकेन । प्रथमः—एकाकिनैव । द्वितीयः—अदृष्ट्वा कः प्रत्येति ? तथापि शृणु । धनुर्द्वितीय एव तस्मिन् तावतोऽस्मद्बलस्य—

सद्यश्छिन्नशिरःश्वभ्रमज्जत्कङ्ककुलाकुलाः ।
कबन्धाः केवलं जातास्तालोत्ताला रणाङ्गणे ॥

प्रथमः—यद्येवं तदहमेवंविधः किं करोमि' इति । यथा वा—'तीव्राभिषङ्गे'त्यादि ।

अथ हर्षः—

प्रसक्तिरुत्सवादिभ्यो हर्षोऽश्रुस्वेदगद्गदाः ।

उत्सवादिविभावजनितचित्तप्रमोदो हर्षः । तत्राश्रुप्रभृतयोऽनुभावा यथा—

'सहसा मा........॥' (अस्पष्टम्)

अथ दैन्यम्—

दौर्गत्यादेरनौजस्यं दैन्यं कार्ष्ण्यामृजादिमत् ॥१४॥

दारिद्र्यन्यक्कारादिविभावैरनोजस्कता चेतसो दैन्यम् । तत्र कृष्णतामलिनवसनदर्शनादयोऽनुभावाः । यथा—

'वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्ता न मे ।
यत्नात् सञ्चिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ॥'

औग्र्यं लक्षयति—

दृष्टेऽपराधे दौर्मुख्यशौर्यै[2]श्चण्डत्वमुग्रता ।
तत्र स्वेदशिरःकम्पतर्जना[3]ताडनादयः ॥१५॥

1. रभसि—M. 2. ......चौर्यै०—M. 3. तर्जन०—T.

यथा—

'उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसन्तानरोषा-
दुद्दामस्यैकविंशत्यवधि विशसतः सर्वतो राजवंश्यान् ।
पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमान-
क्रोधाग्नेः कुर्वतो मे न खलु न विदितः सर्वलोकैः स्वभावः ॥'

चिन्तामाह—

ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत् ।

यथा—

'अस्तमितविषयसङ्गा मुकुलितनयनोत्पला मुहुः श्वसिता ।
ध्यायति किमप्यलक्ष्यं बाला योगाभियुक्तेव ॥'

यथा वा—

'पक्ष्माग्रग्रथिताश्रुबिन्दुनिकरैर्मुक्ताफलस्पर्धिभिः
कुर्वत्या हरहासहारि हृदये हारावलीभूषणम् ।
बाले बालमृणालनालवलयालङ्कारकान्ते करे
विन्यस्याननमायताक्षि सुकृती कोऽयं त्वया स्मर्यते ॥'

अथ त्रासः—

गर्जितादेर्मनःक्षोभस्त्रासोऽस्मिन् कम्पितादयः ॥१६॥

यथा माघे—

'त्रस्यन्ती चलशफरी विघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे रमण्यः ॥'

अथासूया—

परोत्कर्षाक्षमाऽसूया गर्वदौर्जन्यमन्युजा ।
[1]दोषोक्त्यवज्ञे भ्रुकुटीमन्यौ क्रोधेङ्गितानि च ॥१७॥

गर्वजा यथा—

'अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
न्यूनो दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया ।
उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः
स्त्रीरत्नं च जगत्पतिर्दशमुखो रुष्टः कथं मृष्यते ॥'

---

1. दोषोक्त्यवज्ञाभ्रुकुटीमन्युक्रोधेङ्गितानि च —T.

दौर्जन्यजा यथा—

'यदि परगुणा न क्षम्यन्ते यतस्व गुणार्जने
नहि परयशोनिन्दाव्याजैरलं परिमार्जितुम् ।
विरमसि न चेदिच्छाद्वेषप्रसक्तमनोरथो[1]
दिनकरकरान् पाणिच्छत्रैर्नुदन् श्रममेष्यति ॥'

मन्युजा यथा—

'पुरस्तन्व्या गोत्रस्खलितचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात् किमपि लिखितुं दैवहतकः ।
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी ॥
ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या कोपप्रणयरभसाद् गद्गदगिरा ।
अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं
रुषा ब्रह्मास्त्रं मे शिरसि निहितो वामचरणः ॥'

अथामर्षः—

अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥१८॥

यथा—

'युष्मच्छासनलङ्घनाम्भसि मया मग्नेन नाम स्थितं
[2] प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि ।
क्रोधोल्लासितशोणिताक्तगदस्योच्छिन्दतः कौरवान्
अद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव ॥'

यथा वा[3]—'प्रायश्चित्तं चरिष्यामी'त्यादि ।

अथ गर्वः—

गर्वोऽभिजनलावण्यबलैश्वर्यादिभिर्मदः ।
कर्मास्यो[4]द्धर्षणावज्ञा सविलासाङ्गवीक्षणम् ॥१९॥

कर्म स्यात् कार्यमनुभाव इत्यर्थः ।

यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति ॥'

---

1. ······मनोरथात्—M. 2. प्राप्तानामपि गर्हणा—M, T. 3. च—T
4. कर्मास्य धर्षणा—T.

यथा वा[1]--

'मुनिरयमथ वीरस्तादृशस्तत् प्रियं मे
विरमतु परिकम्पः कातरे क्षत्रियासि ।
तपति विततकीर्तेर्दर्पकण्डूलदोष्णः
परिचरणसमर्थो राघवः क्षत्रियोऽहम् ॥'

अथ स्मृतिः--

सदृशज्ञानचिन्ताद्यैः संस्कारात् स्मृतिरत्र च ।
ज्ञातत्वेनार्थभासिन्यां भ्रूसमुन्नयनादयः ॥२०॥

यथा--

'मरुत्वदृदम्भोलिक्षणघटितघोरश्वयथुना
निसर्गोदग्रेण प्रसभमुरसा पीतगगनः ।
श्रियं देवध्रीचीं निजभुजवनोद्दामकरिणी-
मयं कुर्वन् वीर स्मरसि कथमासीद् दशमुखः ॥'

यथा वा--'मैनाकः कथमयं रुणद्धी'त्यादि ।

अथ मरणम्—

मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते ।

तत्र वीरव्यभिचारिमरणं यथा--

'प्राणैः समं कनकपुष्करकण्ठमाला
सूत्रेण दाशरथये विहितातिथेयः ।
दिक्कूलमुद्वह यशस्सरिदादिशैलः
शेते स वीरशयने कपिचक्रवर्त्ती ॥'

शृङ्गारे तु मरणव्यवसाय एव भूयसा निबन्धनीयः । नायकनायिकयोरन्यतरमरणे रसविच्छेदप्रसङ्गात् । क्वचित् क्वचिदेव तु कविकौशलवशान्मरणोत्तरकालमपि संविधानकवशेन सम्भोगप्रतिलम्भो निबध्यमानो रसं पुष्णाति । यथा—कादम्बरीचन्द्रापीडयोः पुण्डरीकमहाश्वेतयोश्च । यथा वाजेन्दुमत्योः--

'तीर्थे तोयव्यतिकरलवे जह्नुकन्यासरय्वो—
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकचतुरया कान्तया सङ्गतोऽसौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥'

1. च—M.

यदपि मन्मथमरणं तत्र रतिविप्रयोगे देवीपरिणयनोत्तरकालं मन्मथोज्जीवनेन रसः प्रतिसंहृत इत्येके। वयं तु ब्रूमस्तत्रापि रतिप्रलापादौ करुणरसपरत्वात् तत्प्रकर्षायैव मरणं न शृङ्गारव्यभिचारीति सर्वमवदातमिति।

मरणव्यवसायो यथा--

'धत्ते चक्षुर्मुकुलिनि रणत्कोकिले बालचूते
मार्गे गात्रं क्षिपति बकुलामोदगर्भस्य वायोः।
दावप्रेम्णा सरसविसिनीपत्रमात्रान्तरायः
ताम्यन्मूर्तिः श्रयति बहुशो मृत्यवे चन्द्रपादान्॥'

यथा वा--

'सम्प्राप्तेऽवधिवासरे क्षणमनु त्वद्वर्त्मवातायनं
वारं वारमुपेत्य निष्क्रियतया निश्चित्य किञ्चिच्चिरम्।
सम्प्रत्येव निवेद्य केलिकुररीं सास्रं सखीभ्यः शिशोः
माधव्याः सहकारकेण करुणः पाणिग्रहो निर्मितः॥'

अथ मदः—

हर्षोत्कर्षो मदः पानात् स्खलदङ्गवचोगतिः॥२१॥
निद्रा हासोऽत्र रुदितज्येष्ठमध्याधमेषु तु।

यथासंख्यमुत्तममध्यमाधमेषु निद्राहासरुदितान्यनुभावा इति।

यथा—

'भावहारि हसितं च जनानां कौशलं दृशि विकारविशेषाः।
चक्रिरे भृशमृजोरपि वध्वाः कामिनेव तरुणेन मदेन॥'

अथ सुप्तम्—

सुप्तं निद्रोद्भवं तत्र श्वासोच्छ्वासक्रिया परम्॥२२॥

इत्यनेन (?) गात्रपरिष्पन्दनोत्स्वप्नायितादि। यथोक्तम्--

'सुप्तं निद्रोद्भवमन्यत् तदुत्स्वप्नायितादिकृत्।'

यथा—

'एते लक्ष्मण जानकीविरहितं[1] मां खेदयन्त्यम्बुदाः
मर्माणीव च घट्टयन्त्यलममी क्रूराः कदम्बानिलाः।
इत्थं व्याहृतपूर्वजन्मचरितो यो राधया वीक्षितः
सेर्ष्यं शङ्कितया स वः सुखयतु स्वप्नायमानो हरिः॥'

1. ·········विरहिणं--T.

यथा वा--

'लघुनि तृणकुटीरे क्षेत्रकोणे यवानां
नवकलमपलालप्रस्तरे सोपधाने ।
परिहरति सुषुप्तं हालिकद्वन्द्वमाराद्
कुचकलशमहोष्माबद्धरेखस्तुषारः ॥'

अथ निद्रा--

मनस्सम्मीलनं निद्रा चिन्तालस्यक्लमादिभिः ।
तत्र जृम्भाङ्गभङ्गाक्षिमीलनोच्छ्वसितादयः ॥२३॥

यथा--

'निद्रार्धमीलितदृशो मदमन्थराणि
नात्यर्थवन्ति न च यानि निरर्थकानि ।
अद्यापि मे मृगदृशो मधुराणि तस्या-
स्तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥'

यथा वा--'प्रहरकमपनीय स्वं निदिद्रासतोच्चैरि'त्यादि ।

अथ विबोधः--

विबोधः परिणामादेस्तत्र जृम्भाक्षिमर्दने ।

यथा--

'प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा-
मात्मव्यापारगुर्वी जनितजललवा जृम्भणैः स्वाङ्गभङ्गैः ।
नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥'

अथ व्रीडा--

दुराचारादिभिर्व्रीडा धार्ष्ट्याभावस्तमुन्नयेत् ।
साचीकृताङ्गावरणवैवर्ण्याधोमुखादिभिः ॥२४॥

यथा--

'दर्पणे च परिभोगदर्शिनी
पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमनुबिम्बमात्मनो
यानि कानि च चकार लज्जया ॥'

अथापस्मारः--

आवेशो ग्रहदुःखाद्यैरपस्मारो यथाविधः ।
भूपातकम्पप्रस्वेदलालाफेनोद्गमादयः ॥२५॥

यथा—

> 'आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
> फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥'

अथ मोहः—

> मोहो विचित्तता[1] भीतिदुःखावेशानुचिन्तनैः ।
> तत्राज्ञानभ्रमाघातघूर्णनादर्शना[2]दयः ॥२६॥

यथा—

> 'विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
> प्रबोधो निद्रा वा किमु विषविसर्पः किमु मदः ।
> तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
> विकारः कोऽप्ययति च तापं च कुरुते ॥'

अथ मतिः—

> भ्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः ।

यथा—

> 'असंशयं क्षत्रपरिग्रहक्षमा
> यदार्यमस्यामभिलाषि मे मनः ।
> सतां हि सन्देहपदेषु वस्तुषु
> प्रमाणमन्तःकरणप्रवृत्तयः ॥'

अथालसता—

> आलस्यं श्रमगर्भादेर्जह्य[3]जृम्भासिता[4]दिमत् ॥२७॥

यथा—

> 'चलति कथञ्चित् पृष्टा यच्छति वाचं कथञ्चिदालीनाम् ।
> आसितुमेव हि मनुते गुरुगर्भभरालसा सुतनुः ॥'

अथावेगः—

> आवेगः सम्भ्रमोऽस्मिन्नभि[5]सरजनिते शस्त्रनागाभियोगो
> वातात् पांसूपदिग्धस्त्वरिततरगतिर्वर्षजे पिण्डिताङ्गः ।
> उत्पातात् स्रस्तताङ्गेष्वहित(हित)कृते शोकहर्षानुभावौ
> वह्नेर्धूमाकुलः स्यात् करिजमनु भयस्तम्भकम्पापसाराः ॥२८॥

---

1. मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः—T. 2. M, T omit········दर्शना॰. 3. Printed editions read जाड्य. 4. ·········जम्भासिकादिमत्—T. 5. T reads·········हिमर॰.

अभिमरः शत्रुशस्त्रप्रहारः । अभिमरवातादिविभावाष्टकजनिते यथा—क्रमं शस्त्रनागाभियोगाद्यनुभावस्कन्धो व्यवस्थित इत्यर्थः। करिजमन्विति द्विरदजनितमावेशमनु पश्चात् भयादयोऽनुभावा भवन्ति । अभिमरजनितो यथा—

'किं किं सिंहस्ततः किं नरसदृशवपुर्देवचित्रं गृहीतो
नैवेदृक् कोऽपि जीवो द्रुतमुपरिपतन् पश्य सम्प्राप्त एव ।
शस्त्रं शस्त्रं न शस्त्री त्वरितमिह महाकर्कशत्वं नखाना-
मित्थं दैत्याधिनाथो निजनखकुलिशैर्येन भिन्नः स वोऽव्यात् ॥'

वातजनितं यथा—'वाताहतं वसनमि'त्यादि ।

अहितकृतो यथोदात्तराघवे मृगरूपेण मारीचेन तद्ग्रहणप्रहितो लक्ष्मणः संशयं नीयत इति चित्रमायेन मृगवेषधारिणोक्ते—'रामः—

वत्सस्याभयवारिधेः प्रतिभयं शङ्के कथं राक्षसात्
त्रस्त[1]श्चैष मुनिर्विरौति मनसश्चास्त्येव मे सम्भ्रमः ।
माहासीर्जनकात्मजामिति मुहुः स्नेहाद् गुरुर्याचते
न स्थातुं न च गन्तुमाकुलमतेर्मूढस्य मे निश्चयः ॥'

एवमन्येऽप्यावेगा उदाहार्या इति ।

अथ तर्कः—

तर्को विचारः सन्देहाद् भ्रूशिरोऽङ्गुलिनर्तकः ।

तत्रैव यथा लक्ष्मणो रामं प्रति—

'किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
मात्रा स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा ।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजो मे गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम् ॥'

अथवा—

'कः समुचिताभिषेकादार्यं प्रच्यावयेद् गुणज्येष्ठम् ।
मन्ये ममैष पुण्यैः सेवावसरः कृतो विधिना ॥'

अथावहित्था—

लज्जाद्यैर्विक्रियागुप्ताववहित्थाङ्गविक्रिया ।

यथा—

'एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥'

1. त्रस्त॰—T.

अथ व्याधिः—

व्याधयः सन्निपाताद्यास्तेषामन्यत्र विस्तरः ॥२९॥

अन्यत्रायुर्वेद इत्यर्थः। यथा—

'मनोरोगस्तीव्रं विषमिव विसर्पन्नविरतं
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानत इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती॥'

अथोन्मादः—

अप्रेक्ष्यकारितोन्मादः सन्निपातग्रहादिभिः।
अस्मिन्नस्थानरुदितगीतहासासितादयः ॥३०॥

आसितमासनमिति यावत्। अत्र कैश्चिद् विशेष उक्तः—

'इष्टस्येष्टवियोगादुन्मादश्चित्तविप्लवः।
धननाशाभिघातादेर्नीचानां करुणाश्रयः॥
असम्बद्धप्रलापाद्यैर्वर्ण्यते विकृतैरसौ।
भावोऽयं रसपो[1]षार्थं स्मृतो यस्मात्ततः कविः॥
उत्तमस्योचितानेवानुभावानिह वर्णयेत्।'

उत्तमस्योन्मादो वल्लभावियोगाद् यथोर्वशीवियोगात्।

पुरूरवसः—

'नीलकण्ठ ममोत्कण्ठा वनेऽस्मिन् वनिता त्वया।
दीर्घापाङ्गा सितापाङ्ग दृष्टा दृष्टिक्षमा भवेत्॥'

अथ विषादः—

प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्त्वसंक्षयः।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत ॥३१॥

यथा—

'दूतिकासु[2] न विश्वासो वयस्या तरुणी मम।
चन्द्राहतः[3] खलो लोकः क्व नु मे कान्तसङ्गतिः॥'

अथौत्सुक्यम्—

कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसम्भ्रमैः।
तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः ॥३२॥

---

1. रसपोषात्—M. 2. कृत्तिकासु—M. 3. तन्द्राहतः—T.

यथा—

'आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः ॥'

अथ चापलम्—

मात्सर्यद्वेषरागाद्यैश्चापलं त्वनवस्थितिः ।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥३३॥

यथा—

'अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसं कलिकामकाले
बालां[1] कदर्थयसि किं नवमल्लिकायाः ॥'

एवं व्यभिचारिण उक्ताः । तत्र सात्त्विकव्यभिचारिवर्गयोः परस्परं विभावानुभावत्वे द्रष्टव्ये । यद्यप्यन्ये चित्तवृत्तिविशेषा बहवः सन्ति भावास्तेषां रसपोषौपयिकानां[2] व्यभिचारिष्वेव यथाकथञ्चिदन्तर्भावो द्रष्टव्यः । येऽपि चैषु भावेषु परस्परप्रत्यासन्नरूपास्ते विभावतोऽनुभावतश्च स्फुटभेदा इत्यवगन्तव्यम् । स्थायिष्वपीयमेव प्रक्रिया द्रष्टव्या । किञ्च विभावानुभावसात्त्विकादीनां तत्तत्स्थायिभावप्रतिनियतानामेव निबन्धनात् तत्तद्भावविशेषः प्रत्याययितव्यः । इतरथा सामान्यमात्रनिबन्धनेन संशयात् । एवं स्थिते विभावादिवैधुर्येण निबन्धे दोषः स्यात् ।

तत्रानुभावविहीनो[3] यथा—

'शृङ्गारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे
बीभत्सोऽस्थिभिरुत्फणी च भयकृन्मूर्त्याद्भुतस्तुङ्गया ।
रौद्रो दक्षविमर्दने हसितकृन्नग्नः प्रशान्तश्चिरा-
दित्थं सर्वरसाश्रयः पशुपतिर्भूयात् सतां भूतये ॥'

पदैरभिधीयमाना[4] अपि रसा अनुभावनिबन्धनाभावेन न पोषमासादयन्ति । एवमन्यदपि द्रष्टव्यम् । अनुभावादिनिबन्धनेन तत्पोषणं यथा—

'तापोऽम्भः प्रसृतिंपचः प्रचयवान् बाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितहारयष्टिलतिका[5] पाण्डिम्नि मग्नं[6] वपुः ।

---

1. कान्तां—T. 2. M reads स्थायिनां after रसपोषौपयिकानां. 3. ......हीनो—M. 4. ......विधीयमाना—M. 5. ......चकिताः—M. 6. ......मग्नं—T.

किञ्चान्यत्कथयामि रात्रिमखिलां त्वद्वर्त्मवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते ॥'

अत्र दाहज्वरादेर्व्यभिचारिणः अश्रुप्रभृतेः सात्त्विकस्य च भावस्य त्वद्वर्त्मवातायन इत्याद्यालम्बनविभावस्य श्वासादेरनुभावस्य च निबन्धनाद् विप्रलम्भश्रृङ्गाररसपोष इत्यनुसन्धेयम् । अतः सामाजिकान् रञ्जयितुम् अभिनयेन[1] दर्शयितुं च रसञ्च पोषयितुं कविभिरनुभावादिविरहे न शक्यमिति अनुभावविभावसात्त्विकव्यभिचारिणो भावा अवश्यं निबन्धनीया इति । एते चाभिधीयमाना आक्षिप्यमाणाश्च रस पुष्णन्ति । अत आक्षेपतो भावान्तराक्षेपककतिपयरसभावनिबन्धनेनापि रसपोषः कर्त्तव्य इति । एवं व्यभिचारिणो लक्षिताः ।

अधुना स्थायिनां सामान्यलक्षणमाह—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥३४॥

विरोधिनश्चैते—

'एतौ श्रृङ्गारबीभत्सौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥' इति ।

एतेऽविरोधिनः—

'हास्यो भवति श्रृङ्गारात् करुणो रौद्रकर्मतः ।
अद्भुतश्च तथा वीराद् बीभत्साच्च भयानकः ॥
द्वौ जन्यजनकावेतौ रसावुक्तौ मनीषिभिः ।'

एतैर्विरुद्धैरविरुद्धैश्च भावान्तरैः कविकौशलादविच्छिद्यमानस्तानि भावान्तराण्यात्मरूपारोपेण य आत्मभावं नयति, स स्थायी । यथा गङ्गायमुनादिसलिलं नानारूपरसमपि लवणाकर आत्मभावं नयति, सर्वं हि समुद्रोदरप्रविष्टं तन्नामरूपमेव भवति । अतो लवणाकरस्थानीयो भावान्तरैरतिरस्कृतप्रवाहस्तद्वेधकः प्रबन्धसमाप्ति यावदनुवर्तमानो रत्यादिः स्थायी ।

उक्तं हि भरतेन यथा—

'यथा नराणां नृपतिः शिष्याणाञ्च यथा गुरुः ।
एवं च सर्वभावानां भावः स्थायी महानिह ॥'

यथा मालत्यनुरागो माधवस्य श्मशानाङ्कनिबद्धेन बीभत्सेन विरोधिनाप्यविच्छिन्नो[2] भावान्तरैरुपबृंहितश्चोपनिबद्धः । यत्र त्वेकस्मिन्नेव वाक्ये मुक्तककुलकादौ द्वयोरुपनिबन्धस्तत्राप्येकस्य प्राधान्यमितरस्य गुणत्वं द्रष्टव्यम् । यत्रापि द्वयोस्तुल्यवदुद्भवस्तत्र

1. अभिनयेनैव—M. 2. विराधिना व्यवच्छिन्नो M.

संसर्गो नामालङ्कारान्तरमित्येके । तत्रापि काकुविशेषेण विभावादिप्राबल्येन चैकस्य प्राधान्यमित्यनुसन्धेयमित्यन्ये । यत्र काकुविशेषोऽपि न स्यात् तद् दुष्टमेवेत्याहुः । यत्र तु श्लेषरूपेण तुल्यधद्भावद्वयप्रतीतिस्तत्र श्लेषवाक्ये वाक्यत्वस्य स्वाङ्गीकृतत्वात् रसभेद-प्रतिपत्तिर्गुण एवेति[1] ।

अथ स्थायिभावानुद्दिशन् शमस्यैकदेश्यनुमतं स्थायित्वं निवारयति—

रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।
शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य ॥३५॥

रत्यादयोऽष्टावेव स्थायिनः । शमस्य तु सर्वव्यापारप्रविलयात्मकत्वाद् अनुभावा-भावेन नाट्येऽभिनयेन दर्शयितुमशक्यत्वान् न रसात्मना पोषयितुं शक्यते ।

ननु[2] निर्वेदादयो भवन्ति, अतस्तेऽपि विभावत्वात् स्थायिन एव स्युरिति कथं रत्यादय एव स्थायिन इति—

निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम् ।
वैरस्यायैव तत्पोषस्तेनाष्टौ स्थायिनो मताः ॥३६॥

यो हि विभावः प्रकृष्यमाणो निरतिशयानन्दसंविद्रूपां रसतां प्रतिपद्यमानः स एव स्थायित्वं प्रतिपद्यते । निर्वेदादिस्तु प्रकृष्यमाणो वैरस्यमेव पुष्णाति, अतो निर्वेदादयो-ऽताद्रूप्यात् व्यभिचारित्वात् अस्थायिन इति । येऽपि चान्ये रसात्मना पोषं भजन्ते ते रत्यादिष्वेवान्तर्भविष्यन्ति ।

अथ स्थायिभावस्य काव्योपात्तेन विभावानुभावव्यभिचार्युपबृंहितेन रूपेण रसत्वं वक्तुकामो वाक्यार्थत्वं स्थायिनो दर्शयति—

वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया ।
वाक्यार्थः कारकैर्युक्तः स्थायी भावस्तथेतरैः ॥३७॥

यथा शास्त्रेषु शब्दोपात्तप्रकरणाद्यवगता वा क्रिया कारकविशिष्टरूपेण वाक्यार्थो भवति । एवं विभावानुभावव्यभिचारिविशिष्टः स्थायी भावः काव्येषु वाक्यार्थो भवति । एतेन रतिशृङ्गारशब्दाभावेऽपि तत्तद्वाक्येषु रसभावप्रतिपत्तिः सिद्धैव । अत एव हि प्रकरणावगतक्रियावाक्यार्थत्वमपि दृष्टान्ततयोक्तमिति ।

ननु रसस्य स्थायिनो वा काव्येन कः सम्बन्धः येन वाक्यार्थः स्यात् ? [3]उच्यते— द्वादशविधो[4] हि शब्दार्थयोः सम्बन्धः साहित्यमित्युच्यते । चतुर्भिश्चतुर्भिः सम्बन्धैस्त्रीणि

1. T reads भवति after एवेति 2. 'ननु ...भवन्ति' is missing in T; M reads न after निर्वेदादयो. 3. M reads 'साहित्यमपि विदुषः पृथग्जनस्यैवायं हि तस्य प्रश्नः' after उच्यते; T omits—'साहित्यमपि.....प्रश्नः'. 4. T omits 'द्वादशविधो.. ...साहित्यमित्युच्यते'.

पर्वाणि साहित्यस्य। तत्र प्रथमं चतुष्टयं वक्तृद्वारकं द्वितीयं तु वक्तव्यप्रधानं तृतीयं तूभयस्पर्शीति। ते च वृत्तिविवक्षातात्पर्यप्रविभागाः व्यपेक्षासामर्थ्यान्वयैकार्थीभावाः निर्दोषसगुणसालङ्काररसावियोगा इति। तत्र पदानां पदार्थेषु वृत्तिस्त्रेधा—अभिधा लक्षणा गौणीति। यथोक्तम्—

'शब्दशक्तिपरामर्शाद् विज्ञानमभिधोच्यते।'

सा च शब्दव्यापार इति।

'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।'

सा च 'मञ्चाः क्रोशन्ती'त्यादि।

'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता॥'

सा तु 'सिंहो देवदत्त' इत्यादि। कविभिश्चोक्तम्—

'रूढ्या यत्रासदर्थोऽपि लोके शब्दो निवेशितः।
स मुख्यस्तत्र तत्साम्याद् गौणोऽन्यत्र स्खलद्गतिः॥'
'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते[1]।'
'सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते॥'

अथ विवक्षा वक्तुमिच्छा। सापि त्रिधा[2]। यथोक्तम्—

'क्वचित् स्वल्पेऽप्यर्थे प्रचुरवचनैरेव रचना
क्वचिद् वस्तु स्फारं कतिपयपदैरर्पितरसम्।
यथा वाच्यं शब्दाः क्वचिदपि तुलायामिव धृताः
त्रिभिः कल्पैरेवं कविवृषभसन्दर्भनियमः॥'

किञ्चासौ विवक्षा त्रिप्रकारैर्हेतुभिरुन्नीयते। काकुविच्छेदादिना प्रकरणादिना चेति[3]। तत्र—'भिन्नकण्ठो ध्वनिः प्राज्ञैः काकुरित्यभिधीयते।' सा च बहुप्रकारा। तत्र वितर्कगर्भा काकुर्यथोन्मत्तपुरूरवसि—'नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः' इत्यादि।

प्रश्नगर्भकाकुर्यथा—

'गतः स कालो यत्रासीन्मुक्तानां जन्म वल्लिषु।
वर्तते सा व्रतं तासां साधवः शक्तिसम्पुटाः॥' इत्यादि।

अभ्युपगमकाकुर्यथा—'युष्मच्छासनलङ्घनाम्भसी'त्यादि। उपहासकाकुर्यथा—'मथ्नामि कौरवशतं समरे न कोपादि'त्यादि। विवादाक्षेपकाकुर्यथा—'लाक्षागृहानलविषान्नसभाप्रवेशै'रित्यादि। अन्येऽपि काकुभेदाः द्रष्टव्याः।

तत्र विच्छेदो बहुविधः। वाक्यसम्भेदात्मको विच्छेदो यथा—

---

1. लक्षणेष्यते—M. 2. त्रिविधा—T. 3. वेति—T.

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सा विवदन्त एव हि वयं रोमाञ्चिताः पश्यत[1] ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्क[2]थाद्भुतमिदं यत्रैव चास्तं गतम् ॥'

अत्र वदन्त एवेत्यादि वाक्यसम्भेदो रोमाञ्चेन वक्तृ[3]गुणविशेषविज्ञानातिशयं काशयति—

वाक्यान्यथात्वं यथा–'सहभृतगणं सबान्धवमि'त्यत्र पाण्डुसुतः सुयोधन इति विवक्षिते भानुमतीगतसुयोधनवाक्यान्यथात्वं भाविनोऽर्थस्य तथा भावित्वं सूचयति ।

वाक्यसमाप्तिर्यथा –'त्वं जीवितं त्वमसि मे हृदयमि'ति ।

वाक्यानुच्चारणं यथा—

'प्रत्यग्रारिकृताभिमन्युनिधनप्रोद्भूततीव्रक्रुधः
कीर्णा बाष्पकणैः पतन्ति धनुषि व्रीडा जडा दृष्टयः ।
पार्थस्याकृतशात्रवप्रतिकृतस्यान्तःशुचा मुह्यतो
हा वत्सेति गिरः स्फुरन्ति न पुनर्निर्यान्ति कण्ठाद्बहिः ॥'

तत्र हा वत्सेति वाक्यानुच्चारणमकृतप्रतिक्रियस्यानुचितं परिदेवितमिति सूचयति ।

अथ प्रकरणादिव्यङ्ग्या यथा—

'भवति[4] च विभुः शब्दोऽस्प्राचीन्निषेधपरं वचो
भवति शिथिले[5] मानग्रन्थौ तदेव विधायकम् ।'

अभिनयादिव्यङ्ग्या यथा—

'एद्दहमेत्तत्थणिआ एद्दहमेत्थेहिँ अच्छिवत्तेहिँ ।
एद्दहमेत्तावत्था एद्दहमत्तेहिँ दिअएहिँ ॥'
[एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥']

अथ तात्पर्यं—उच्चारितवाक्यार्थप्रतीतिविशेषत्वं[6] तात्पर्यम् । तच्च त्रिविधं वाक्यार्थत्रैविध्यात् । त्रिविधो हि वाक्यार्थः । अभिधीयमानः प्रतीयमानो ध्वनिरूपश्चेति । तत्राभिधेयः कारकविशिष्टः क्रियादिः प्रसिद्ध एव । अभिधीयमानान्यथानुपपत्तिपूर्वको यो वाक्यार्थः स प्रतीयमानः । स च 'विषं भुङ्क्ष्वे'त्यादिश्रुतेऽपि विधित्वेन तदन्यथानुपपत्त्या निषेधपरत्वेन स्पष्ट एव । अथ ध्वनिः—स च द्विविधः शब्दतश्चार्थतश्च ।

1. पश्यते—T. 2. तथा०—T. 3. वक्तुर्गुण०—T, 4. भवतु विदितं शब्दो—T. 5. शिथिलो—M. 6. उच्चारणस्य वाक्यार्थं प्रति शेषत्वं तात्पर्यम्—M.

यथोक्तम्—

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥'

स पुनः प्रत्येकं द्विविधोऽनुनादरूपः शब्दरूपश्चेति। तत्र कोणाहतकांस्यकेङ्कारनादवत् प्रतीत्यनुस्यूतमेव अर्थान्तरं प्रत्याय्य यदनुनदति सोऽनुनादध्वनिः। प्रतीकार्थानुषक्तौ गिरिगुहादिप्रतिध्वनिवत् पृथगुपलभ्यमानः प्रतिध्वनिः। तत्रानुनादो यथा—

''शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिं
क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम्।
विश्वं स्त्रक्ष्यति वक्ष्यति क्षितिमपामीशिष्यते शिष्यते
नागैराजिषु रंस्यते सृतिजगन्निर्वेदयति द्यामिति ॥'

अथ कपालदामलिखितां स्त्रक्ष्यतीत्यादिलिपिं गणाः पठन्तीत्यभिधीयमानो वाक्यार्थः। तेन च कपालदाम सृष्ट्यादिकर्तृणां ब्रह्मादिदेवतानामिति गम्यते। तेन च प्रतीयमानेनार्थेनानुस्यूतमेव भगवतो महेश्वरस्य सर्वदेवतासंहारसमयेऽप्यप्रतिहतप्रभावस्यैकाकिनोऽवस्थानमनुनादेन प्रतीयत इति। यथा वा—

'भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ देण।
गोलाणइकच्छकुडं[1]गवासिणा दरिअसीहेण ॥
[भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छलताकुञ्जवासिना दृप्तसिंहेन ॥]'

अत्रापि विस्रब्धं भ्रमेति विधिरूपो वाक्यार्थः प्रथमाभिहितः, तेन च कच्छलताकुञ्जे न गन्तव्यमिति प्रतिषेधः प्रतीयते। स च देशः सङ्केतभूमिरिति प्रतीयमानार्थानुस्यूतेनैवानुनादेन प्रतीयत इति। यथा वा—

'महुएहिं किं व पथिअ जइ हरसि णिअंसणं णिअंबाओ।
साहेमि कस्स रण्णे दूरे गामो अहं एका ॥
[मधूकैः किं वा पथिक यदि हरसि निवसनं नितम्बात्।
कथयामि कस्यारण्ये दूरे ग्रामोऽहमेका ॥]'

इत्यत्र प्रथमकक्ष्यागतेनार्थेन वसनहरणं प्रतीयते। तेन च स्वाशयाविष्करणं वैदग्ध्यं वसनहरणानुषक्तमेवानुनादरूपोऽपरः प्रतीयते इति। प्रतिशब्दध्वनिर्यथा—

'लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते।

---

1. M, T read कुण्डुंग.

उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलकाण्ड[1]मृणालदण्डाः ॥'

अत्रोत्पलादिमत् सिन्धुरूपार्थाननुस्यूतमेव तत्तत्सदृशावयववनितारूपातिशयध्वानः प्रतिशब्दवत् पृथगुपलभ्यमानत्वात् प्रतिध्वनिः। एवं द्विविधोऽर्थध्वनिर्व्याख्यातः। शब्दध्वनिरपि पूर्ववद् द्विविधः।

अत्रानुनादरूपो यथा—'भक्तिप्रह्वाय दातुमि'ति। अत्र कराः कल्याणं क्रियासुरिति वाक्यार्थः। तत्र करशब्दसामर्थ्यात् किसलयरुचित्वादिसमस्तविशेषणतुल्यतया च हस्तेष्वनुनादं जनयन् भगवतस्तेजोरुपता... रूपतां च प्रतिध्वनयति।

प्रतिध्वनिर्यथा—'दत्तानन्दाः प्रजानामि'त्यत्र गोशब्दस्वासामान्यात् समस्ततुल्यविशेषणयोगाच्च धेनुषु प्रतिशब्दं जनयंस्तासां माहात्म्यं ध्वनयति।

केचिदेवमाहुः—

'अप्रतिष्ठमविश्रान्तं स्वार्थे यत्परतामिदम्।
वाक्यं विगाहते तत्र न्याय्या तत्परतास्य सा॥
यत्र तु स्वार्थविश्रान्तं प्रतिष्ठां तावदागतम्।
तत्प्रसर्पति तत्र स्यात् सर्वत्र ध्वनितास्थितिः॥'

इत्येवं वदन्तो ध्वनेस्तात्पर्यात् पृथग्भावं वर्णयन्ति यन्न मृष्यामहे तावत् तात्पर्यसामान्यलक्षणेन योगात्।

उक्तञ्च—

'एतावतैव विश्रान्तिस्तात्पर्यस्येति किं कृतम्।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्॥'

अतो यत्राप्यभियुक्तैर्ध्वनितात्पर्ययोर्भेदव्यपदेशः कृतस्तत्रापि ब्राह्मणपरिव्राजकवत् अवान्तरभेदाभिप्रायेण पृथङ्निर्देश इत्यवगन्तव्यम्।

उक्तं हि—

'तात्पर्यमेव वचसि ध्वनिरेव काव्ये
सौभाग्यमेव गुणसम्पदि वल्लभस्य।
लावण्यमेव वपुषि स्वदतेऽङ्गनानां
शृङ्गार एव हृदि मानवतो जनस्य॥'

अतस्तृतीयकक्ष्यारूपेण ध्वनिनाम्ना तात्पर्येण गम्यमानत्वात् रसालङ्कारादिर्वाक्यार्थः। एतदभिप्रायमेव 'स्थायी भावस्तथेतरे'रिति तस्य वाक्यार्थत्वकथनम्[2]। एवं त्रिप्रकारमपि तात्पर्यं वक्तृद्वारा वाक्यधर्म एवेति।

---

1. कदलि०—T. 2. वाक्यार्थकल्पकथनम्—M.

अथ प्रविभागः। एतावतोऽर्थस्यैतावान् शब्द इत्यर्थः। विभागेषु शब्दभागविभाजनं प्रविभागः। महावाक्यार्थावयवेष्ववान्तरवाक्यार्थेषु महावाक्यावयवभूतावान्तरवाक्यार्थावयवेषु अवान्तरवाक्यावयवपदानां पदार्थेषु पदे च प्रकृतिप्रत्यययोस्तदर्थे ष्वित्यादि। अतोऽन्वयव्यतिरेकप्रमाण......। अतः पदेन पदार्थप्रत्यायनं विवक्षा तात्पर्यं प्रविभागश्चेति वक्तृबुद्धिद्वारकाणि शब्दे भवन्ति चत्वारि रूपाणि ....व्यपेक्षाणाम्। अवगतानां पदपदार्थानां परस्पराकाङ्क्षासामर्थ्यं नाम क्रियाकारकादिभावेन अन्वययोग्यता। ततश्च परस्परसंग्रथनमन्वयः। ततश्च क्वचित्तिलतण्डुलवत् क्वचिन्नीरक्षीरवत् क्वचित्पांसूदकवच्च यदविभागरूपेण भवनं स एकार्थीभावः।

एतेन मुक्तकयुगलकसन्दानितककलापककुलकादयो व्याख्याताः। तत्र मुक्तकं प्रसिद्धम्। तत्र द्वाभ्यां चतुष्पदीभ्यां युगलकम्, तिसृभिः सन्दानितकम्, चतसृभिः कलापकम्, पञ्चादिभिः कुलकमिति।

किञ्च, एवमेकप्रघट्टकोपनिबद्धो वाक्यसमूहः सङ्घातः। नानाप्रघट्टकोपनिबद्धस्तु कोशः। स एवोद्यानजलक्रीडाद्युपनिबद्धप्रबन्धमध्यगतः प्रकरणं तत्समूहः प्रबन्ध इति। तत्र च प्रबन्धे रामादिवद् वर्तितव्यं न रावणादिवद् (इति) विधिनिषेधरूपो यो महावाक्यार्थः स चतुर्वर्गहेतुः प्रथत इति। अतो व्यपेक्षासाध्यान्वियैकार्थीभावाः वाक्यार्थान्तरङ्गभूता एव। द्वितीयं पूर्वोक्तम्। अथैवंविधस्य वाक्यस्त प्रयोगयोग्यतां विहन्ति सदोषत्वं, निर्गुणत्वमलङ्कारशून्यत्वं नीरसत्वञ्चेति। अतस्तद्विपर्ययाश्चत्वारो वाक्यस्य प्रयोगयोग्यतां सम्पादयन्ति।

तत्र वर्जनीया दोषाः। ते च त्रिधा। पददोषाः षोडश। असाधुत्वाप्रयुक्तत्वक्लिष्टत्वापुष्टत्वादयो यथार्थनामानो द्रष्टव्याः। वाक्यदोषाश्च षोडश पुनरुक्तत्व·········भिन्नयतिभङ्गविश्लिष्टसन्धित्वव्यवहितान्वयता वाक्यान्तरगर्भतादयः। वाक्यार्थदोषाः षोडश परुषत्वहीनोपमत्वाधिकोपमत्वादयः। गुणालङ्कारास्तु दोषाभावात्मकास्तन्नियताश्च। तानुपरिष्टाद् वक्ष्यामः। रसस्त्वत्र प्रकाशे प्रतिपाद्यत एव। अतो रसस्योक्तेन प्रकारेण वाक्य······'स्थायी भावस्तथेतरैरि'ति। अधुना स्थायिभावस्यैव रसत्वं व्युत्पादयन् तस्याश्रयं विप्रतिपत्तिनिराकरणपुरःसरमाह—

रसः स एव स्वाद्यत्वाद्रसिकस्यैव वर्तनात्।
नानुकार्यस्य वृत्तत्वात् काव्यस्यातत्परत्वतः ॥३८॥
द्रष्टुः प्रतीतिर्व्रीडेर्ष्यारागद्वेषप्रसङ्गतः।
लौकिकस्य स्वरमणीसंयुक्तस्येव दर्शनात् ॥३९॥

रत्यादिरेव स्थायी काव्योपात्तविभावानुभावसंसृष्टरूपेण रसो भवति। स्वाद्यत्वात्

स्वादात्मतां काव्यव्यापारेण नटाभिनयेन च नीयमानत्वादित्यर्थः। तथाभूतस्य च रसस्य सामाजिकादिरेवाश्रयः नानुकार्यो रामार्जुनादिः अतिक्रान्तत्वादर्जुनादेर्वर्तमानत्वाच्च सामाजिकादेः। न चातिक्रान्तानुकार्यरसोद्भावनाय कविः काव्यमधुना रचयति। कथमिव रसिकसामाजिकमनांसि रञ्जयेयमिति कवयः[1] काव्यं निबध्नन्ति। अतः सामाजिकरसोद्देशप्रवृत्तत्वात् काव्यस्य तदीयरसं प्रत्येव तात्पर्यम्। तदिदमुक्तं 'काव्यस्यातत्परत्वत' इति। एतेन रसस्य तात्पर्यगम्यत्वं व्याख्यातमिति द्रष्टव्यम्।

किञ्च रसस्यान्याश्रयत्वे दयितासंयुक्तपुरुषदर्शनाद्यथा व्रीडादयो भवन्ति एवं द्रष्टुः सामाजिकस्य व्रीडेर्ष्यादयो भवेयुः। उत्तमप्रकृतिर्हि पुरुषो दम्पत्योः सम्भोगं दृष्ट्वा लज्जते। मध्यमस्य प्रतीतिमात्रमेव जायते। नीचादिस्तु ईर्ष्याद्वेषादिभिः ......। ननु लौकिकपुरुषं स्वदयितासंयुक्तं पश्यतो यदि रसो न जायते तर्हि परमरसिकादीन् अतीतान् रामादीन् शृण्वतः कथं रसो जायते। अत आह—

धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः।
विभावयति रत्यादीन् स्वदन्ते रसिकस्य ते ॥४०॥

अयमर्थः। रामादिरर्थो नात्र रसस्य विभावो येन तस्याविद्यमानत्वाद्रसो न जन्यते। रामादिशब्दस्तु अविवक्षितार्थविशेषो धीरोदात्ताद्यवस्थाप्रतिपादनद्वारेण रत्यादीनां विभावो भवति। ते च रसिकस्य सहृदयस्य स्वदन्त इति। अत एवाहुः—

'शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव रामादीन् कारणत्वेन मन्यते ॥'

अतः परमरसिकनायकादिगतसम्भोगादिप्रतिपादनद्वारेणाहितसंस्कारातिशयाः[2] सामाजिकाः स्वपरविवेकविधूननेन तत्तत्सम्भोगाद्यनुसन्धानप्रवणचित्ततया निरतिशयं स्वादमनुभवन्तीति। अतः परमार्थासतोऽपि रामादेः बुद्ध्यारूढेनैव रूपेण रसकारणत्वं निदर्शनेनातिशयं[3] द्रढयति।

[4][ता एव च परित्यक्तविशेषा रसहेतवः]
क्रीडतां मृन्मयैर्यद्वद् बालानां द्विरदादिभिः ॥४१॥
स्वोत्साहः स्वदते तद्वच्छ्रोतॄणामर्जुनादिभिः।

मृन्मयैर्द्विरदादिभिः क्रीडतां बालानामसत्येव पारमार्थिके गजे गजप्रतिपत्तिमात्रारूढेन मृदादिरूपेण यथा क्रीडनं स्वदते तथा रामार्जुनादिभिरविद्यमानैरपि कविकौशलेन प्रत्यक्षवच्छब्दोपनीतैस्तद्व्यापारानुसन्धानैकचित्ततया श्रोतृभिः स्वपरविवेकविधूननेन

1, M reads ये Before कवयः. 2. संस्काराः—T. 3. M omits अतिशयं. 4. M,T omit 'ता······ हेतवः'.

प्रतिपन्ने रसो जायत इति । एवं श्रोतृसामाजिकवन्नटस्यापि काव्यार्थानुसन्धानेनैव रसिकत्वं नान्यथेत्याह—

काव्यार्थभावनास्वादो नर्तकस्य न वार्यते ॥४२॥

नर्तकोऽपि न लौकिकरसेन रसवान् भवेत्[1] । स्वमहिलां[2] भुञ्जानस्य लौकिकस्य यो रसो न तेन रसेन रसवान्नर्तक इत्यर्थः । कथञ्च काव्यात् स्वादोद्भूतिः, किमात्मा चेत्यत्राह—

स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः ।

काव्यार्थेन विभावानुभावादिसंसृष्टस्थाय्यात्मना सामाजिकचेतसो यः सम्भेदो गङ्गायमुनासलिलयोरिव परस्परं मेलनं तस्मात् सम्भेदादात्मानन्दसमुद्भवः स्वाद इति ।

एतेन काव्यसामाजिकमनसोर्भाव्यभावकरूपोऽपि[3] सम्बन्धोऽस्तीत्युक्तम् । पूर्वं तु प्रतिपाद्यप्रतिपादकसम्बन्धः तात्पर्यवृत्त्येति । केचित्तु रामादिगत एव रसः । काव्यप्रतिपाद्यः सामाजिकादिगतस्तु रसाभास इति प्रतिजानते । तत्तु वयं न मृष्यामहे । निर्भरानन्द-संविदुन्मीलनात्मनः[4] स्वानन्दस्य सकलरसिकानुभवसिद्धत्वात् काव्यस्योक्तप्रकारेण सामाजिकरसतात्पर्यनिर्णयाच्च । स च सम्भेदश्चतुर्विधः—चतुर्भिर्युगलैः रसानां सम्बध्यत इति दर्शयति ।

विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः ॥४३॥
शृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात् ।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ॥४४॥

शृङ्गारवीरबीभत्सरौद्रेषु रसेषु जनयितव्येषु चेतसो यथासङ्ख्यमन्वर्थनामानो विकास-विस्तरक्षोभविक्षेपाः सम्भेदा भवन्ति । त एव सम्भेदा यथाक्रमं पूर्वोक्तरसचतुष्टययुगल-वृत्तीनां हास्याद्भुतभयानककरुणानामपि सम्बन्धिनो भवन्ति । अन्ये विकासात्मनश्चित्त-भूमेस्तत्तत्सामग्रीपोषविशेषभाजौ शृङ्गारहास्यौ जायेते । विस्तराच्च वीराद्भुतौ क्षोभात् बीभत्सभयानकौ विक्षेपाद्रौद्रकरुणावुभयोश्च परस्परसादृश्यादेकसम्भेदप्रसूतत्वम् । अत एव हेतोः शृङ्गारादिभ्यो रसेभ्यः एव हास्याद्युत्पत्तिमाहुः । अत एव च[5]............ ।

अतस्तज्जन्यता तेषाम् अत एवावधारणम् ।

अत एव सम्भेदैकत्वाद्रसाद्रसान्तरोत्पत्त्यभिधानम् । न तत्त्वेन तस्य पृथक् सामग्री-प्रसूतिताभिधानात् । अत एव ...... चतुष्टयोत्पत्तेरष्टावेव रसा इत्यवधारणमिति । उक्ता हि—रसाद्रसान्तरोत्पत्तिराचार्यैः—

1. भवति—T. 2. स्वमभिलाषं—T. 3. रूपेणापि—T. 4. मीलदात्मनः—M. 5. चरम०—T.

'शृङ्गारात्तु भवेद्धास्यो रौद्रात्तु करुणो रसः ।
वीराच्चैवाद्भुतो नाम बीभत्सात्तु भयानकः ॥' इति ।

तत्र शृङ्गाराद् हास्योत्पत्तिर्यथा—

'स एव भुवनत्रयप्रथितसंयमः शङ्करो
बिभर्ति वपुषाधुना विरहकातरः[1] कामिनीम् ।
अनेन किल निर्जिता वयमिति प्रियायाः करं
करेण परिताडयन् जयति जातहासः स्मरः ॥'

वीरादद्भुतोत्पत्तिर्यथा—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥'

रौद्रात् करुणनिष्पत्तिर्यथा—

'सत्त्वभ्रंशविषादिभिः कथमपि त्रस्ते[2]क्षणैर्वेत्रिभि—
र्दृष्टो दृष्टिनिपातजिह्मितमुखैरव्याहतप्रक्रमः ।
रामान्वेषणतत्परैः परिजनैरुन्मुक्तहाहारवं
कन्यान्तःपुरमेव हा प्रविशति क्रुद्धो मुनिर्भार्गवः ॥'

बीभत्साद् भयानकनिष्पत्तिर्यथा—

'आन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण—
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्—
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥'

स्वमन्येष्वपि सम्भेदैक्यमिति मन्तव्यम् । अत एव द्वयो रसयोः परस्परसादृश्य-मप्युक्तम्—

शृङ्गारानुकृतिर्या तु स हास्य इति कीर्तितः ।' इति ।

ननु कथमष्टावेवेत्यवधारणं शमप्रकर्षस्यापि रसत्वेन कैश्चिदङ्गीकृतत्वात् । यदि च सोऽभिनयेनानुभावाभावाद् दर्शयितुं न शक्यते तथापि काव्येषु रस········· ।

शमप्रकर्षोऽनिर्वाच्यो मुदितादेस्तदात्मता ॥४५॥

शान्तो हि यदि तावन्न रसः किं नस्ततो गतमिति ।

---

1. विरहकातरां—M. 2. त्रस्तेक्षणं—M.

'न तत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा ।
रसस्तु शान्तः कथितो मुनीन्द्रैः
सर्वेषु भावेषु समप्रमाणः[1] ॥'
'विकासविस्तरक्षोभविक्षेपत इमे यतः
रूपकेऽपि तदुक्त्यैव शान्तसादो[2] निरूपितः ॥'

वीतरागस्य सुखदुःखादिसमस्तद्वन्द्वातीतस्य शत्रुमित्रलोष्टकाञ्चनादिभावेषु सममेव वर्तमानस्य यः शमप्रकर्षः आत्मस्वरूपावस्थानलक्षणः स निर्वक्तुं (न) शक्यते । कथमतादृशस्य श्रोतुस्तादृशानन्दानुभवः प्रादुःष्यात् । यदि तस्य तत्साधनभूतचित्तपरिकर्मात्मकमैत्रीकरुणामुदितादिभिः शमत्वं [विवक्षितं तर्हि] विकासविस्तारक्षोभादिचित्तभूमिप्रसूतत्वात् तस्यापि रसत्वमुक्तमिति द्रष्टव्यम् । अतोऽष्टावेव रसा इति । अतो रामार्जुनादिनायकरसविभावानुभावव्यभिचारिभूतैरिन्दूदयरोमाञ्चनिर्वेदादिभिर्गुणालङ्कार - परिष्कृतकाव्योपादानवशेन समासादिततथाभावप्रकर्षैस्तत्तद्रसनियतैर्भावितः स्थायी सामाजिकस्य स्वदते स रस इत्याह—

पदार्थैरिन्दुनिर्वेदरोमाञ्चादिस्वरूपकैः ।
काव्याद् विभावसञ्चार्यनुभावप्रख्यतां गतैः ॥४६॥
भावितः स्वदते स्थायी रसस्य परिकीर्तितः ।

कविकौशलादेव रसोन्मीलनमभियुक्तैरुक्तम्—

'रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित् ।
एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः ॥'

'शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत् ।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥' इति ।

किं चायमेवंविधो रसो वाक्यविषयः प्रबन्धविषयश्चेति द्विधा । तत्र वाक्यविषयो यथा—

'स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ॥'

---

1. समप्रमाणम्—M. 2. शान्तस्वादो—T.

अत्र श्लाघ्यविशेषणयुक्तमेघदर्शनेन तादृशसमीरस्पर्शनेन तादृशकेकाश्रवणेन चोद्दीपनविभावेनाकृष्यमाणविप्रलम्भप्रकर्षकाष्ठाभिधानाद्रामोऽस्मि सर्वं सह इत्यभिधानेनानुमीयमानचित्तविकारविशेषस्य रामस्य 'वैदेही तु कथं भविष्यती'त्यभिधानेन वैदेहीचित्तविकारप्रकर्षाभिधानाच्च परस्परालम्बनविभावजनितो रतिप्रकर्षः शृङ्गारो निबद्ध इति । प्रबन्धविषयस्तु कालिदासभवभूतिप्रबन्धेषु द्रष्टव्यः । सर्वत्र च रसाविनाभूतगुणालङ्कारविभावानुभावादिवर्णनाद् गम्यमानो रत्यादिस्तत्प्रकर्षः शृङ्गारादिर्वाक्यतात्पर्यगम्य इति स्थितम् । एवं तावत् स्थायिन एवावस्थाविशेषो रस इत्युक्तम् । अधुना रसभावयोरभेदेन विभावैकत्वात् पृथक् लक्षणं तयोर्न वक्तव्यमित्यभिदधान एव रतेः स्वरूपं तद्विभावानुभाववर्गौ दर्शयति—

लक्षणैक्यं विभावैक्यादभेदाद्रसभावयोः ॥४७॥
रम्यदेशकलाकालवेषभोगादिसेवनैः ।
प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः ।
प्रकृष्यमाणः शृङ्गारो मधुराङ्गविचेष्टितैः ॥४८॥

उद्यानदीर्घिकाक्रीडापर्वतादयो देशा[1] नृत्तगीतवादित्रादयः कलाः, कालो वसन्तादिः, मधुराङ्गविचेष्टितादयोऽनुभावाः, रम्यदेशाद्युद्दीपनविभावभावको मधुराङ्गचेष्टाद्यनुभावयुक्तयोर्दम्पत्योः प्रमोदः प्रकृष्यमाणः शृङ्गारः ।

उक्तं हि रसाध्याये—

'सुखप्रायेष्टसम्पन्न ऋतुमाल्यानुसेवकः ।
पुरुषः प्रमदायुक्तः शृङ्गार इति चिन्तितः ॥'

अपि च—

'ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥'

अस्याभिनयो यथा—

'नयनवदनप्रसादैः स्मितमधुरवैर्धृतिप्रमोदैश्च ।
ललितैश्चाङ्गविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥'

भावाध्याये चोक्तम्—

'इष्टार्थविषयप्राप्त्या रतिरित्युपजायते ।
सौम्यत्वात् साभिनेतव्या वाङ्माधुर्याङ्गचेष्टितैः ॥'

तत्र रतिर्यथा—'गिरिशमुपचचार प्रत्यहं सा सुकेशी'त्युपक्षिप्य वसन्तमन्मथजृम्भिताद्युद्दीपनविभावमभिधाय—

1. उद्देशा—M.

'हरस्तु किञ्चित् परिवृत्तधैर्य—
श्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥'

'विवृण्वती शैलसुताऽपि भाव—
मङ्गैः स्फुरद्बालकदम्बगर्भैः।
साचिक्रिया[1]चारुतरेण तस्थौ
मुखेन पर्यस्तविलोचनेन॥'

इति परस्परालम्बनविभावां रत्युत्पत्तिं शिवयोरभिधाय प्रबन्धसमाप्तिं यावत् परिपोष एव कविना कृतोऽनुसन्धेय इति। अस्याश्च रसात्मना परिपोषयुक्त्या औचित्ययोगेन निबद्धा अष्टौ सात्त्विकाः स्थायिनश्च त्रयस्त्रिंशद् व्यभिचारिणश्चेत्येकोनपञ्चाशद्भावा हेतवो भवन्ति। एतेष्वालस्यादयश्चत्वारः शृङ्गारालम्बनविभावगोचरा विरुद्धा इत्याह—

एकोनपञ्चाशदमी च भावा
युक्त्या निबद्धाः परिपोषयन्ति।
आलस्यमौग्र्यं मरणं जुगुप्सा
तस्याश्रयत्वेन विरुद्धमिष्टम्॥४९॥

एवमुक्तप्रकारः शृङ्गारः उत्तमप्रकृतेर्नायकस्य तादृश्यां नायिकायां रसो भवति। अव्ययो……अन्यत्रापि तिर्यगादौ रसभावारोप आभास एव।

यथोक्तम्—

'निरिन्द्रियेषु तिर्यंचु चन्द्रादिष्वप्यमुख्यतः।
रसभावसमारोपादाभासो रसभावयोः॥'

तत्र तिर्यंचो यथा—

'आपृष्टासि[2] व्यथयति मनो दुर्बला वासरश्री—
रेह्यालिङ्ग क्षपय रजनीमेकिका चक्रवाकी।
नान्यासक्तो न खलु कुपितो नानुरागच्युतो वा
दैवाधीनस्तदिह भवतीमस्वतन्त्रस्त्यजामि॥'

अथ शृङ्गारस्त्रिविध इत्याह—

अयोगो विप्रयोगश्च संभोगश्चेति स त्रिधा।

तत्रायोगमाह—

तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः॥५०॥

1. सा त्रिक्रिया—M. 2. आमृष्टासि—M.

पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः ।

तस्य दशावस्थत्वमाह––

दशावस्थः स तत्रादावभिलाषोऽनुचिन्तनम् ॥५१॥
स्मृतिर्गुणकथोद्वेगप्रलापोन्मादसंज्वराः ।
जडता मरणं चेति दुरवस्थं[1] यथोत्तरम् ॥५२॥

अभिलाषं लक्षयति––

अभिलाषः स्पृहा तत्र कान्ते सर्वाङ्गसुन्दरे ।
दृष्टे श्रुते वा तत्रापि विस्मयानन्दसाध्वसाः ॥५३॥

तत्राप्यभिलाषोत्पत्तिमात्रेऽपि सम्भोगविस्मयानन्दादयोऽनुभावा इति । तत्र नायक-नायिकयोः परस्परदर्शनप्रकारमाह—

साक्षात्प्रतिकृतिस्वप्नच्छायामायासु दर्शनम् ।

मालतीमाधवयोः साक्षाद् दर्शनं मालविकायाश्चित्रे स्वप्नादिषु मृगाङ्कावल्यादेः । श्रुते इत्येतद् विवृणोति—

श्रुतिर्व्याजात् सखीगीतमागधादिगुणस्तुतेः ॥५४॥

चिन्ताद्यास्तु व्यभिचारिभावाः ।

सानुभावविभावास्तु चिन्ताद्याः पूर्वदर्शिताः ।

गुणाख्यानं प्रसिद्धत्वान्न व्याख्यातम् । अतो न चात्र दशावस्थत्वमेवेत्यवधारणमनेकधा-दर्शनादित्याह—

दशावस्थत्वमाचार्यैः प्रायोवृत्त्या निदर्शितम् ॥५५॥
महाकविप्रबन्धेषु दृश्यते तदनन्तता ।

दिङ्मात्रं तु––

दृष्टे श्रुतेऽभिलाषाच्च किं नौत्सुक्यं प्रजायते ॥५६॥
अप्राप्तौ[2] किं न निर्वेदो ग्लानिः किं नातिचिन्तनात् ।

यथा विद्धशालभञ्जिकयोः––

'दाहोऽम्भः प्रसृतिम्पचः प्रचयवान् बाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितहारयष्टिलतिकाः पाण्डिम्नि लग्नं वपुः ।
किं चान्यत्कथयामि रात्रिमखिलां त्वद्वर्त्मवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते ॥'

अथ योगप्रध्वंसात्मा विप्रयोगः—

विप्रयोगस्तु विश्लेषो रूढविस्रम्भयोर्द्विधा ॥५७॥

---

1. दशावस्था—M. 2. अप्राप्ते––M.

मानप्रवासभेदेन मानोऽपि प्रणयेर्ष्ययोः ।
तत्र प्रणयमानः स्यात् कोपोपहितयोर्द्वयोः ॥५८॥
स्त्रीणामीर्ष्याकृतो मानः कार्योऽन्यासङ्गिनि प्रिये ।
श्रुते वाऽनुमिते दृष्टे श्रुतिस्तत्र सखीमुखात् ॥५९॥
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनकल्पितः ।
त्रिधानुमानिको दृष्टः साक्षादिन्द्रियगोचरः ॥६०॥

विप्रयोगो द्विविधः—मानकृतः प्रवासकृत इति । मानो द्विविधः—प्रणयमान ईर्ष्यामान इति । प्रेमपूर्वको वशीकारः प्रणयः । तद्भङ्गे मानः प्रणयमानः । स तु परस्परस्निग्धतया दम्पत्योर्द्वयोरपि वर्णनीयः । ईर्ष्यामानस्तु स्त्रीणामेव वर्णनीयः, न पुंसाम् । स्त्रीणां व्यभिचारदर्शने वैरस्यप्रसङ्गात् । सोऽपि प्रमाणत्रैविध्यात्[1] त्रिविधः । सखीवचनाद् दयितापराधश्रुतावेकः, लिङ्गादपराधानुमानेन द्वितीयः । स चायमानुमानिक उत्स्वप्नायितभोगाङ्गगोत्रस्खलनात् त्रिविधः । प्रत्यक्षदर्शनाद् दृष्ट इति.........विध ईर्ष्यामानः प्रत्यक्षाणामल्पतारतम्येन यथोत्तरं गरीयानिति वदन् मानोपचारं दर्शयति—

यथोत्तरं गुरुः षड्भिरुपायैस्तमुपाचरेत् ।
साम्ना भेदेन दानेन नत्युपेक्षारसान्तरैः ॥६१॥
तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः ॥६२॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम् ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ॥६३॥

कुपितया दयितं[2] प्रति यादृशं चेष्टितव्यं तदुक्तं नायिकालक्षणावसरे इत्याह—

कोपचेष्टाश्च नारीणां प्रागेव प्रतिपादिताः ।

तत्र पादयोः पतनेन मानोपचारो[3] यथा—

'दृष्टे लोचनवर्त्मना[4] मुकुलितं पार्श्वस्थिते वक्त्रवत्
न्यग्भूतं बहिरासितं पुलकवत् संस्पर्शमातन्वती ।
नीवीबन्धवदागतं शिथिलितं सम्भाषमाणे ततो
मानेनापगतं ह्रियेव सुदृशः पादस्पृशि प्रेयसि ॥'

अथ प्रवासविप्रयोगः—

कार्यतः सम्भ्रमाच्छापात् प्रवासो भिन्नदेशता ॥६४॥

1. द्वैविध्यात् द्विविधः—M. 2. कुपितं—M. 3. पतनेनोपचारो—T.
4. लोचनवत्मनाङ्—T.

द्वयोस्तत्राश्रुनिःश्वासकार्श्यलम्बालकादिकाः ।

कार्यत इत्यादि विवृणोति—

तत्र भावी भवन् भूतस्त्रिधाद्यो बुद्धिपूर्वकः ॥६५॥
द्वितीयः सहसोत्पन्नो दिव्यमानुषविप्लवात् ।
स्वरूपान्यत्वकरणाच्छापजः सन्निधावपि ॥६६॥

राजसेवादिकार्यवशेन बुद्धिपूर्वको भूतो भविष्यन् वर्तमान........। अन्यौ तु स्पष्टौ। शापजो यथा मेघसन्देशे, यथोन्मत्तपुरूरवसि। ननु मानप्रवासाभ्यामिव मरणादिविप्रयोगः कैश्चिदभ्युपगतः। तथा किं नेष्यत अत आह—

मृते त्वन्यत्र यत्रान्यः प्रलपेच्छोक एव सः ।
निराश्रयो न शृङ्गारः प्रत्यापन्ने तु नेतरः ॥६७॥

एकत्र मृतेऽन्यस्य प्रलापादिनिराश्रयत्वान्न शृङ्गारः, अपितु करुण एव। पुनरुज्जीविते तु तस्मिंश्चन्द्रापीडादिवन्न करुणो भवति, किन्तु शृङ्गार एव। अतो[1] यदि शृङ्गारेऽपि मरणं निबध्नीयात्, तत आकाशसरस्वतीवचनादिना सम्भोगप्रत्याशोत्पादनपुरःसरं[2] रतिमेवावस्थाप्य मृतस्य पुनरुज्जीवनेन सम्भोगो वर्णनीयः। उक्तं हि—

'सम्भोगं विप्रलम्भान्ते मरणादप्यनन्तरम् ।
वर्णयेदि'ति

एवं विप्रलम्भशृङ्गारमभिधाय तत्तदवस्थापेक्षया नायिकावस्थां दर्शयति—

प्रणयायोगयोरुत्का प्रवासे प्रोषितप्रिया ।
कलहान्तरितेर्ष्यायां विप्रलब्धाय खण्डिता ॥६८॥

एवं द्विविधो विप्रलम्भः प्रपञ्चितः। तत्र यद्यपि विभावानुभावव्यभिचारिसाधारण्यात् करुणसारूप्यमस्त्येव, तथापि सम्भोगाशात्मकरतिस्थाय्यनुवृत्तेः[3] शृङ्गार एव रस इति।

अथ सम्भोगशृङ्गारमाह—

अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः ॥६९॥
चेष्टास्तत्र प्रवर्तन्ते लीलाद्या दश योषिताम् ।
दाक्षिण्यमार्दवप्रेम्णामनुरूपाः प्रियं प्रति ॥७०॥
स्वाधीनपतिकोत्कण्ठावाससज्जाभिसारणैः ।
रम्यं सानुभवेत्तत्र हृष्टावस्थाचतुष्टयम् ॥७१॥
रमयेच्चानुकूलः कान्तः कलाक्रीडादिभिश्च ताम् ।
न ग्राम्यमाचरेत् किञ्चिन्नर्म तत्सूचकं न च ॥७२॥

1. T omits अतो. 2. ......पुरःसरां—M. 3. सम्भोगात्मक०—T.

मुदान्वितः प्रमोदान्वितः । नायिकालक्षणावसरोक्ताः लीलाविलासविच्छित्त्याद्या दश चेष्टाः । दशानामभिलाषाद्यवस्थानां मध्ये यदाद्यं[1] दृष्टावस्थाचतुष्टयं (तत्[2]) दर्शनदशाभावितसम्भोगश्रृङ्गारे नायिकाया भवतीति ।—अनुकृदानुकूल्यकारीत्यर्थः ।

यथा—

'लिखति कुचयोः पत्रं कण्ठे निवेशयति स्रजं
तिलकमलिके कुर्वन् सर्वानुदस्यति कुन्तलान् ।
इति चटुशतैर्वारं वारं मुहुः परितः स्पृशन्
विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः ॥'

यथा वा—

'कान्ते तल्पमुपागते विगलिता नीवी स्वयमि'त्यादि ।

विप्रलम्भसम्भोगयोर्द्वयोरपि सामग्र्ये श्रृङ्गारसामग्र्यम् । अत[3] एव हि कविभिः[4] श्रृङ्गारपोषाय द्वयोरुपनिबन्धः कृतः ।

उक्तञ्चाभियुक्तैः—

'श्रृङ्गाराख्या[5] द्वयोर्विप्रलम्भसम्भोगयोर्भवेत् ।
एकस्मिन्नपि यत्सा तु ग्रामान्ते ग्रामशब्दवत् ॥
विप्रलम्भेन विच्छिन्नः स्यात् सम्भोगमनोरथः ।
निराशत्वेन तत्र स्यादन्यथा करुणो रसः ॥
सम्भोगे विरहाशङ्का न चेन्नूनमनादरः ।
स्वाधीने चानुकूले च स्याद् वामत्वान्मनोभुवः[6] ॥
आस्थाबन्धात्मिकानेकचित्तवृत्तिमयी रतिः ।
सुखोत्तराप्यपाये हि प्रसूते दुःखमप्यसौ ॥
अभेदात्[7] स्थायिनो भिन्नावेताविति न युज्यते ।
तस्मादुभयसम्भोगे पूर्णश्रृङ्गार इष्यते ॥'

यथा वा केचित्—अभिमानाहङ्कारादिपर्यायो वासनासहायश्चित्तवृत्तिविशेषः श्रृङ्गारः । स च तत्तत्सामग्रीविशेषसमासादितवैलक्षण्यः सलिलमिव बुद्बुदतरङ्ग-फेनमुक्तादिभावं वीरादद्भुतादिभावं भजत इति । अथ वीरः—

वीरः प्रतापविनयाध्यवसायसत्त्वा—
मोहाविषादनयविस्मयविक्रमाद्यैः ।

1. यदाद्यदृष्टा०—T. 2. Not in M, T. 3. तत एव. 4. T omits कविभिः. 5. श्रृङ्गाराख्यं—M. 6. वामत्वं—T. 7. अभेदे—M.

उत्साहभूः स च दयारणदानयोगात्
त्रेधा किलात्र मतिगर्वधृतिप्रहर्षाः ॥७३॥

प्रतापादिविभावक उत्साहस्थायिभावको दयायुद्धदानै (रनुभावित[1]–) स्त्रिविधः। मतिगर्वादिभिर्व्यभिचारिभि (र्भावितो) विस्तरात्मा स्वादानुभवो वीर इति। भरताचार्येण तु पृथगेवानुभागे दर्शितः—

'उत्साहादविषादादध्यवसायादविस्मयामोहात् ।
विविधादर्थविशेषाद् वीररसो नाम सम्भवति ॥
स्मितशौर्यगर्वधैर्यैरुत्साहपराक्रमप्रभावैश्च ।
वाक्यैराक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥'

तथा—

'असम्मोहादिनिर्वृत्तो[2] व्यवसायोऽभिनयात्मकः ।
उत्साहस्त्वभिनेयः स्यादप्रमादोत्थितादिभिः ॥'

त्रैविध्यञ्च भावाध्याये स्पष्टमुक्तम्—

'युद्धवीरो दयावीरो दानवीरस्तथैव च ।
विज्ञेयस्त्रिविधो वीरो रसभावानुभावकः[3] ॥'

व्यभिचारित्वं स्थायित्वं च विवृण्वता व्यभिचारिणो दीपकत्वमुक्तम्—

'दीपयन्तः प्रवर्तन्ते ये पुनः स्थायिनं रसम् ।
ते तु सञ्चारिणो ज्ञेया न ते स्थायित्वमागताः ॥
भावो वापि रसो वापि प्रवृत्तिर्वृत्तिरेव वा ।
सर्वेषां समवेतानां रूपं यस्य भवेद् बहु ।
स मन्तव्यो रसः स्थायी शेषाः सञ्चारिणो मताः ॥'

अयं वीरः श्रीमद्रामायणे तदनुबन्धेषु प्रबन्धेषु उत्तररामचरितवर्जितेषु वीरचरितादिषूदाहर्तव्यः।

तत्र युद्धवीरो यथा—

'मरुत्वन्तं देवं य इह भगवन्तं विजयते
विजिग्ये तं राजा युधि दशमुखं हेहयपतिः ।
निहन्तारं तस्य प्रथित[4]महिमानं त्रिभुवने
महावीरं जित्वा किमिव हि न वत्सेन विजितम् ॥'

---

1. मतिगर्वादिभिरनुभावितस्तैरेव—M, T. 2. असम्मोहादिभिर्वृत्तो व्यवसायो-(ऽभि)नयात्मकः—M. 3. ......नुभावतः—T. 4. प्रथितमभिमानं—T.

यथा वा 'दिङ्मातङ्गघटाविभक्ते'त्यादि । अत्र परशुरामस्य रणवीरस्त्यागवीरश्च निबद्ध इति । नागानन्दे जीमूतवाहनस्य दयावीरः, 'सिरामुखैः स्यन्दत एवे'त्यादि । वीरस्तु मुक्तक उदाहर्त्तव्यः ।

अथ बीभत्सः--

बीभत्सः कृमिपूतिगन्धिवमथुप्रायैर्जुगुप्सैकभू—
रुद्वेगी रुधिरान्त्रकीकसवसामांसादिभिः क्षोभणः ।
वैराग्याज्जघनस्तनादिषु घृणाशुद्धोऽनुभावैर्वृतो
नासावक्त्रविकूणनादिभिरिहावेगाविशङ्कादयः ॥७४॥

जुगुप्सास्थायिभावो बीभत्सस्त्रिविधः--क्षोभणः शुद्ध उद्वेगीति । विष्ठाकृमिप्रभृतिदर्शनादिविभावक उद्वेगी, रुधिरादिजस्तु क्षोभणः । रमणीयस्तनजघनादिषु वैराग्यजनितः शुद्धः ।

तत्र क्षोभणो यथा--श्मशानाङ्के--'उत्कृत्योत्कृत्ये'ति ।

उद्वेगी यथा--'आन्त्रप्रोतबृहत्कपाल' इत्यादि ।

शुद्धो यथा--

'लालां वक्त्रासवं वेत्ति मांसपिण्डौ पयोधरौ ।
मांसास्थिकूटं जघनं जनः कामग्रहातुरः ॥'

अथ क्रोधरौद्रादिः—

क्रोधो मत्सरवैरिवैकृतमयैः पोषोऽस्य रौद्रोऽनुजः
क्षोभश्चाधरदंशकम्पभ्रुकुटिस्वेदास्यरागैः पुनः ।
शस्त्रोल्लासविकत्थनांसु धरणीघातप्रतिज्ञाग्रहै—
स्तत्रामर्षमदौ स्मृतिश्चपलता (? सूयौ) ग्र्यवेगादयः ॥७५॥

चेतसस्तैक्ष्ण्यप्रबोधनं क्रोधः । मात्सर्यादिविभाव[1]तस्तस्य पोषो रौद्रो रसः । तस्यानुजोऽनुभावोऽधरदंशनादिसहितः क्षोभः । अयं च रौद्रो रसः राक्षसदानवादीनां तत्प्रकृतीनाञ्चात्यन्तोद्धतानां साहसिकानां च मनुष्येषु वर्णनीयः । अस्मिंस्तु केवलक्रोधजः सङ्ग्रामः । वीरे तु त्रिवर्गादिसिद्धिनिश्चयपूर्वको धीरोदात्तादेरिति ।

मुनिना तु भावाध्याये विषयविशेषात् क्रोधविशेषो दर्शितः ।

यथा—

'भ्रुकुटीकुटिलोत्कटमुखः सन्दष्टोष्ठः स्पृशन् करेण करम् ।
दृप्तः स्वभुजाक्षेपी[2] शत्रोर्नियन्त्रणां रुष्येत ॥

---

1. ······विभावकः—M. 2. ......पेक्षी—M.

किञ्चिदधोमुखदृष्टिः सास्रस्वेदोऽपमार्जनपरश्च ।
अव्यक्तोल्बणचेष्टो गुरोर्विनययन्त्रितो रुष्येत् ॥
अल्पतरप्रविचारो विकिरन्नश्रूण्यपाङ्गविक्षेपैः ।
सभ्रूकुटिस्फुरितोष्ठः प्रणयोपगतां स्त्रियं रुष्येत् ॥
अधिपरिजने तु रोषात्तर्जननिर्भर्त्सनाक्षिविस्तारैः ।
विप्रेक्षणैश्च विविधैरभिनेयः क्रूरमाहितः कोपः ॥
कारणमपेक्षमाणः प्रायेणायासलिङ्गसंयुक्तः ।
वीररसान्तरचारी कार्यः कृतको भवति कोपः ॥'

अयन्तु समग्रो रौद्रः त्रिपुरदाहादौ डिमे व्यायोगे च जामदग्न्यविजयादावुदाहर्तव्यः । यथा वाऽश्वत्थामाङ्के —'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमद'इत्यादि ।

अथ हास्यः—

विकृताकृतिवाग्वेषैरात्मनो वा परस्य वा ।
हासः स्यात् परिपोषोऽस्य हास्यस्त्रिप्रकृतिश्रितः ॥७६॥
स्मितमिह विकासिनयनं किञ्चिल्लक्ष्यद्विजं तु हसितं स्यात् ।
मधुरस्वरं विहसितं साधु शिरःकम्पमुपहसितम् ॥७७॥
अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम् ।
द्वे द्वे हसिते चैषां ज्येष्ठे मध्येऽधमे क्रमशः ॥७८॥
निद्रालस्यश्रमग्लानिमूर्छास्तद्व्यभिचारिणः ।

त्रिप्रकृतिश्रितः उत्तम[1]मध्यमाधमप्रकृति[2]पुरुषगामीत्यर्थः । उत्तममुत्तमानां स्मितहसितात्मकं प्रथमयुगलं वर्ण्यम् । मध्यमं मध्यमानां चरममधमानामिति ।

स च हास्य आत्मस्थः परस्थश्चेति द्वैविध्यं भजते । उक्तं हि भरतमुनिना—

'विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च ।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥
विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषकृतैः ।
हासयति जनं यस्मात् तस्माज् ज्ञेयो रसो हास्यः ॥'
'ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥
उत्फुल्लानननेत्रन्तु गण्डैर्विकसितैरथ ।
किञ्चिल्लक्षितदन्तं च हसितं तद्विधीयते ॥'

1. M. T read उत्तमाधममध्यम०, 2. T omits प्रकृति.

अथ मध्यमानाम्—

'आकुञ्चिताक्षिगण्डं यत्सस्वनं[1] मधुरं तथा ।
कालागतं सास्यरागं तद्वै विहसितं भवेत् ॥
उत्फुल्लनासिकं यत्तु जिह्मदृष्टिनिरीक्षितम् ।
निकुञ्चितांसकशिरस्तच्चोपहसितं भवेत् ॥'

अथाधमानाम्—

'अस्थानहसितं यत्तु सास्रनेत्रं तथैव च ।
कम्पितांसशिरश्चापि तच्चापहसितं भवेत् ॥
संरब्धं सास्रनेत्रं च विक्रुष्टस्वनमुद्धतम् ।
करोपगूढहास्यं यत्तच्चातिहसितं भवेत् ॥
हास्यस्थानानि यानि स्युः कार्योपात्तानि नाटके ।
उत्तमाधममध्यानामेवं तानि प्रयोजयेत् ॥
इत्येष स्वसमुत्थस्तथापरसमुत्थश्च विज्ञेयः ।
द्विविधस्त्रिप्रकृतिगतः षड्विधभावो रसो हास्यः ॥'

अत्रात्मस्थो यथा—

'पाणौ कङ्कणमुत्फणः फणिपतिर्नेत्रे ज्वलत्पावकः
कण्ठः कुण्ठितकालकूटकलुषो वस्त्रं गजस्याजिनम् ।
गौरीलोचनलोभनाय सुभगो वेषो वरस्येति मे
गण्डोल्लास[2]विभावितः पशुपतेर्हास्योद्गमः पातु वः ॥'

परस्थो यथा—

'कनककलशस्वच्छे राधापयोधरमण्डले
नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपन्
जयति जनितव्रीडाहास्यः प्रियाहसितो[3] हरिः ॥'

षड्विधस्तु[4] हास्यो हास्यैकरसे प्रहसन एवोदाहर्त्तव्यः इति ।

अथाद्भुतः—

अतिलोकैः पदार्थैः स्याद् विस्मयात्मा रसोऽद्भुतः ॥७९॥
कर्मास्य साधुवादाश्रुवेपथुस्वेदगद्गदाः ।
हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः ॥८०॥

1. सुस्वनं—M. 2. ...ल्लासि०—T. 3....हसिते M. 4. षड्विधैस्तु—T, षड्विधहास्यो—M.

कर्म कार्यमनुभाव इति यावत् । उक्तं हि भरतेन—

'यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्मरूपं वा ।
एभिस्त्वर्थविशेषै रसोऽद्भुतो नाम सम्भवति ॥
स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैश्च ।
वेपथुगद्गदवचनैः स्वेदाद्यैरभिनयस्तस्य ॥'

तथा—

'दिव्यश्चानन्दजश्चेति द्विधा ख्यातोऽद्भुतो रसः[1] ।
दिव्यदर्शनजो दिव्यो हर्षादानन्दजः स्मृतः ॥'

दिव्योऽद्भुतो यथा—

'अंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनाम् ॥'

आनन्दजो यथा—

'कृष्णेनाम्ब गतेन रन्तुमधुना मृद् भक्षिता' इत्यादि ।

अयं चाद्भुतो निर्वहणसन्धौ नाटकादावुदाहर्तव्यः ।

अथ भयानकः—

विकृतस्वनसत्त्वादेर्भयभावो भयानकः ।
सर्वाङ्गवेपथुस्वेदशोषवैवर्ण्यलक्षणः ।
दैन्यसम्भ्रमसम्मोहत्रासादि[2]स्तत्सहोदरः ॥८१॥

अत्र लक्षणशब्देनानुभाव उक्तः । सहोदर[3]शब्देन च भयसहचरा व्यभिचारिण उक्ताः ।

उक्तं हि मुनिना—

'विकृतरवसत्त्वदर्शनसङ्ग्रामारण्यशून्यगृहगमनात् ।
गुरुनृपयोरपराधात् कृतकश्च भयानको ज्ञेयः ॥
गात्रमुखदृष्टिभेदैरूरुस्तम्भादिवीक्षणोद्वेगैः ।
(सन्न[4]) मुखशोषहृदयस्पन्दनरोमोद्गमैश्च भयम् ॥
एतत्स्वभावजं स्यात् सत्त्वसमुत्थं तथैव वक्तव्यम् ।
पुनरेभिरेव भावैः कृतकं मृदुचेष्टितैः कार्यम् ॥
करचरणवेपनेन स्तम्भेन च गात्रहृदयकम्पेन ।
शुष्कोष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः ॥'

अयं च डिमव्यायोगयोः समग्र उदाहर्तव्यः ।

---

1. रसोऽद्भुतः—T. 2. त्रासाद्यास्तत्सहोदराः—T. 3. तत्सहोदर॰—T.
4. M reads सरस॰, T omits.

यथा वा—

'इदं मघोनः कुलिशं धारासन्निहितानलम्।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥'

अथ करुणः—

इष्टनाशादनिष्टाप्तेः शोकात्मा करुणोऽनु तम्[1]।
निःश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः ॥८२॥
तस्यापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥८३॥

अत्र रुदितत्रैविध्यम्—करुणे तद्विशेषव्यवस्था चोक्ता भरतमुनिना—

'हर्षोत्फुल्लकपोलं सानुस्मरणादपाङ्गविसृतास्रम्[2]।
रोमाञ्चितगात्रमनिभृतमानन्दसमुद्भवं भवति ॥
प्रस्फुरितोष्ठकपोलं सशिरःकम्पं तथा सनिःश्वासम्।
भ्रुकुटीकटाक्षकुटिलं स्त्रीणामीर्ष्याकृतं भवति ॥
[3]पर्यासविमुक्तास्रं सस्वनमस्वस्थगात्रगतिचेष्टम्।
भूमिनिपातविवर्तितविलपितमित्यार्तिजं भवति ॥
स्त्रीनीचप्रकृतिष्वेष शोको व्यसनसम्भवः।
धैर्येणोत्तममध्यानां नीचानां रुदितेन च ॥'

उत्तमस्य करुणो यथा—

'अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥'

स्त्रीकरुणो यथा रतिप्रलापः—

'अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्धजा
समदुःखामिव कुर्वती स्थलीम् ॥'

न चैषां करुणभयानकबीभत्सरौद्राणां रसत्वे विप्रतिपत्तव्यम्। स्वादात्मनः स्वानुभवसिद्धेः रसिकस्य रोमाञ्चादिभिरानन्दानुभवस्यानुमीयमानत्वात् तत्तद्रसाभिनयदर्शने तत्तत्प्रबन्धश्रवणे च प्रेक्षावत्प्रवृत्त्यन्यथानुपपत्तेश्च। एवमष्टौ रसा व्युत्पादिताः। ननु रसान्तराणि भावान्तराणि च दृश्यन्ते तानि किमिति नोच्यन्ते। तत्राह—

प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः।
हर्षोत्साहादिषु स्पष्टमन्तर्भावान्न कीर्तिताः ॥८४॥

---

1. करुणो रसः—M. 2. निःसृतास्रम्. 3. T omits 'पर्यास०......भवति'.

अयञ्च रसो गुणालङ्कारसंसृष्टिवशादेव कविना पोषणीयः ।

यथा—

'लोको यादृशमाह साहसवनं तं क्षत्रियापुत्रकं
स्यान्मन्ये न स तादृगेव न भवेद् वार्ता विसंवादिनी ।
एकां काल ······ विप्रुषममी शौर्योष्मकण्डूयन—
व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बा भवद्बाहवः ॥'

अत्रौदार्यादिस्वाभाविकगुणानामुक्तिप्रौढिप्रभृत्यलङ्काराणाञ्च संसृष्टिवशाद् वीररस-परिपोष इति । यत्र रसस्यैव गुणभावस्तत्र तस्याप्यलङ्कारत्वमेवाहुः—

'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥'

अतो रसावियोगहेतुत्वेन गुणालङ्कारावुपादातव्याविति । अत्र दोषवर्जनेन तदभावा-त्मकाः केचिद्गुणालङ्कारा अयत्नसिद्धा भवन्ति । अयत्नसिद्धगुणालङ्काराश्च न पृथक्-प्रयत्नापेक्षिणः । येऽपि च पृथक् प्रयत्नमपेक्षन्ते तेऽपि तत्तद्रसपोषाय तत्र तत्र प्रयत्नेना-[1] प्युपादातव्या इति ।

यथाहुः—

'युवतेरिव रूपमङ्ग काव्यं[2]
स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयं निरन्तराभिः
सदलङ्कारविकल्पकल्पनाभिः ॥'

तत्र युवतीरूपलावण्य[3]यौवनादिवदलङ्कार्यशरीरनिविष्टा ये शरीरशोभायै[4] भवन्ति, ते गुणाः । ये त्वलङ्कार्यात् पृथग्भूता हारनूपुरकेयूरादिवदुपमारूपकादयः काव्यमलङ्कुर्वन्ति तेऽलङ्काराः । तत्र त्रिविधाः गुणाः—शब्दगुणा अर्थगुणा वैशेषिकगुणाश्चेति । तत्र शब्दमेव व्युत्पत्त्यादिना भूषयन्तो[5] युवतियौवनादिवदापातत एवोपलभ्यन्ते ते शब्दगुणाः । येऽर्थमेव व्युत्पत्त्यादिना भूषयन्तः सौशील्यादिवद् विमर्शनोपलभ्यन्ते तेऽर्थगुणाः । ये तु स्वतो दोषाः सन्तोऽपि विषयवशेन रसानुगुण्येन वा गुणत्वं भजन्ते ते वैशेषिकगुणा इति । तत्र भरतमुनिना दश गुणा उपदिष्टाः—

'श्लेषः प्रसादः समता समाधिः
माधुर्यमोजः पदसौकुमार्यम् ।
अर्थस्य च व्यक्तिरुदारता च
कान्तिश्च काव्यस्य गुणा दशैते ॥' इति ।

---

1. यत्नेन व्युत्पादयितव्या इति—M. 2. काव्ये—M. 3. लावण्यं—M, T. 4. M reads शोभयन्ति in place of शरीरशोभायै भवन्ति. 5. भूषयन्ते—M.

भोजराजेन त्वन्ये गुणाश्चतुर्दशोक्ताः, आहृत्य चतुर्विंशतिः। श्लेषः, प्रसादः, समता, माधुर्यं, सुकुमारता, अर्थव्यक्तिरुदारत्वमोजः (कान्तिरुदात्तत्वम्) और्जित्यं, प्रेयः, सुशब्दता समाधिः, सौक्ष्म्यं, गाम्भीर्यं, विस्तरः, सङ्क्षेपः, सम्मितत्वं (भाविकत्वं) गतिरुक्तिः, प्रौढिरिति। अत्र श्लिष्टपदता श्लेषः। यथा 'दृष्ट्वैकासनसङ्गते'त्यादि। अर्थस्य प्राकट्यं प्रसादः। क्रमवतामवैषम्यं समता। (यथा)—'अग्रे स्त्रीनखपाटलं कुरबकमि'त्यादि। स्वरूपाभिधानमर्थव्यक्तिः। (यथा)—'पृष्ठेषु शङ्खशकलच्छविषि'त्यादि। अथ वैशेषिका गुणाः। तत्र वाक्यदोषपौनरुक्त्यस्यानुकम्पातिशयविवक्षाविषये शृङ्गाररसानुकूल्येन गुणत्वम्। यथा—'हन्यते सा वरारोहे'त्यादि। वाक्यार्थदोषस्य समुदायार्थवैधुर्यस्योन्माद-विषये गुणत्वम्। यथा 'क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा' इत्यादि। एवमूह्यम्।

अथालङ्कारास्त्रिविधाः—शब्दालङ्कारा अर्थालङ्कारा उभयालङ्काराश्चेति। ते च प्रत्येकं चतुर्विंशतिः। (शब्दालङ्काराः)—जातिर्गती रीतिर्वृत्ती रचना घटना मुद्रा छाया युक्तिरुक्तिर्भणितिः पठितिः श्रव्यत्वं प्रेक्ष्यत्वमध्येयत्वमभिनेयत्वं वाकोवाक्यं प्रश्नोत्तरं प्रहेलिका गूढचतुर्थश्चित्रं श्लेषो यमकमनुप्रास इति। अर्थालङ्काराः—जातिः सूक्ष्मः सारः समाहितं भावो विभावना हेतुरहेतुः सम्भवो विरोधो दृष्टान्तो व्यतिरेकोऽन्योन्यं परिवृत्तिर्निमीलितं वितर्कः स्मरणं भ्रान्तिरुपमानमनुमानमागमोऽर्थापत्तिरभावः प्रत्यक्ष-मिति। वस्तुनोऽवस्थाविशेषजातः सन्निवेशविशेषो जातिः।

यथा—

'स दक्षिणापाङ्गनिविष्टमुष्टिं
नतांसमाकुञ्चितसव्यजानुम्।
ददर्श चक्रीकृतचारुचापं
प्रहर्तुमभ्युद्यतमात्मयोनिम्॥'

शोभाहेतुत्वाद्रसादिविभावत्वाच्चार्थालङ्कारता प्रत्यक्षादीनामिति। तत्र—

'विस्रम्भादुत्तमाङ्गं प्लवगबलपतेः पादमक्षस्य हन्तुः
कृत्वोत्सङ्गे सलीलं त्वचि कनकमृगस्याङ्गमाधाय शेषम्।
बाणं रक्षःकुलघ्नं प्रगुणितमनुजेनादरात् तीक्ष्णमक्ष्णः
कोणेनावेक्षमाणस्तदनुजवदने दत्तकर्णोऽयमास्ते॥'

अत्र मारीचादिवधस्मारणेन विस्रब्धरामसहायप्रदर्शनेनायमिति च गम्भीरोदात्ताशय-रामप्रत्यापत्तिदर्शनेन च वीररसौपयिकार्थालङ्कारो जातिसूक्ष्मविभावनाभावतर्कस्मरण-प्रत्यक्षाद्यर्थालङ्कारसंसृष्टिश्च द्रष्टव्येति।

अथ शब्दविशेषद्वारकोऽर्थविशेषो येषु प्रतीयते ते उभयालङ्काराश्चतुर्विंशतिः—उपमा रूपकं साम्यं संशयः समाधिः समासोक्तिः (सहोक्तिः) समुच्चयस्तुल्ययोगिता

लेशोऽपह्नुतिरप्रस्तुतप्रशंसोत्प्रेक्षार्थान्तरन्यासो दीपकं परिकरः क्रमः पर्यायोऽतिशयः आक्षेपो विशेषः श्लेषो भाविकं संसृष्टिरिति ।

तत्र प्रसिद्ध्यनुरोधेनार्थविशेषविषये मिथः प्रतीयमानाभिधीयमानभूयोऽवयवसामान्ययोग उपमा । सा च त्रिधा—पदोपमा, वाक्योपमा प्रपञ्चोपमा चेति । आद्यापि समासोपमा प्रत्ययोपमा चेति द्विधा । समासोपमानान्तर्गतेवार्थान्तर्भूतसामान्या (अन्तर्भूतोभयार्था) सर्वसमासा चेति । मुखमिन्दुसुन्दरमिति । चन्द्रसदृशं मुखमिति । कमलकरा रम्भोरूरिति । शरदिन्दुसुन्दरमुखीति । प्रत्ययोपमापि चतुर्धा—कश्चित् प्रत्यय उपमेये कश्चिदुपमाने कश्चित् सामान्ये कश्चिदिवार्थे । हंसो ध्वाङ्क्षविरावी । पूर्णेन्दुकल्पवदना । सूर्यीयति सुधारश्मिरित्याद्यनन्तभेदेति । उपमैव तिरोभूतभेदा रूपकमित्यादि । अत्रगुणालङ्कारसन्धयो············ते केवलमलङ्कारत्वेनावतिष्ठन्ते । ये सोल्लेखास्ते रभसत्वेन कविभिर्निबध्यन्ते । केचित् शोभाकरत्वाविशेषाद्रसगुणयोरलङ्कारत्वं मन्यन्ते । तन्मते त्रिविधा सूक्तिः स्वभावोक्तिर्वक्रोक्तिः रसोक्तिरिति । तत्र गुणप्राधान्ये स्वभावोक्तिः । उपमारूपक········ अतः शब्देनार्थप्रतिपादनं यत्कविनोपादी ······ ·····अत एव भट्टनायकेनाभिधानव्यापारः·········प्राधान्यमाश्रित्य तत्र शास्त्रं पृथग् विदुः·········वदन्त्याख्यानमेतयोः । द्वयोर्गुणत्वे ········ काव्यमेव तद्भामहेनापि ·········सैषा सर्वैव············विभाव्यते । अन्ये तु—श्लेषः पुष्णाति सौभा··········यमिति । एवंस्थिते गुणानामलङ्काराणाञ्च क्वचित् ·······सङ्ख्याह्रासस्संवादोऽप्यविरुद्धः ·········लङ्कारानाहुः । अतिशयो नयो दाक्षिण्यमभिन (? अभिप्राय) ········ उपदिष्टं माला सम्भ्रमोऽर्थापत्ति·········प्राप्तिर्हेतुर्विशेषणं गुणातिपातो विचारो········ आशीरभिमानः कपटः याच्ञा निदर्शनमभिज्ञा········अक्षरसङ्घातः शोभोदाहरणं क्षोभः अर्थविशेषणं प्रोत्साहनं गुणकीर्तनं कीर्त्तिराख्यानं निवेदनं परिवाद उपपत्तिः गुणानुवादः परिहार उद्यमः कार्यमनुक्तिसिद्धिराश्रयः युक्तिर्लेशोऽनुवृत्तिः क्षमा प्रहर्षः प्रियवचनमिति ············ ।

विष्णोः सुतेनापि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।
आविष्कृतं मुञ्जमहीशगोष्ठी–
वैदग्ध्यभाजा दशरूपमेतत् ॥८५॥

[इति[1] बहुरूपमिश्रविरचितायां दशरूपकदीपिकायां चतुर्थः प्रकाशः ।]

---

1. This is found at the end of the third Prakasa. So this is included here.

Notes

Prakāśa I

While commenting on the first two verses, Dhanika remarks—'इह···प्रकरणस्य समाप्त्यर्थमिष्टयोः प्रकृताभिमतदेवतयोर्नमस्कारः क्रियते श्लोकद्वयेन'. This reading is found in all the editions of D.R. (except Adyar Library Edition). This reading is not correct, because here homage has been paid only to two deities, whereas in the verses there is a mention of three deities, Gaṇeśa, Viṣṇu and Bharata. The Baroda Ms. reads—'···इष्टदेवतायाः प्रकृताभिमतदेवतयोर्नमस्कारः कृतिना क्रियते श्लोकद्वयेन'. This is the correct reading of the Avaloka. The favourite deity is Gaṇeśa and the two desired in the present context are Viṣṇu and Bharata. See also A.L.E.

In the Daśarūpakadīpikā, we find separate remarks on these verses. On the first verse, B.M.'s remark runs thus : 'अथ···विघ्नाधिराजं नमस्करोति···ग्रन्थकृद् धनञ्जयः'; and on the second thus : 'अथ रूपकाणां प्रतिपाद्यतां···नाट्यवेदप्रयोक्तारं भरतमभिमतदैवतं च विष्णुं नमस्करोति'. B.M.'s remarks are right.

P. 1. Line 7 : अत्र···पमाच्छायालङ्कारः—This is the comment of Dhanika, which is reproduced here. Bhaṭṭanṛsiṃha has for the first time explained the significance of the word छाया and has set forth the remarkable discussion on the उपमाच्छायालङ्कार present in the verse. In the context, the throat of Gaṇeśa is upameya, the drum (puṣkara) is upamāna, the sound is tulyadharma and the Kyaṅ-suffix-element is the indicative element of the similitude. Here the shadow-simile is made possible, because the words ghana and nīlakaṇṭha can convey two meanings respectively, loud and cloud, Śiva and peacock. In the shadow-simile, same elements should be present, which are found in the simile. Here in the shadow-simile, the cloud is upameya, the drum is upamāna, the sound is tulyadharma and the Kyaṅ-suffix is the indicative element. Thus the second meaning, that occurs because of pun, is this : During the performance of the dance of a

peacock, the rumbling of the clouds resembles the sounds of a puṣkara drum. This is the shadow-simile. See the following comments of Bhaṭṭanṛsiṃha :

'खण्डेन = अंशभूतेन श्लेषेण आक्षिप्ता = आहृता उपमाच्छायालङ्कारः। उपमायाः खलु उपमानोपमेयतुल्यधर्मद्योतकानि परिकरः। अत्र चोपमानोपमेयौ कण्ठः पुष्करश्च। तुल्यधर्मो ध्वानवत्ता। द्योतकस्थानीय आचारार्थे विहितः क्यङ्प्रत्ययः। अस्यां चोपमायां प्रतिपाद्यमानायां प्रतिपादकस्वभावादुपमान्तरमपि स्फुरति। श्लिष्टोऽर्थो हि शब्दैस्तत्प्रतिपादकः। खण्डत्वं श्लेषस्य घननीलकण्ठशब्दमात्रगामित्वात्। प्रकृताया उपमायाश्छाया उपमान्तरमेव भवति। मनुष्यच्छायापि खलु मनुष्यरूपैव दृश्यते। तेन घनध्वानो यत्कण्ठो नीलकण्ठस्य ताण्डवे पुष्करवदाचरतीत्येवंरूपाया उपमायाश्छायापि घनध्वानो नीलकण्ठस्य ताण्डवे पुष्करवद् भवतीत्येवंरूपा भवति।

Kārikā 2 : A. T. A. reads भावुकाः

P. 2. Kārikā 6 : स्वादु—A. L. E. reads स्वाद.

P. 3. L. 25-26 : B. M. quotes 'इति दशरूपकमेतद्…'from the 11th chapter of Ś. P. (p. 465). The chapter is quoted by the name प्रबन्धस्थितियाथार्थ्यनिर्णय. The printed edition of Ś. P. calls the chapter रसावियोगप्रकाशन.

P. 4. L. 1. स सट्टको नाटिकाप्रतिमः —Ś. P., chap. 11, p. 466.

L. 2. नखकुट्टादिभिः—Nakhakuṭṭa's opinion 'दिव्यमानुषसंयोगः…' is quoted in N.L.R.K , p. 262. See also B. P., 7,181.

